
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

१६८

॥ चिकित्सासारसंग्रह ॥

वृन्दसंग्रह पृ० ३४

Accession No:- 1334 M868

Title:- वृन्दसंग्रह (परिभाषाधिकार)

Subject: चिकित्सा शास्त्र

Author: गणेशभट माडवरकर (Vrinda)

Date: 1716 शके

॥श्रीमहागणपतयेनमः॥श्रीन्[illegible]यनमः॥ध्यात्वाशिवंपरमतत्त्वविचारवेद्यंचंडीमभीष्टफ
लदांसगणंगणेशं॥धन्वंतरिंमुनिवरंमुनिसुश्रुतादीनात्रेयमुग्रतपसंमनसाप्रणम्य॥१॥नानामतप्रथि
तैस्तरदृष्टफलप्रयोगैः प्रस्तावावाक्यसहितैरिहसिद्धयोगैः॥वृंदेनमंदमतिनात्महितार्थिनायंसंलि
ख्यतेगदविनिश्चयजःक्रमेण॥२॥रोगमादौपरीक्षेततदनंतरमौषधं॥ततःकर्मभिषक्पश्चाज्ज्ञा
नपूर्वंसमाचरेत्॥३॥यस्तुरोगमविज्ञायकर्माण्यारभतेभिषक्॥अप्यौषधविधानज्ञस्तस्यसिद्धि
र्यदृच्छया॥४॥यस्तुरोगविशेषज्ञःसर्वभैषज्यकोविदः॥देशकालप्रमाणज्ञस्तस्यसिद्धिरसंशयं
॥५॥आदावंतेरुजंज्ञानेप्रयतेतचिकित्सकः॥साध्यासाध्यविभागज्ञस्ततःकुर्याच्चिकित्सितं॥ध
नास्तिरोगोविनादोषैर्यस्मात्तस्माद्विचक्षणः॥अनुक्तमपिदोषाणांलिंगैर्व्याधिमुपाचरेत्॥७॥
विकाराणामकुशलोनजिह्रीयात्कदाचन॥नहिसर्वविकाराणांनामतोऽस्तिध्रुवास्थितिः॥८॥दर्शन
स्पर्शनप्रश्नैर्व्याधिज्ञानंत्रिधामतं॥अपरेपिदशास्पन्नाशीतादिप्रश्नतोपरः॥९॥कृष्णेपायःसु
खोपायोद्विविधःसाध्यउच्यते॥असाध्योद्विविधोज्ञेयोयाप्योयाप्यप्रतिक्रियः॥१०॥याप्याःकेचि

प्ररूस्यैव साध्यायाप्य उपेक्षया॥ स्वभावाद्व्याधयो साध्याः केचिद्याप्या उपेक्षया॥११॥ साध्यायाप्य
समायांति याप्याश्चासाध्यतां तथा॥ घ्नंति प्राणानसाध्यास्तु नराणामक्रियावतां॥१२॥ जातमात्रश्चि
कित्स्यस्तु नोपेक्ष्योऽज्ञ तथा गदः॥ वन्हिशत्रुविषैस्तुल्यः स्वल्पोपि विकरोत्यसौ॥१३॥ सएव कुपितो दो
षः समुत्थानविशेषतः॥ स्थानांतरगतश्चापि विकारान्कुरुते बहून्॥१४॥ निवृत्तोपि पुनर्व्या
धिः स्वल्पेनायाति हेतुना॥ क्षीणे मार्गीकृते दोषे शेषः सूक्ष्म इवानलः॥१५॥ तस्मात्तमनुबध्नीयात्प्र
योगेणानपायिना॥ व्याधेस्तत्वपरिज्ञानं वेदनायाश्च निग्रहः॥१६॥ एतद्वैद्यस्य वैद्यत्वं न वैद्यः
प्रभुरायुषः॥ कर्मजा व्याधयः केचिद्दोषजाः संति चापरे॥ कर्मदोषोद्भवाश्चान्ये कर्मजास्तेषु हेतुकाः॥
पथ्याशास्त्रं तु निर्णीतो पथ्या व्याधिचिकित्सितः॥१८॥ न शमं याति यो व्याधिः स ज्ञेयः कर्मजो बुधैः॥
स्वल्पदोषो गरीयान्यः स ज्ञेयः कर्मदोषजः॥१९॥ कर्मक्षयात्कर्मकृतो दोषजः स्वल्पमौषधैः॥ कर्म
दोषोद्भवो याति कर्मदोषक्ष [illegible] ०॥ ॥यथा विषं च शस्त्रं च यथाग्निरशनिर्यथा॥ तथौ
षधमविज्ञातं विज्ञातममृतं [illegible] भिः [illegible] भिर्जायंते शरीरे धातवः समाः॥ सा चिकित्सा वि

कारणांक्रमंतद्भिषजाचरेत्॥२२॥ [illegible] त्वस [illegible] स्थादेशाकालबलंप्रति॥यस्यांक्रियमकार्यंस्या

त्कर्मकार्यंविवर्जितं॥२३॥आम [illegible] शग्निसामोमार्गान्पिधापयन्॥विदधातिज्वरंदोषस्तस्मा

त्कुर्वीतलंघनं॥२४॥लंघनेनक्षयंनीतेदोषेसंधुक्षितेनले॥विज्वरत्वंलघुत्वंचक्षुच्चैवास्योपजा

यते॥२५॥सद्योभुक्तस्यवाजातेज्वरेसामेविशेषतः॥वमनंवमनार्हस्यशस्तमित्याहवाग्भटः॥२६॥

अनवस्थितदोषाग्निर्लंघनंदोषपाचनं॥ज्वरघ्नंदीपनंकांक्षारुचिलाघवकारकं॥२७॥अवेक्ष्य

दोषप्राणांश्चकार्यंस्यादपतर्पणं॥तत्रमारुतक्षुत्तृष्णामुखशोषभ्रमान्विते॥२८॥कार्यंनबालवृद्ध

वागर्भिण्यांन्चदुर्बले॥नतथाध्वश्रमक्रोधशोककासक्षयज्वरे॥२९॥बालाविरोधिनाचैनंलं

घनेनोपपादयेत्॥बलाधिष्ठानमारोग्यंतदर्थोयंक्रियाक्रमः॥३०॥वातमूत्रपुरीषाणांविसर्गेगा

त्रलाघवे॥हृदयोद्गारकंठास्यशुद्धौतंद्राक्लमेगते॥३१॥स्वेदजातेरुचौचापिक्षुत्पिपासासहोदये॥

कृतंलंघनमादेश्यंनिर्व्यथेचांतरात्मनि॥३२॥पर्वभेदोंगमर्दश्चकासःशोषोमुखस्यच॥क्षुत्प्र

णाशोरुचिस्तृष्णादौर्बल्यंश्रोत्रनेत्रयोः॥३३॥मनसःसंभ्रमोनीक्ष्णमूर्ध्ववातःस्तमोहृदि॥देहा

॥२॥

॥२

ग्निबलं हानिश्चलंघनेति कृतेभवेत्॥३४॥रक्तशाल्यादयः शस्ताः पुराणाः षष्टिकैः सह॥यवा
ग्वोदने लजार्थ्यैर्ज्वरितानां ज्वरापहा॥३५॥दीपनी पाचनी लघ्वी ज्वरार्त्तानां ज्वरापहा॥अन्नकाले
हिता पेया यथास्वं पाचनैः कृता॥३६॥दाहच्छर्दिर्दितक्षामं निरन्नं तृष्णयान्वितं॥शर्करामधुसं
युक्तं पाययेल्लाजतर्पणं॥३७॥श्रमोपवासानिलजे हितो नित्यं रसोदनः॥मुद्गयूषोदनश्चापि देयः
कफसमन्विते॥३८॥स एव सितया युक्तः शीतः पित्तज्वरे हितः॥मुद्गामलकयूषस्तु वातपित्तात्म
के हितः॥३९॥निंबामलकयूषस्तु हितः पित्तकफात्मके॥यथास्वं पाचनैः सिद्धं वातपित्तकफा
त्मके॥४०॥लघुना पंचमूलेन पिप्पल्या हेसधान्यया॥महता पंचमूल्याथ व्याघ्रीदुस्पर्शगोक्षुरैः
॥४१॥सिद्धानि भिषगन्नानि प्रयुंजीत यथाक्रमं॥वातपित्तश्लेष्मपित्तकफवातत्रिदोषजे॥४२॥
क्वाथद्रव्यांजलिं क्षुण्णां क्षेपयित्वा जलां ... तिके॥अर्द्धसृतेन तेनाथ यवागूं वाथ कल्पयेत्॥४३॥
पदेस्तु स तन्त्री तास्तु षडंग ... पते ... र्षमात्रं ततो द्रव्यं साधयेत्प्रास्थिकं तसि॥४४॥चतुर्दवे
धाः पलं द्रव्यं ग्राहयं साठक ... ॥भे ... ल्या कदाचिदरुचिर्न वेत्॥४५॥अर्द्धस

२८

तंप्रयोक्तव्यंपानेपेयादिसंनिर्दे [illegible] र्षाद्वै [illegible] ॥४०॥ [illegible] याचल्कद्रव्यस्यवापलं॥४६॥विनीयपाचये

द्युक्तावारिप्रस्थेनचापरात्॥ [illegible] ज्वरे देयंजलमुक्तंपिपासिते॥४७॥पित्तमद्यक्षफे [illegible] फा र

शृतं कक्केः स्तजसीतलं॥मुस्तापर्पटकोशीरचंदनोदीच्यनागरैः॥४८॥स्तजशीतंजलंदद्यात्पिपासाज्वर

रशांतये॥षडंगजलं॥पादशेषः कषायः स्याद्यः षोडशगुणेंभसि॥४९॥क्वथितोंतःषडंगादेर्ननिषेधा

नवज्वरे॥अरुचौमातुलुंगस्यकेसरंसाज्यसैंधवं॥५०॥धात्रीद्राक्षासितानांवाकल्कमास्येनधारये

त्॥ज्वरितोहितमश्नीयाद्यद्यप्यस्याप्परुचिर्भवेत्॥५१॥अन्नकालेह्यभुंजानःक्षीयतेम्रियतेपिवा॥

ज्वरितंज्वरमुक्तंवादिनांतेभोजयेल्लघु॥५२॥श्लेष्मक्षयेविवृद्धोष्माबलवाननलस्तदा॥गुर्वभि

स्यंदिकालेवाज्वरंनाद्यात्कथंचन॥५३॥नतुतस्यहितंभुक्तमायुषेवाहितायच॥विनापिभेषजैर्व्या ॥२॥

॥२॥ धिःपथ्यादेवनिवर्त्तते॥५४॥नतुपथ्यविहीनस्यभेषजानांशतैरपि॥सात्म्यत्वात्स्वादुभावाच्च

पथ्यंद्वेष्यत्वमागतं॥५५॥कल्पनाविधिभिस्तैस्तैःप्रियत्वंगमयेत्पुनः॥परिषेकान्प्रदेहांश्चस्नेह

हात्संशोधनानिच॥५६॥दिवास्वप्नंव्यवायंचव्यायामंशिशिरंजलं॥क्रोधप्रवातभोज्यानिवर्जे

येत्तरुणज्वरी ॥ ५७ ॥ शोषछर्दिमदोमूर्छाभ्रमस्तृष्णाह्यरोचकः ॥ प्राप्नोत्युपद्रवानेतान् परिपक्वादिरो ले ॥ ५७ ॥ ६१
वनात् ॥ ५८ ॥ आसप्तरात्रात्तरुणंज्वरमाहुर्मनीषिणः ॥ मध्यंचतुर्दशाहन्तुपुराणमतउत्तरं ॥ बालवृ
वृद्धक्षतक्षीणेनारीणांगुर्विणांतथा ॥ जीर्णज्वरातिसारेचनिराममेवलंघयज्वरे ॥ क्रामजेगंधजेक्रो
स्वा ५ धजेभ्रममूर्छातुरेषुच ॥ एतेषांलंघनंनैवलंघनेस्यादुपद्रवः ॥ घृतंतैलंचपानीयंकषायंव्यंजना
दिकं ॥ पूर्वंतस्यापुनस्तत्संविषवर्द्धतिमानवं ॥ म्देज्वरेलघोदेहे प्र चलेषुमलेषुच ॥ पक्वंदोषं
त्रिवैरु ६ विजानीयाज्वरेदेयंतदौषधं ॥ ६० ॥ दोषप्रकोपयादेकषांपक्वलक्षणं ॥ वातिकःसप्तरात्रेणदशरा
त्रेणदशसप्तत्रिंणपैत्तिकः ॥ ६१ ॥ श्लेष्मिकोद्वादशाहेनज्वरःपाकंहिगछति ॥ रोगसाधनसाध्य
त्रि ४ तुयंविद्यादोषदुर्बलं ॥ ६२ ॥ तंसमीक्ष्यौषधंकुर्याद्दोषच्यावनंमदुः ॥ चलेदोषेमदोक्तोष्टेनक्षेवात्रबलं
न्नणां ॥ ६३ ॥ अभ्यासेदुर्बलस्यापिशोधनंहितदाभवेत् ॥ पक्वोह्यनिर्हतोदोषोदेहतिष्टन्महात्ययः
॥ ६४ ॥ विषमंवाज्वरंकुर्याद्द... दमे...॥ ॥ सप्त...रात्रात्परंकेचिन्मन्यंतेदशमौषधं ॥ ६५ ॥ दश
रात्रात्परंलेकेदातव्यमितिनि... ॥ ॥ न... ...मंनिनराणांतरुणज्वरे ॥ ६६ ॥ कषायेह्यामकु

द्वाकूप ॥ ६७ ॥ लानरुणज्वरे ॥ ६७ ॥ स्तन्यं तेनविपच्यंते कुर्वंति
लीनूत्वादोषयेत्तुसुदुस्तराः ॥ ६ ... तविध्यते ॥ ६८ ॥ यः कषायः कषायः स्यात्सवर्ज्यस्तरुणज्व
विषमज्वरें ॥ नतुकल्यनमुद्दि ... ॥ ६९ ॥ ... घ्नसुसंकलसर्पसक्षारग्रेणपराम्ब्रानू ॥ पीतांबु
रे ॥ पाययेद्दोषहरणंमोहादामज्वरेतुयः ॥ ६९ ॥ नपिबेदोषधंजंतुसंशोधनमयेतरानू ॥ चत्वारिंशत
लंघितः क्षीणाजीर्णभुक्तः पिपासितः ॥ ७० ॥ नपिबेदोषधंजंतु संशोधनमयेतरानू ॥ चत्वारिंशत
कैर्माषैरष्टादशाक्षपदद्विकैः ॥ ७१ ॥ पलंद्वादशबर्द्धस्याद्गुंजषड्भसमन्वितैः ॥ उत्तमास्यात्पलंमात्रांत्रि
निर्च्याक्षैश्चमध्यमा ॥ ७२ ॥ जघन्यास्यात्पलार्द्धेनस्नेहक्वाथौषधेषुच ॥ क्वाथद्रव्यपलंवारिद्विरष्ट
गुणमुच्यते ॥ ७३ ॥ चतुर्भागावशिष्टंतुपेयंपलचतुष्टयं ॥ दीप्तानलंमहाकायंपाययत्संजलिंज
लं ॥ ७४ ॥ अन्येत्वर्धंपरित्यज्यप्रभूतंचचिकित्सकाः ॥ क्वाथस्यागमनिर्दिष्टंतस्त्वष्टभागावशेषितं ॥ ७५ ॥
परंपर्यायोपदेशेनवद्धवेद्याः पलद्वयं ॥ पाययेत्सातुरंसामंपाचनंसप्तमेदिने ॥ ७६ ॥ शमनेनाथवा
दृष्ट्वानिरामंतनुपाचरेत् ॥ तुल्यैर्नागरभूनिंबगुडूचीमुस्तकैः सतं ॥ ७७ ॥ काषायंपाचनंचामेज्व
रेज्वरविनाशनं ॥ नागरंदेवकाष्टंचधान्यकंबृहतीद्वयं ॥ ७८ ॥ दद्यात्पाचनकंपूर्वंज्वरितायज्वरा

॥ ५ ॥ ॥ ५ ॥

न ३

पहं॥७९॥सर्वज्वरेषु॥ ॥वीर्याधिकंनचतिभेषजमन्नदीनंहन्यात्तदामयमसंशयमाशुचैवं॥तद्वा
लवक्षयवतीमदुभिश्चपीतंग्लानिंपरांसमुपयातिबलक्षयंच॥८०॥अनुलोमोनिलःस्वेदःस्वोसु
त्रष्णासुमंस्नुता॥लघुत्वमिंद्रियोद्गारस्तुद्धिर्जीर्णौषधाकृतिः॥८१॥क्लमोदाहोंगसदनंभ्रमोमूर्छा
शिरोरुजः॥अरतिर्बलहानिश्चसावशेषौषधाकृतिः॥८२॥औषधशेषेभुक्तंपीतंतथौषधंशेषे
भे॥नकरोतिगदोपशमनंप्रकोपयंत्यन्यरोगांश्च॥८३॥शीघ्रंविपाकमुपयातिबलंनहिंस्यादन्ना
वृतंनचमुहुर्वदनान्निरेति॥प्राग्भुक्तसेवितमथौषधमेतदेवदद्याच्चवृद्धशिशुभीरुवरांगनाभ्यः
॥८४॥ ॥अथज्वरचिकित्सा॥ ॥रोगानीकस्यसर्वस्यज्वरोराजासतःस्मृतः॥तस्मात्प्रथमतस्तस्य
प्रवक्ष्यामिचिकित्सितं॥८५॥पाक्यंशीतंकषायंवामुस्तापर्पटकंपिबेत्॥सनागरंपर्पटकंपिबे
द्वासुदुरालभं॥८६॥किरातनिक्तकंमुस्तंगुडूचीविश्वभेषजं॥पाठामुशीरसोदीच्यंपिबेद्वाज्वरशां
तये॥८७॥चंदनोसलहीवेर[illegible]रोशीर[illegible]न्यकं॥बृहतीनागरंमुस्तंवचापर्पटकामृता॥८८॥क्वाथः
सातिविषःपेयःपाचनोज्वरनः॥ [illegible]॥दु[illegible]लभा[illegible]पर्पटकक्वाथंमधुयुतंपिबेत्॥८९॥द्राक्षापटोल

१६

॥५॥

न्निंबक्काथः पाचनउच्यते॥ज्व[illegible] दीपन[illegible]पत्तेक्ष[illegible] पादोषपाचने॥९०॥त द्वारग्विप्रशमनामुस्तवै
रस्यनाशनाः॥गुडूचीपिप्पल[illegible]लनाग[illegible]वतिस्तत्समं॥९१॥वातज्वरे पाचनीयं विशेषेणप्रकीर्त्ति
तं॥बिल्वादिकंचमूलांबुपाचनंवातिकेज्वरे॥९२॥नशोधयतियद्दोषान्समान्नोदीरयत्यपि॥समी
करोतिविषमान्शमनंतञ्चसप्तधा॥९३॥किरातांबुमतोदीच्यवृहतीद्वयगोक्षुरैः॥९४॥सस्थिराक
लशीविश्वैः क्काथोवातज्वरापहः॥पिप्पलीसारिवाद्राक्षाशतपुष्याहरेणुभिः॥९४॥कृतःकषायःसगुडो
हन्यात्श्वसनजंज्वरं॥गुडूचीसारिवाद्राक्षाशतपुष्पापुनर्नवा॥९५॥निःक्काथ्यसगुडंक्काथंपिबेद्वा
तज्वरापहं॥सक्षौद्रंपाचनंतिक्तासमुस्तेंद्रयवैःकृतं॥९६॥लोध्रोत्पलामृतपद्मसारिवाणांसशर्क
रः॥क्काथःपित्तज्वरंहन्यादथवापर्प्पटोद्भवः॥९७॥दुरालभापर्प्पटकप्रियंगुन्निंबवासाकटुरोहि ॥५
णीनां॥क्काथंपिबेत्शर्करयावगाढंतृष्णास्रपित्तज्वरदाहयुक्तः॥९८॥पटोलयवनिःक्काथोमधुनाम
धुरीकृतः॥गुडूचीपित्तज्वरामर्दीपानात्तृट्दाहनाशनः॥९९॥एकःपर्प्पटकःश्रेष्ठःपित्तज्वरविनाशनः॥
किंपुनर्यदियुज्येतचंदनोदीच्यनागरैः॥१००॥विश्वांबुपर्प्पटोशीरंघनचंदनसाधितं॥दद्यात्सुशी

तलं तोयं तत्तृट्दाहज्वरच्छर्दिनुत् ॥१॥ पर्प्पटामृतधात्रीणां क्वाथः पित्तज्वरं जयेत् ॥ द्राक्षारग्वधयोश्चा घा
पि क्वाथः शमयेच्चाथ वापुनः ॥२॥ द्राक्षाभयापर्प्पटकाब्दतिक्ता क्वाथस्सशम्याकफलो विदध्यात् ॥ प्रलाप
मूर्च्छाभ्रमदाहशोषतृष्णान्विते पित्तनवे ज्वरे च ॥३॥ पर्युषितं धान्यजलं प्रातः पीतं सशर्करं पुंसां ॥
अंतर्दाहं शमयेद्द्विवृद्धमपि तत्क्षणादेव ॥४॥ अम्लपिष्टैः सुशीतैर्वा पलाशानतरुजैर्द्दहेत् ॥ बदरी
पल्लवोच्छेनफेनेनारिष्टकस्य वा ॥५॥ विदारीदाडिमंलोध्रं दधित्थं बीजपूरकं ॥ एभिः प्रदिह्यान्मू
र्द्धानं तृट्दाहार्तस्य देहिनः ॥६॥ उत्तानसुप्तस्य गभीरताम्रकांस्यादिपात्रं प्रणिधाय नाभौ ॥ ताम्रां
बुधाराबहुलं पतंती निहंति दाहं त्वरितं सुसीती ॥७॥ पित्तेकमलहासिन्योजलयंत्रगृहाः शुभाः ॥
नार्यश्चंदनदिग्धांग्यो हदैन्यहरा मताः ॥८॥ हर्म्ये शुभ्राभ्रसंकाशे शशांककरसीतले ॥ मलयोद
कसिक्ते वा सुप्यात्सिन्नज्वरी नरः ॥९॥ जिह्वातालुगलक्लोमशोषे मूर्द्धनि दापयेत् ॥ केसरं मातुलिंग
स्य मधुसैंधवसाधितं ॥१०॥ [illegible] गा [illegible] कफाविष्टस्रसग्रंथीकसंभवं ॥ कफज्वरेषु सक्षारं पाच
नं वा चूर्णादिकं ॥११॥ पिप्पलि [illegible] प्पली [illegible] चंच [illegible] चित्रकनागरं ॥ मरिचैलाजमोदेंद्रपाठारेणुक

वैद्य

जीरकं ॥१२॥ नागर्भिमहानिंब [illegible] गुरो [illegible] णस [illegible] ॥ विडंगातिविषामुर्वागणोयं परिकीर्त्तितः ॥१३॥
पिप्पल्यादिः कफहरः प्रति [illegible] रोचकी [illegible] लान् ॥ निहन्यादीपनो गुल्मश्शूलघ्नस्त्वामपाचनः ॥१४॥
सिंदुवारदलक्काथः कणायुक्तः कफज्वरे ॥ अविपाकेतितंद्रायां पार्श्वरुक्श्वासकासके ॥१५॥ कुष्ट
निंबजवंमूर्वापटोलंवा पिसाधितं ॥ पिबेन्मरिचसंयुक्तं सक्षौद्रं श्लेष्मिके ज्वरे ॥१६॥ त्रिफलापा
टोलवासा छिन्नरुहातिक्तरोहिणि ॥ षडंगं थाम धुनाश्लेष्मसमुच्छे जागराद्याश्च नाशाणिका ॥१७॥
दूराध्वन्यः श्रांतदेहः पिपासी वातीक्षीणोमद्यमत्तोतिसारी ॥ रात्रौ यो नाजागरूकस्तदर्पनिम्नासे
व्यास्तेर्मनुष्यैर्दिवापि ॥१८॥ अमलक्यभयकृष्णचित्रकश्चेत्ययंगणः ॥ सर्वज्वरकफातंकीभेदी वक्ष्या
ग्निदीपनः ॥१९॥ आमलक्यभयाकृष्णानागरं सिंधुजीरकं ॥ चित्रकश्चसमं चूर्णं मातुलिंगरसानु
तं ॥२०॥ सर्वज्वरकफातंकभेदीदीपनपाचनं ॥ ॥अमलक्यादि॥ ॥ निंबविश्वामृतादारुसठीभूनिंब ॥८॥

नं।३

पोष्करं ॥ कथ्थ्लं पुष्करस्थं गीरुघ्नात्वमधुनासह ॥ कासश्वासज्वरहरः श्रेष्ठो लेहः कफांतकृत् ॥२१॥
चतुर्भद्रकावलेहः ॥ क्षुद्रोपल्यासंयोगः कासश्वासज्वरापहः ॥ प्लीहानं हंति हि काचबालानांचप्र

×पिप्पल्योबहतीचेति क्काथो हंति कफज्वरं ॥२

प्रशस्यते॥२१॥कर्षश्चूर्णस्यकल्कस्यगुटिकानांचसर्वशः॥द्रवशुक्त्यासहेदव्यःपातव्यश्चचतुर्द्रवः
॥२२॥उर्द्ध्वजत्रुगरोगघ्नीसायंस्यादवलेहिका॥अधोनागहरीयातुसापूर्वंभोजनान्मता॥२४॥मात्रायां
नास्त्यवस्थानंदोषमग्निंबलंवयः॥व्याधिंद्रव्यंचकोष्ठंचवीक्ष्यमात्रांप्रकल्पयेत्॥२५॥अनुपाने
प्रयोक्तव्यंव्याधौश्लेष्मनवेफलं॥पलद्वयंचानिलजेपित्तजेतुपलत्रयं॥२६॥संसृष्टदोषेषुहितंसं
सृष्टमथपाचनं॥विश्वामृताब्दभूनिंबैःपंचमूलसमन्वितैः॥२७॥कृतःकषायोहंत्याशुवातपित्तो
त्थज्वरं॥ ॥नवांगक्वाथः॥ ॥त्रिफलाशाल्मलीरास्नाराजवृक्षाटरूषकैः॥शृतमंबुहरेच्चूर्णंवातपि
त्तोत्थज्वरं॥किरातंतिक्तमम्लांद्राक्षामामलकंसठी॥निष्क्वाथ्यपित्तानिलजेतंक्वाथंसगुडंपिबेत्॥२८॥
निर्दिग्धिकाबलारास्नात्रायमाणामृतायुतैः॥मसूरविदलैःक्वाथोवातपित्तज्वरंजयेत्॥२९॥गुडूची
पर्पटंमुस्तांकिरातंविश्वभेषजं॥वातपित्तज्वरेदेयंपंचभद्रमिदंशुभं॥किरातंनागरंमुस्तंगुडूचींच
कफाधिके॥पाटोदीच्यमृणालं[illegible]पि[illegible]धिकेपिबेत्॥३०॥ ॥चतुर्भद्रकपाठासप्तकौ॥ ॥कंठका
र्यमृतानागिनागरैर्बुयवासकं॥ [illegible]नंबचं[illegible]मुस्तं[illegible]टोलंकटुरोहिणीं॥३१॥कषायंपाययेदेनंपित्त

चं द

श्लेष्मज्वरापहं॥ दाहतृष्णारुचि [illegible] र्दिकास [illegible] सा श्व [illegible] लनुत्॥ २६॥ कंडूचीनिंबधान्याकं पद्मकं चंदनानिच॥ एषसर्वज्वरान्हंति [illegible] ॥ [illegible] श्व [illegible] पनः॥ २७॥ हल्लासारोचकछर्दिपिपासाज्वरनाशनः॥ पटोलचंदनंमूर्वातिक्तापाठामृतागणः॥ २८॥ पित्तश्लेष्मारुचिछर्दिज्वरकंडूविषापहः॥ सपुष्पपत्रवासायारसः क्षौद्रसितायुतः॥ २९॥ कफपित्तज्वरंहंतिसास्रपित्तंसकामलं॥ शार्कराम समात्रातुकटुकामुष्णवारिणा॥ ३०॥ पीत्वाज्वरंजयेज्जंतुः कफपित्तसमुद्भवं॥ पटोलपिचुमंदश्चत्रिफलामधुकंबल्कं॥ ३१॥ साधितोयंकषायःस्यात्सितश्लेष्मभवेज्वरे॥ दीपनंकफविछेदिपित्तवातानुलोमनं॥ ३२॥ ज्वरघ्नंपाचनंभेदीशृतंधान्यपटोलयोः॥ कफवातज्वरेस्वेदान्कारयेद्रूक्षनिर्मलान्॥ ३३॥ श्रोतसांमार्दवंकृत्वानीत्वापावकमाशयं॥ हत्वावातकफौतौहिस्वेदोज्वरमपोहति॥ ३४॥ खर्परभ्रष्टपुटस्थितकांजिकसिक्तोहिवालुकास्वेदः॥ शमयतिवातकफामयमस्तकशूलांगभंगादीन्॥ ३५॥ मातुलुंगफलकेशरोद्धृतःसिंधुजन्ममरिचान्वितोमुखे॥ हंतिवातकफरोगमास्यगंशोषमाशुजडतामरोचकं॥ ३६॥ पिप्पलीपिप्पलीमूलंचव्यचित्रकनागरैः॥ दीपनीयःस्मृतोवर्गःकफानिलज्वरापहः॥ ३७॥

रो

।।७।।

॥ पंचकोलं ॥ ॥मुस्तनागरभूनिंबत्रयमेतत्त्रिकार्षिकं ॥ कफवातामशमनं पाचनं ज्वरनाशनं ॥४८॥
गुडूचींद्रयवारिष्टपटोलं कटुरोहिणी ॥ नागरं चंदनं मुस्ता पिप्पलीचूर्णसंयुतः ॥४९॥ अमृताष्टक
इत्येष पित्तश्लेष्मज्वरापहः ॥ हृल्लासारोचकाछर्दिः तृष्णादाहनिवारणः ॥५०॥ पिप्पलीभिश्शृतं तो
यमनभिष्यंदि दीपनं ॥ ॥ वातश्लेष्मविकारघ्नं प्लीहघ्नं ज्वरनाशनं ॥५१॥ क्षुद्रामृतानागरपुष्कराह्व
ये: कृत: कषाय: कफमारुतोत्तरे ॥ सश्वासकासारुचिपार्श्वरुक्करे ज्वरे त्रिदोषप्रभवेपि शस्यते ॥५२॥
दशमूलीरस: पेय: कणायुक्त: कफानिले ॥ अविपाकेतितंद्रायां पार्श्वरुक्श्वासकासयोः ॥५३॥ मु
स्तापर्प्पटकं सुंठीगुडूचीसदुरालभा ॥ कफवातारुचिछर्दिदाहशोषज्वरापहः ॥५४॥ आरग्वधग्रंथि
कमुस्ततिक्ताहरीतकीभि: क्वथित: कषाय: ॥ सामसशूले कफवातयुक्ते ज्वरे हितो दीपनपाचनश्च ॥
॥५५॥ दारुपर्प्पटभार्ग्यब्दवचाधान्यकटुफलै: ॥ साभया विश्वभूतीकै: काथो हिंगुमधुत्कट: ॥५६॥
कफवातज्वरे पीतो हिक्कासं[illegible]ग्रान् ॥ कासशोषश्वासकोष्ठ हन्यात्तरुमिवाशनि ॥५७॥
लंघनं वालुकास्वेदो नस्यं [illegible]तया [illegible]वले[illegible]जनं चैव प्राक्प्रयोज्यं त्रिदोषजे ॥५८॥ श्लेष्म

५८

निग्रहमेवादौकुर्याद्धाधौत्रि[illegible]॥निर[illegible]श्लेष्म[illegible]ाह्यस्यस्रोतस्सुद्वादितेषुच॥५९॥लाघवंजाय
तेसद्यस्तृष्णाचैवोपशाम्यति[illegible]॥ग्लं[illegible]रत्वंचहृद्दृष्टिश्चास्यप्रसीदति॥६०॥छिन्नेतरौमूलफलप्ररो
हाःयथाविनाशंसहसाप्रयांति॥तथाहतेश्लेष्मणिशोधनेनतज्जाविकाराःप्रशमंप्रयांति॥६१॥तस्मा
त्पुनःपुनःकुर्यात्श्लेष्मकर्षणशोधनं॥उदीर्णदोषदिवसेप्रथमेवाजयेन्नरः॥६२॥विशोषयेच्चश्ले
ष्माणंपित्तमुत्सादयेत्पुनः॥दुर्गेनसिययामज्जञ्जनंचरयाबुधः॥६३॥रक्षीयात्तमलप्राप्तंयथाभि
न्यासपीडितं॥निद्रापेतमभिन्यासंक्षणंविधाद्वैजसं॥६४॥सान्निपातज्वरेपूर्वंकुर्यादामकफापहं॥
पश्चात्श्लेष्मणिसंक्षीणेशमयेत्पित्तमारुतौ॥६५॥त्रिरात्रंपंचरात्रंवादशरात्रमथापिवा॥लंघनंसं
न्निपातेतुकुर्यादारोग्यदर्शनात्॥६६॥दोषाणामेवसाशक्तिर्लंघनेयासहिष्णुता॥नतुदोषक्षयात्स्त ॥८॥
श्चिसहतेलंघनादिकं॥६७॥कफपित्तोद्भवोधातुःसहतेलंघनंमहत्॥आमक्षयादूर्द्ध्वमपिवायुर्नस
हतेक्षणं॥६८॥अर्द्रकस्यरसोपेतंसैंधवंसकटुत्रयं॥आकंठंधारयेत्वास्येनिष्ठीवेच्चपुनःपुनः॥६९॥
तेनास्यहृदयात्श्लेष्मामन्यापार्श्वशिरोगलात्॥लीनोवाकृष्यतेशुष्कोलाघवंचास्यजायते॥७०॥

पर्वभेदोज्वरोमूर्छा निनिद्राश्वासगलामयाः॥ मुखाक्षिगौरवंजाड्यमुत्क्लेशंचोपशाम्यति॥७१॥ सवृद्धि

त्रिचतुः कुर्याद्दृष्ट्वादोषबलाबलं॥ एतद्धि परमंप्राहुर्भेषजंसांन्निपातकं॥७२॥ ॥कवलग्रहः॥ ॥

मातुलुंगार्द्रकरसं क्षारंतुल्यं त्रिलवणान्वितं॥ अन्यद्वा सिद्धिविहितंनूश्यंतीक्ष्णंप्रयोजयेत्॥७३॥

तेनप्रभिद्यते श्लेष्मा प्रभिन्नश्चप्रसिच्यते॥ शिरोहृदयकंठस्यपार्श्वरुक्चोपशाम्यते॥७४॥ मधूकसा

रसिंधूत्थवचोषणकणाः समाः॥ श्लक्ष्णंपिष्टं भसानस्यंकुर्यात्संज्ञाप्रबोधनं॥७५॥ सैंधवंश्वेतमरि

चंसर्षपाः कुष्टमेवच॥ बस्तमूत्रेण पिष्टानि नस्यंतंद्रानिवारणं॥७६॥ शिरीषबीजंगोमूत्रकृ

ष्णामरिचसैंधवैः॥ अंजनंस्यात्प्रबोधाय सरसोनशिलावचैः॥७७॥ कट्फलंपुष्करंशृंगीव्योष

यासश्वकारवी॥ श्लक्ष्णचूर्णीकृतंचैतन्मधुनसहलेहयेत्॥७८॥ एषावलेहिकाहंतिसन्निपा

तंसुदारुणं॥ हिक्काश्वासंचकासंचकंठरोधनीयच्छति॥७९॥ अष्टांगावलेहिका॥ ॥ कट्फलंपुष्क

रकृष्णाशृंगीचमधुनासह॥ [illegible]कासज्वरहरः श्रेष्टोलेहःकफांतकृत्॥८०॥ एतयोर्ज्यात्कफोद्रेके

चूर्णमार्द्रकजैरसैः॥ सर्वेषुस[illegible]तेषुन[illegible]द्र[illegible]चारयेत्॥८१॥ शी[illegible]॥ नोपचारिक्षौद्रंस्याच्छी

तं चात्र विरुध्यच ॥ क्रियाभिस्तुल[illegible]याभिः [illegible]याणां क्रमभिष्पते ॥ ८२ ॥ भिन्नरूपतयत्तत्तु कुर्वंति न च
दूषणं ॥ रास्नां सुलंघितस्यादौ [illegible]पकवद्व्यहं ॥ ८३ ॥ लाजसक्तु पथ्यं स्यात् हैसै घवे नाव चूर्णितं ॥
रक्तपित्त हितं खन्नदाहज्वररहिते तथा ॥ ८४ ॥ सक्तुचः शीतवीर्यास्युः लाजपूर्वं हितानि ते ॥ पाचनो दीपनो
लाजमंडस्तेनोक्त उच्यते ॥ ८५ ॥ अतो यं दशमूलादिः साधितो भिषजां मतः ॥ तत्त्वजीर्यपविघ्नेन ज्व
रीजीर्णत्त दाभ्कवं ॥ ८६ ॥ पंचमुष्टिकयूषेण त्रिकंटकवृतेन वा ॥ आदोषशमनात्सथ्यं त्रिकंटेनैव सा
धयेत् ॥ ८७ ॥ यवकोल कुलत्थानां मुद्गमूलषडंगयोः ॥ एकैकं मुष्टिमाहृत्य पचेदष्टगुणे भसि
॥ ८८ ॥ पंचमुष्टिक इत्येषः वातपित्तकफापहः ॥ शस्यते स्मल गुल्मे च श्वासे कासे क्षये ज्वरे ॥ ८९ ॥
पंचमूली किरातादी कणो योज्य स्त्रिदोषजे ॥ पित्तोत्कटे च मधुना कणया च कफोत्कटे ॥ ९० ॥ बिल्व
स्योनाककुंभारी पाटला गणकारिकः ॥ दीपनं कफवातघ्नं पंचमूलमिदं महत् ॥ ९१ ॥ शालिपणीपि
थक्पर्णी बृहतीद्वय गोक्षुरैः ॥ वातपित्तहरं वृष्यं कनीयमूलपंचकं ॥ ९२ ॥ उभयं दशमूलं तु संनि
पातज्वरापहं ॥ कासे श्वासे च तंद्रायां पार्श्वमूले व शस्यते ॥ ९३ ॥ पिप्पलीचूर्णसंयुक्तं कंठहृद्ग्र

हनाशनं॥ ॥दशमूली॥ ॥चिरज्वरे वातकफोच्छिते वा त्रिदोषजे वा दशमूलमिश्रः॥९४॥ किसतति
कादिगणः प्रयोज्यः शुद्ध्यर्थिने वा कृताविमिश्रः॥ दशमूलीसठीशृंगीपौष्करं सदुरालभं॥९५॥ भार्गीधु
स्तूरजंबीजं च पटोलं कटुरोहिणी॥ अष्टादशांग इत्येषः सन्निपातज्वरापहः॥ कासहृद्ग्रहपार्श्वार्तिश्वास
हिक्कावमीहरः॥९६॥ ॥अष्टादशांगः॥ ॥भूनिंबदारुदशमूलमहोषधाब्दतिक्तेंद्रबीजधनिकेभ
कणाकषायः॥ तंद्राप्रलापकशनारुचिदाहमोहश्वासादियुक्तमखिलज्वमाशु हंति॥९७॥ अष्टादश
क इत्येषोऽष्टादशभिरौषधैः॥ अष्टावशेषितः पीतोऽष्टधाज्वरनाशनः॥९८॥ सांप्रतं क्वाथराजो
यं ज्वरीजीवनहेतुकः॥ संन्निपातहरार्थं च नान्योऽप्यस्ति द्वितीयकः॥ ॥अष्टादशांकः॥ ॥मुस्तपर्प
टकोशीरं देवदारु महौषधं॥ त्रिफलाधन्वयासश्च नीलीकं पिलुकं त्वचं तू॥२००॥ किराततिक्तकं पा
ठाबला कटुकरोहिणी॥ मधुकं पिप्पलिमुलं मुस्ताद्यो गण उच्यते॥१॥ अष्टादशांशमुद्रेके एतद्वा
सन्निपातनुत्॥ पित्तोत्तरे सन्नि[illegible]हितं प्र[illegible]कमनीषिभिः॥२॥ मन्यास्तंभे उरोघाते शूले पार्श्वशिरो
ग्रहे॥ बृहतौ पुष्करं भार्गी सठी शृं[illegible]दुरालभा॥ वत्स[illegible]स्य च बीजानि पटोलं कटुरोहिणी॥३॥ बृहत्या

ह्रे द

दिगणः प्रोक्तः सन्निपातज्वरापह[illegible]सादि[illegible] च सर्वे[illegible] रहितः सोपद्रवेषु च॥५॥ यह त्यादिः॥ सुंठी पुष्कर

मूलं च व्याघ्री सिंही दुरालभा॥[illegible]वा नागरं पाठा किरातं तिक्तरोहिणि॥६॥ एक सह्यादिको वर्गः सन्नि

पातज्वरापहः॥ कासहृद्ग्रहपार्श्वार्तिश्वासतंद्रासु शस्यते॥७॥ भार्गी पुष्करमूलं च रास्नां बिल्वं यवानि

कां॥ नागरं दशमूलं च पिप्पलीं चाप्युसाधयेत्॥८॥ सन्निपातज्वरे देयं हृत्पार्श्वानाहशूलिने॥ कास

श्वासाग्निमांद्यत्वं तंद्रिं च विनिवर्तयेत्॥ कारपुष्करे रंज्जत्रायं तिनागरामृता॥ दशमूलि सठी शृंगी य

स भार्गी पुनर्नवा॥१०॥ तुल्या मूत्रेण निःक्वाथ्य पीता श्रोतोविशोधना॥ अभिन्यासज्वरं घोरमाशु

घ्नंति समुच्छितं॥११॥ मातुलुंगाश्मभिद्बिल्वं व्याघ्री पाटो रुबुकजः॥ क्वाथो लवणमूत्राढ्यो ऽभिन्यासा

नाहशूलनुत्॥१२॥ द्विपंचमूलीषड्ग्रंथा विश्वगंध नखी दद्यात्॥ कफवातज्वरे पीतः सन्निपातश्रमः परः

॥१३॥ निद्रोपेतमभिन्यासं क्षीणं विंध्यद्वतोजसं॥ कंठरोगकफश्वासहिक्काभिन्यासपीडितः॥१४॥

मातुलुंगार्द्रकरसं दशमूलीं भसापिबेत्॥ व्योषाब्दत्रिफलातिक्तापाटोलारिष्टवासवैः॥१५॥ सम्मूर्निं

मत्तायासेस्त्रिदोषज्वरनुज्ज्वलं॥ सठी पटोलं द्विनिशा यगंधा वासा किरातं दशमूलधारा॥ सहाम्बरं

वि ५

॥१०॥

॥१०॥

भार्गीवरीयश्रृंगीरास्नेंद्रबीजंसुरदारुशिग्रु॥दुरालभावासकसुंठीपाठासुचेंदुकल्कंसहरीतकी

च॥त्रायंतिकंद्राक्षकटुकागदंच कषायमेषांविहितः सुखाय॥श्लेष्मोज्वरेश्वासजकासशूलेवाताधिकेरो

गिणिसंनिपाते॥चिरज्वरेदुष्टमलग्रहेपिनूनंहितोयंसततंसदादि॥२०॥ ॥भार्ग्यादियोगः॥ ॥ ८५

भार्गीभूनिंबनिंबैर्घनकटुकवचाव्योषवासाविशालारास्नानंतापटोलीसुरतरुरजनीपाटलाटिंटुकी

भिः॥ब्रह्मीदार्वीगुडूचीत्वचतिविषैःपुष्करत्रायमाणैःपाठासिंहीकलिंगैस्त्रिफलसहितैर्युतेकल्पितः

स्तुल्यभागैः॥२१॥क्वाथोद्वात्रिंशनामाप्यधिकदशाक्षोसन्निपातान्निहंतिश्लेष्मश्वासातिहिक्काश्वस

नगुदरुजाध्मानविध्वंसमान्य॥उरुस्तंभांत्रवृद्धिर्गलदमरुचौसर्वसंधिग्रहार्तिमातंगोघंनिह

न्यान्मृगरिपुरधिकंरोगजालंतथैव॥२२॥ ॥इतिद्वात्रिंशत्क्वाथयोगः॥ ॥त्रिवृद्विशालाकटुकात्रिफला

रग्वधैःश्रृतः॥सक्षारोभेदनःक्वाथःपेयःसर्वज्वरापहः॥२३॥तिक्तानयात्वदंतीत्रायं।तीराजवृक्ष

कः॥क्षाराढ्यःसैंधवोपेतः [illegible] भेदीज्वरापहः॥२४॥भूनिंबक्षारवीतिक्तावचात्रिकटुकंरजः॥उद्दू

लनंत्रिदोषोच्छ्रेश्वेदाभिस्यंदि [illegible] रा॥२५॥त्रिकूटंपटुपलंजोरोहंतिचूर्णप्रमर्द्दनैः॥अंगदोषोद्भवे

श्वेतेनंदं कोल द्व्रसंसचचं तथा॥२ [illegible] रातक्षुत्का पथ्यक्षरणात्क द्वृत्तं वचा॥ उद्धूलनं त्रिदोषो छेश्वेदेत्रौ

त्येच नश्यते॥२७॥ श्वेदोद्गमे [illegible] ट्कुलच्छचूर्णनिपातनंनरास्त्रामितिप्रचंति॥ म्लक्फश्वतस्मिन्बहुपिछ

लत्वाच्छीतस्यजंतोः परितः सरत्वात्॥२८॥ श्वेदोल्लाटे हिमवत्नरस्यशीतार्दितस्यपीसुपिछलस्य॥

कंठस्थितोयस्यनयातिवक्ष्यो नूनंयमस्येतिगृहंसमर्त्यः॥२९॥ पित्तकफानिलवश्याद्दशादिवसद्वा

दशाहसप्ताहात्॥ हंतिविमुंचतिपुरुषं त्रिदोषजोधातुमलपाकात्॥३०॥ सप्तमेदिवसेप्राप्तेद

शमेद्वादशेपिवा॥ पुनर्घोरतरोभूत्वाप्रशमंयातिहंतिवा॥३१॥ सप्तमीद्विगुणायावन्नवम्येकादशी

तथा॥ एषात्रिदोषमर्यादामोक्षायचवधायच॥३२॥ सन्निपातेप्रकंपंतंविनयंतंतुयोनरं॥ नोजं

येत्सिसितेः सार्द्धंसवैद्यास्व्यंकथंव्रजेत्॥३३॥ सन्निपातेप्रकंपंतंविलपंतंचयोन्नरं॥ नोजयेत्साप

येच्चापितौचस्यातामुनौकथं॥३४॥ सन्निपातेतुदाहर्त्तंयः सिंचेत्शीतवारिणा॥ अतुरः सकथंजीवे

त्मिषग्वासकथंभवेत्॥३५॥ सन्निपातार्णवेमग्नंयः साधयतिमानवं॥ कस्तेननकृतोधर्मःकांचपू

जांनसोर्हति॥३६॥ म्लक्फनासहयोद्वयंसन्निपातंचिकित्सता॥ यश्चतत्रभवेज्ज्ञेतासज्ञेतामयसं

कुल्ले॥३७॥सन्निपातार्णवेमग्नंयोजीवयतिमानवं॥आत्मपित्तस्यदातव्यः किंपुनःकनकादिकं॥३८॥
सन्निपातज्वरस्यांते कर्णमूले सुदारुणः॥शोथः संजायतेजेन कश्चिदेव प्रमुच्यते॥३९॥रक्तावसेच
नैः पूर्वंसर्प्पिः पानेश्चतंजयेत्॥प्रदेहैः कफपित्तघ्नैःनावनैः कवलग्रहैः॥४०॥रक्तस्रावोजलूकाभि
घृतपानंच युज्यते॥कर्णकग्रंथिनाशाय आयुर्वेद विशारदैः॥४१॥बीजपूरकमूलानिवन्हिमंथस्तथे
वच॥सनागरंदेवदारुरास्नाचित्रकपेषितं॥४२॥प्रलेपेनमिदंश्रेष्टंगलशोफविनाशनं॥कुलथं
फलंसुंठीकारवीचसमांशकैः॥४३॥सुखोष्णंलेपनंकार्यंकर्णमूलेमुहुर्मुहुः॥इंगुदिनिशौलासैंधवं
सुरदारुकुष्टरविदुग्धैः॥दत्तःक्रमेणलेपोहंतिमहाकर्णकग्रंथीं॥४४॥उत्सुम्यांस्फटितांजिह्वांस्त्र
स्तयामधुपिष्टया॥प्रलेपयेघृतंवास्यंसन्निपातात्मकेज्वरे॥४५॥प्रघर्षेज्जिह्वांजजांसिंधुस्त्र्यूषणैः
साम्लवेतसैः॥काकजंघाजटानिद्रांजियेच्छ्यशिरसिस्थिता॥४६॥मातुलिंगरसंतस्यहिंगुसुंठीयु
तंमुखे॥दद्यात्सबोधनंतीक्ष्णंकटुतिक्तोपद्रवंहितं॥४७॥अभिचाराभिशापोत्थैःज्वरैर्होमादिना
जयेत्॥दानस्वस्त्ययनातिथ्यैःपातग्रहपीडितो॥४८॥ओषधीगंधविषजैर्विषपित्तप्रसाधनैः॥

वै.द

जयेत्कषायैर्मतिमान्सर्वेगंध र्नेषकृ॥४९॥ क्रोधजे पित्तजित्काम्या गाथा सद्वाक्यमेव च॥ आश्वास
ष्टलाभेन नयप्रशमनेन च॥ हर्षणैश्च समं याति कामक्रोधनयज्वरः॥ कामक्रोधज्वरे नाशः क्रोधा
त्कामसमुद्भवः॥५०॥ याति ताभ्यामुभाभ्यां तु भयशोकसमुद्भवः॥ भूतविद्यासमुद्दिष्टैर्बंधावेशनताड
नैः॥५१॥ जयद्भूताभिषंगोत्थमनसां रक्षेश्च मानसं॥ निर्दिग्धिकानागरिकामृतानां क्वाथं पिबेन्मिश्रि
रि तपिप्पलीकं॥ जीर्णज्वरारोचककासशूलश्वासाग्निमांद्यार्दितपीनसेषु॥५३॥ हंसरुद्रजानयं प्रायः सायं
तेनोपपुज्यते॥ कासाजीर्णारुचिश्वासहृत्पांडुकृमिरोगनुत्॥५४॥ जीर्णज्वराग्निसादेवासस्यतेमधु
पिप्पली॥ पिप्पलीचूर्णसंयुक्तः क्वाथश्छिन्नोद्भवोद्भवः॥५५॥ जीर्णज्वरकफध्वंसी पंचमूली कृताथ
॥१२॥ वा॥ शिरोगौरवशूलघ्नश्चेंद्रियप्रतिबोधनं॥५६॥ जीर्णज्वरे रुचिकरं दद्यात्सीर्षविरेचनं॥ सन्ततं विष ॥१२॥
मं वापि क्षीणस्य सुचिरोत्थितं॥५७॥ ज्वरसंभोजनैः पथ्यैर्लघुभिः समुपाचरेत्॥ तंडुलीयकवास्तू
कबालमूलकपर्प्पटान्॥५८॥ पटोलममृतापत्रं शाकार्थं दार्विपत्रिका॥ ज्वरक्षीणस्य न हितं वमनं
न विरेचनं॥५९॥ क्षामं तु पयसा तस्य निरूहैर्वा हरेन्मलान्॥ अरोचके गात्रसादे वैवर्ण्यगरलादिषु॥६०॥

शितज्वरे विशोध्यःस्यादनुबंधभयातुरः॥ जीर्णज्वरे कफे क्षीणे क्षीणं स्यादमृतोपमं॥६१॥ तदेव तरु
णे पीतं विषवद्धंतिमानवं॥ कासश्वासाशिरःशूलपार्श्वशूलाश्चिरज्वरात्॥६२॥ मुच्यते ज्वरितः
पीत्वा पंचमूलीशृतं पयः॥ त्रिकंटकबलाव्याघ्रीगुडनागरसाधितं॥६३॥ वर्चोमूत्रविबंधघ्नं शोफ
ज्वरहरं पयः॥ वृश्चिवल्बिल्ववर्षाभूपयश्चोदकमेव च॥६४॥ पचेत्क्षीरावशिष्टं तु तत्तु हि सर्वज्व
रापहं॥ शीतं चोष्णं ज्वरे क्षीरं यथास्वे रोषधैः शृतं॥६५॥ एरंडमूलसिद्धं ज्वरे संपरिकीर्तितं॥
ज्वरिभ्यो बहुदोषेभ्यः ऊर्ध्वं चाधश्च बुद्धिमान्॥६६॥ दद्यात्संशोधनं काले कल्पयेदुपदिश्यते॥ म
दनपिप्पलीभिर्वा कलिंगैर्मधुकेन वा॥६७॥ युक्तमुष्णांबुना पेयं वमनं ज्वरशांतये॥ आरग्वधं वा प
यसा मृद्वीकानां रसेन वा॥६८॥ त्रिवृतां त्रायमाणं वा पयसा ज्वरितः पिबेत्॥ पंचमूलीशृतं क्षीरं
चतुर्गुणजलेन वा॥६९॥ शंखिपागंडिका भिर्वा धारोष्णं वा जरापहं॥ द्रव्यादष्टगुणं क्षीरं क्षीरात्तो
यं चतुर्गुणं॥७०॥ क्षीरावशे[illegible]र्तव्यः क्षीरपाके त्वयं विधिः॥ क्रूराणां ज्वरमुक्तानां मिथ्याहारवि
हारिणां॥७१॥ दोषः स्वल्पोपिस[illegible]द्देहिनामभिलेरितः॥ सततो न्येद्युकत्र्याख्यचातुर्थान् सप्रलाप

सिन्न

पा

कान्॥७२॥कफस्थानविभागेन यासंख्यंकरोतिहि॥अहोरात्रादहोरात्रात्स्थानात्स्थानंप्रपद्यते॥
॥७३॥ततस्त्वामाशयंप्राप्य कुर्याज्ज्वरंनृणां॥समोवातकफौयस्यहीनपित्तस्यदेहिनः॥७४॥
प्रायोरात्रौज्वरस्तस्यदिवाहीनकफस्यवा॥प्रयापकस्तुविषमःप्रायःक्लेशायशोषिणां॥७५॥कलिंग
कापटोलस्यपत्रंकटुकरोहिणी॥पटोलंसारिवामुस्तापाठातिक्तकरोहिणी॥७६॥निंबंपटोलंत्रिफ
लामृद्वीकामुस्तवत्सकौ॥किराततिक्तममृताचंदनंविश्वभेषजं॥७७॥गुडूच्यामलकंमुस्तंअर्द्धश्लो
कसमापनाः॥कषायाःशामयंत्याशुपंचपंचविधंज्वरं॥७८॥अजाजीगुडसंयुक्ताविषमज्वरनाश

॥१३॥

नी॥अग्निसादंजयेत्सम्यक्वातरोगांश्चनाशयेत्॥७९॥गुडगाढांत्रिफलांपिबेद्वाविषमार्दितः॥
गुडूचीमुस्तधात्रीणांकषायंवासमाक्षिकं॥८०॥मुस्तामलकगुडूचीविश्वौषधकंटकारिकाक्वाथः॥

॥१२॥

पीतःसकणाचूर्णःसमधुर्विषमज्वरंहंति॥८१॥प्रातःप्रातःससर्पिर्वारसोनमुपयोजयेत्॥पिप्पली
वर्द्धमानंवा॥पिबेत्क्षीररसाशनः॥८२॥दिनमेकंतुविश्राम्यप्रसेतिसततीयकः॥दिनद्वयंतुविश्राम्य
प्रसेतिसचतुर्थकः॥८३॥कर्मसाधारणंजह्यात्तृतीयकचतुर्थयोः॥अर्स्तस्तोमप्रतिकर्तव्योविशेषोक्तचि

क्षिसितो॥८४॥महौषधामृतामुस्ताचंदनोशीरधान्यकैः॥क्वाथस्तृतीयकं हंति शर्करामधुयोजितः॥८५॥

वासाधात्रीस्थिरादारुधान्यनागरसाधितः॥सितामधुयुतः कुर्याच्चातुर्थकनिवारणं॥८६॥अगस्ति

पत्रस्वरसेन नस्यं निहंति चातुर्थकमुग्रवीर्यं॥कफस्थाने थवातिष्ठन्दोषाद्धित्रिचतुर्भुवा॥८७॥त्रि

रावाधमनीपार्श्वस्कंधसंस्थश्चतुर्थकः॥व्याधयेत्रिकसंस्थातृतीयकहरं भिषक्॥८८॥विपर्यया

कुरुते विषमान्कृछ्रसाधितान्॥८९॥अपामार्गजटाकघालोहितैः सप्ततंतुभिः॥बद्धा वारे रवेः त्री

घ्रं ज्वरं हंति तृतीयकं॥९०॥गंगाया उत्तरे कूले अमुत्र स्तापसोमतः॥तस्मै तिलोदकं दत्वा मुंचत्येकाहि

को ज्वरः॥९१॥अंगवंगकलिंगे षु सौराष्ट्रमगधेषु च॥वाराणस्यां च यद्वृत्तं तदेकाहिक संस्मरः॥अनेन

मंत्रेणाश्वछपत्रहस्तप्रतर्प्पयेत्॥वारान्सप्तसप्त॥सोमं सानुचरं देवं समातृगणमीश्वरः॥पूजयेत्

प्रयतः शीघ्रं मुच्येद्विषमज्वरात्॥९३॥विष्णुसहस्रमूर्द्धानं चराचरपतिं विभुं॥स्तुवन्नामसहस्रेण ज्व

रान्सर्वानपोहति॥९४॥मूलं [illegible]मिजयंत्याश्च सहदेवोद्भवं तथा॥तंदुलेयकमूलं वा बद्धं मूर्ध्नि ज्वरा

पहं॥९५॥ओं नमो रुद्राय कपि[illegible]त्रायनागयोनेः पुत्राय॥त्रिपादभस्मप्रहरण त्रिशिरा रक्तलोचनः॥

म

१५८

समेप्रीतसुखंदद्यात्सर्वामयप्र[illegible]ज्वरः॥९९॥अनेनमंत्रेणपूजांविधायअष्टोत्तरशतंवारंगुग्गुलुगु
टिकांसघृतंहोमयेत्धूपंच॥[illegible]॥एनंमंत्रंत्रिवारंनागवल्लीदलेलिखित्वावीटिकांदेया॥तथाच॥व
ज्रहस्तोमहाकायःवज्रपाणिर्महेश्वरः॥हतोसिब्रह्मदंडेनभूम्यांगच्छमहाज्वरः॥दर्शनेणसर्वेज्वरा
उच्यंते॥९९॥ ॥इतितृतीयकादिज्वराणांविधानं॥ ॥रसोनकल्कंतिलतैलयुक्तंयोऽश्नातिनित्यंवि
षंज्वरार्त्तः॥विमुच्यतेसोथविरज्वरेणवातामयेश्चापिसुघोररूपेः॥२००॥पलंकसानिंबपत्रंवचाकु
ष्टंहरीतकी॥सर्षपाःसयवाःसर्प्पिःधूपनंज्वरनाशनं॥१॥बेडालंचासकृत्तयोऽस्यंवेपमानस्यधू
पनं॥पुरधामवचाचर्म्मनिंबार्क्कामरदारुभिः॥२॥ससुराशीतकेधूपोविषमज्वरनाशनः॥काकज
घाबलास्यामाब्रह्मदंडीकृतांजलिः॥३॥पृष्टिपर्णीह्यपामार्गस्तथाभृंगरजोष्टमः॥एषामन्यतमं
मूलंपुष्येणाधृतस्ययत्नतः॥४॥रक्तसूत्रेणसंवेष्ट्यबद्धमेकाहिकंजयेत्॥सहदेवाक्चाभद्राना
कुलीभिःप्रधूपनं॥५॥प्रदेहोद्वर्त्तनंकुर्यादेभिर्वाज्वरशांतये॥पेतंतैलंधृतंवापिविदारिक्षुरसं
मधुः॥६॥संमूर्छ्यापाययेदेतद्विषमज्वरनाशनं॥पिप्पलीशर्कराक्षोद्रंश्टतंक्षीरंघृतेनवा॥

१५८

खजेन मथितं पेयं विषमज्वरनाशनं ॥ त्रिफलाचूर्णसंयुतं युक्तितः पाययेस्सयः ॥ ८ ॥ क्वथं वापिबे
त्सर्पिः पथ्यां वाभधुनालिहेत् ॥ पयसा वृषदंशस्य सकृद्वेगागमे पिबेत् ॥ ९ ॥ वृषस्य दधिमंडेन सु
रया वापि सैंधवैः ॥ नीलीनीअजगंधा च तत्व दाकटुरोहिणी ॥ १० ॥ पिबेज्ज्वरस्यागमने स्नेहस्वेदोप
पादितः ॥ सुरां समंडां पानार्थं नक्षार्थे चरणायुधान् ॥ ११ ॥ तित्तिरांश्च मयूरांश्च प्रयुंज्याद्विषमज्वरे ॥
आम्लोटक्कसहस्रेण दत्वे सुकृतं पिबेत् ॥ १२ ॥ पेयो घृता प्लुतां जंतुश्चातुर्थक्कज्वरेद्व्यहं ॥ सैंधवं पि
प्पलीनां च तंदुलाः समनःशिलाः ॥ १३ ॥ नेत्रांजनं तैलपिष्टं विषमज्वरनाशनं ॥ व्याघ्रीवचाहिंगुसमा
नस्यं तद्वासैसैंधवं ॥ १४ ॥ कृष्णांबरद्दढाबद्धगुग्गुलूलूकपुछजः ॥ धुपश्चतुर्थकं हंति तमः सूर्य इवोदि
तः ॥ १५ ॥ शिरीषपुष्पस्वरसोऽजनीद्वयसंयुतः ॥ नस्यं सर्प्पिः समायोगाच्चतुर्थकज्वरं जयेत् ॥ १६ ॥
क्रमं साधारणं कुर्यात्तृतीयक्कचतुर्थके ॥ आगंतुरनुबंधो हि प्रायशो विषमज्वरे ॥ १७ ॥ ज्वराः कषायैर्व
मनैर्लंघनैर्लघुभोजनैः ॥ रूक्ष[illegible]येन प्रशाम्यंति सर्प्पिस्तेषां भिषग्जितं ॥ १८ ॥ निर्दशाहमपि ज्ञात्वा
कफोत्तरमलंघितं ॥ न सर्प्पिर्पा[illegible]पलाज्ञः समनेस्तमपान्वरेत् ॥ १९ ॥ यावल्लघुद्दशादिनं दद्यान्मां

सरसेनतु॥ मांसार्थमेणलावादीन् युञ्ज्यादद्याद्विचक्षणः॥२०॥ तित्तिरांश्च मयूरांश्च कुक्कुटान् क्रौंचवर्तका
न्॥ गुरूष्णत्वान्न शंसंति युञ्ज्याद्वा चेच्चिकित्सकः॥२१॥ ज्वरवेगं च कालं च चिंतयन् ज्वरयेत्तु यः॥ तस्य
ष्वैरं द्रुतेर्वापि विषमैर्न नाशायेत्स्मर्ति॥२२॥ लंघनेनानिलबलं ज्वरे यद्यधिकं भवेत्॥ भिषग्मात्राविक
ल्पज्ञ दद्यान्नामपि कालवित्॥२३॥ घृतं द्वादशरात्रात्तु देयं क्षीणकफज्वरे॥ पिप्पलीचंदनं मुस्तमुशी
रं कटुरोहिणी॥२४॥ कलिंगकास्तामलकी सारिवातिविषा स्थिरा॥ द्राक्षामलकबिल्वानि त्रायमाणा
निदिग्धिका॥२५॥ सिद्धमेतद्ध्वंसयेज्जीर्णज्वरमपोहति॥ क्षयं कासं शिरःशूलं पार्श्वशूलमरोचकं
॥२६॥ अंसतापाग्निसादं च विषमं संनियच्छति॥ पिप्पल्याद्यमिदं कापि तंत्रे क्षीरेण पच्यते॥२७॥ यत्रौ
षधकरणं नोक्तं गुणेस्यात्सह संविधौ॥ जलस्नेहौषधानां तु प्रमाणं यत्र नेरितं॥२८॥ कल्कं च तुर्गुणः स्नेहः
॥१५॥ स्नेहात्तोयं चतुर्गुणं॥ क्वाथश्चतुर्गुणं वारि क्वाथः क्वाथसमो मतः॥२९॥ मृदौ चतुर्गुणं दद्यात्कठिने ष्टगुणं ॥१५
तथा॥ कुटिनात्कठिनं यच्च देयं षोडशिकं जलं॥३०॥ मृद्वादि क्वाथसंघाते नानाप्युक्ते चिकित्सकः॥ म कि २
ध्य स्था भयगामित्वादिष्टं त्वष्टगुणं जलं॥३१॥ दशमूले रसे सर्पिः सक्षीरे पंचकोलकैः॥ सक्षीरैर्हंति ना

८

पलि ३

सिद्धं ज्वरश्वासाग्निमांद्यर्त्तां ॥२२॥ वातपित्तकफव्याधिन्प्लीहानं चापि पांडुतां ॥ ॥ द्वशमूलषट्पलकं ॥
घृतं तैलं गुडादींश्च एष्वाहान्नैव साधयेत् ॥२३॥ उषितास्तु प्रकुर्वंति विशेषेण गुणान्यतः ॥ पंचकोलैः
ससिंधूत्थैः पिन्तैः पयसा समं ॥२४॥ सर्पिःप्रस्थं शृतं प्लीहविषमज्वरगुल्मनुत् ॥ षट्पलं घृतं ॥ ॥
अत्र द्रवांतरयुक्ते क्षीरमेव चतुर्गुणं ॥२५॥ द्रवांतरेण योगे हि क्षीरं स्नेहसमं न चेत् ॥ अत्रस्यादोष
धास्नेहः स्नेहात्तोयं चतुर्गुणं ॥२६॥ द्रवकार्येष्वनुक्तेपि सर्वत्र सलिलं स्मृतं ॥ विशालात्रिफलाकौंती
देवदार्वेलकुष्टकं ॥२७॥ स्थिरानंताहरिद्रेद्वे सारिवे द्वे प्रियंगुका ॥ नीलोत्पलैलामंजिष्टादंतीदाडि
मकेसरं ॥२८॥ विडंगं पृष्टिपर्णीच कुष्टं चंदनपद्मकैः ॥ तालीसपत्रं बृहतीमालत्याः कुसुमं नवं ॥२९॥
एतैः कर्षसमैः कल्कैः विंशत्यष्टाभिरेव च ॥ चतुर्गुणं जलं दत्वा घृतप्रस्थं विपाचयेत् ॥३०॥ अपस्मा
रज्वरकासेशोषमंदानलक्षये ॥ वातरक्ते प्रतिश्याये तृतीयकचतुर्थयोः ॥३१॥ छर्द्यर्शोमूत्रकृच्छ्रे च
विसर्पोपहतेषु च ॥ कंडूपांड्वामयोन्मादाविषमेहरतेषु च ॥३२॥ भूतोपहतचित्तानां नराणामल्प
रेतसां ॥ शस्तं स्त्रीणां च वंध्यानां [illegible]न्यमायुर्बलप्रदं ॥३३॥ अलक्ष्मीपापरोगघ्नं सर्वग्रहनिवारणं ॥

कल्याणकमिदं सर्प्पिः शस्तं पुंसवनेषु च ॥४४॥ ॥पानीयकल्याणकमिदं॥ ॥अभ्यंगात्सप्रदेहाश्च
सस्नेहान् सावगाहनान् ॥ विभज्य शीतोष्णकृतान् दद्याज्जीर्णज्वरे भिषक् ॥४५॥ तैराशु हि शमं याति ब
हिर्मार्गगतो ज्वरः ॥ लभंते सुखमंगानि बलं वर्णश्च वर्द्धते ॥४६॥ सुवर्च्चिका नागर कुष्ठ मूर्वा लाक्षा निशा
लोहितयष्टिकाभिः ॥ तैलं ज्वरे षड्गुण तक्रसिद्धमभ्यंजनाच्छीत विदाह नुत्स्यात् ॥४७॥ दध्नः ससारकं तक्रं
स्यात् षट् तक्रे तक्रमिष्यते ॥ षट्तक्रं तैलं स्नेह कल्को यदांगुल्या वर्त्तितो वर्त्तिवद्भवेत् ॥४८॥ वन्हौ क्षिप्ते
च नो शब्दः तदा सिद्धं विनिर्द्दिशेत् ॥ शब्दस्योपरमे प्राप्ते फेनस्योपशमे तथा ॥४९॥ गंध वर्ण रसादीनां सं
पत्तौ सिद्धमादिशेत् ॥ घृतस्यैवं विपक्वस्य जानीयात् कुशलो भिषक् ॥५०॥ फेनोतिमात्रं तैलस्य शेषं
घृतवदादिशेत् ॥ मूर्वा लाक्षा हरिद्रे द्वे मंजिष्ठा सेंद्रवारुणी ॥५१॥ बृहती सैंधवं कुष्टं रास्ना मांसी शतावरी ॥ आरनालाढकेनैव तैलं प्रस्थं विपाचयेत् ॥५२॥ तैलमंगारकं नाम सर्वज्वर विनाशनं ॥ ॥अंगारतैलं॥ ॥ लाक्षा हरिद्रे मंजिष्ठा कल्कैस्तैलं विपाचयेत् ॥५३॥ षड्गुणेनारनालेन दाहशीतज्वरापहं ॥ ॥ लाक्षातैलं॥ ॥ यवचूर्णाद्विकुटकं मंजिष्ठार्द्धपलं तथा ॥५५॥ सर्वकांजिकसंसिद्धं तैलं शीतं बुमर्दितं ॥

१९४ ॥१६॥ ॥१६॥ ४२

२१

ज्वरदाहापहं लेपात्सद्योवातास्रदाहनुत् ॥५६॥ चंदनाद्यमगुर्वाद्यं तैलं चरककीर्तितं ॥ नथानारायणं तै
लं जीर्णज्वरहरं परं ॥५७॥ क्षतानां व्रणितानां च क्षतव्रणचिकित्सया ॥ औषधयो मणयश्च समंत्राः सा
धुगुरुद्विजदैवतपूजाप्रीतिक्रियामनसोविषयाश्च घ्नंत्यपि विष्णुकृतज्वरमुग्रं ॥ सृजेदार्तविषयग्रूषैर्द्वे
तद्द्वेषिणं द्विषं ॥५८॥ चंडं शोकातुरं स्त्रीरूं कृतघ्नं वैधमानिनं ॥ हीनोपकरणं व्यग्रमविधेयं गतायुषं
॥६०॥ चिकित्स्यमानः सम्यग्यो विकारो न निवर्त्तते ॥ प्रक्षीणबलमांसाग्नेर्लक्षणं तद्गतायुषः ॥६१॥
वातपित्तकफाद्भूतसन्निपाताभिचारजः ॥ दिवग्रहप्रकोपाख्यो मानसोऽष्टविधो ज्वरः ॥६२॥ शोकात्क्रो
धात्तथाजीर्णात्संतापाद्बलहानितः ॥ अंतकाले च मर्त्यानां जायंते विविधा ज्वराः ॥६३॥ शीतं दाघोत्र
मः कंपः प्रक्षयो बलतेजसोः ॥ वातिकज्वरचिन्हानि पित्तजो पीतवर्णता ॥६४॥ गात्रेक्षिवेदना दाहः शिरः
पीडा तृषादिकं ॥ प्रथमं जायते दाहः पश्चाच्छीतं च जायते ॥६५॥ निद्रा श्लेष्मज्वरे चिन्हं स्यान्मिश्रं सन्नि
पातजे ॥ असाध्यः स तु विज्ञेयो जायते मानसो ज्वरः ॥६६॥ पुत्रमित्रकलत्राणां धनस्येष्टस्य नाशनः ॥
वियोगेनाथ शोकेन सततं चिंतनेन च ॥६७॥ मंत्रौषधक्रियायोगैरभिचारज्वरो भवेत् ॥ वक्ष्ये रामत

उगेषु देवतायतनेषु च ॥ ६८ ॥ गोब्राह्मणयतीनां च पीडां कुर्वंति ये नराः ॥ तेषां देवप्रकोपेन विज्ञेयो
दैविकोज्वरः ॥ ६९ ॥ ~~तेषां देवप्रकोपेन विज्ञेयो दैविकोज्वरः~~ ॥ अन्येपि विविधाकाराव्यायामाजीर्ण
जंनवा ॥ धातुवैधर्म्यसाधर्म्यैः कायजातास्त्वनेकधा ॥ ७० ॥ निवातसेवनास्वेदाल्लंघनादुष्णवारि
णः ॥ पानादामज्वरे क्षिप्रे पश्चाद्योगः प्रयुज्यते ॥ ७१ ॥ मुस्ताधान्यकसुंठीनां गुडूच्यासह वातिजं ॥
ज्वरं हंति कषायोयं पित्तजं घनपर्प्पटं ॥ ७२ ॥ रोहिणीधान्यकोशीरसुंठीमुस्ताकषायतः ॥ ज्वराः
सर्वे विनश्यंति वन्हिर्दीप्तोभिजायते ॥ ७३ ॥ छिन्नोद्भवाघनाविश्वानूनिंबक्वथितं जलं ॥ पीतं हं
ति ज्वरं रौद्रं वन्हिमुद्दीपयत्यपि ॥ ७४ ॥ हिमंकुष्टं मुरापाठा बृहतीक्वथितं जलं ॥ गुडूचीधान्यकं

१७॥

निंबपटोलं त्रिफलाघनः ॥ ७५ ॥ शर्करामधुसंयुक्तः कषायो हंति पानतः ॥ वातपित्तकफोद्भूतं

२३

ज्वरं पथ्याग्निनः परं ॥ ७६ ॥ पथ्यावन्हिकणाधात्रीफलं चूर्णं समांशतः ॥ युक्तं हंति ज्वरं कासं सद्युधातु

॥१७॥

द्दीपयत्यपि ॥ ७७ ॥ ॥ दीपनमुत्तमं ॥ ॥ बिल्वसुंठीमृणालानां श्लेष्मिकघनवासकं ॥ धान्यका
न्वितसुंठीनां सर्वान्वासुंठीपर्प्पटं ॥ ७८ ॥ शिवाधान्यकमुस्ताभिः गुडूचीकुष्टपर्प्पटैः ॥ क्वाथोमधु

युतः प्रीतः समस्तज्वरनाशनः ॥७९॥ भूनिंबामलयंद्राक्षावासकः कृतमालकः ॥ धान्यकंक्वथितंतो
यंएभिर्ज्वरविनाशनं ॥८०॥ देवदारुनिशानिंबरोहिणीत्रिफलाघनः ॥ पटोलिशास्पतेक्वाथः सन्नि
पातेतिदारुणे ॥८१॥ बृहत्कंटकारीकृणासुंठीगुडूचीक्वाथपानतः ॥ कासंश्वासंज्वरंस्थूलंमंदाग्निंपी
नसोन्नजेत् ॥८२॥ गुडूचीपुष्करंविश्वाकंटकारीयुतंजलं ॥ क्वथितंखुरखुणंकाशंसन्निपातंनिहंति
च ॥८३॥ सठीपुष्करमूलंचगुडूचीविश्वभेषजं ॥ त्रिकटुकंत्रायमाणंपिप्पलीसदुरालभा ॥८४॥
व्याघ्रीपर्पटकंरास्नामभयांकटुरोहिणीं ॥ देवदारुचभार्गीचसमभागानिकारयेत् ॥८५॥ बृह
त्सष्ट्यादिकोह्येषसन्निपातज्वरापहः ॥ कासंश्वासंदिवानिद्रांरात्रौजागरणंतथा ॥८६॥ मुखशो
षंतृष्णादाहंकषायंकंत्रामयस्यपि ॥ पित्तोत्कटेसन्निपातेहितंचोक्तंमनीषिभिः ॥८७॥ क्षुद्राम्
ताभ्यांसहनागरेणसपौष्करंचैवकिराततिक्तं ॥ पिबेत्कषायंननुविपंचतिक्तंज्वरंनिहंत्यष्टविधं
समस्तं ॥८८॥ दशमूलस्यनिःक्वाथेकंकोलादिगणःस्मृतः ॥ तुल्यार्द्रकरसोपेतोमध्वेकल्पंज्वरं
जयेत् ॥८९॥ दशमूलंसठीभृंगीपोष्करंदारुवासकं ॥ भार्गीपटोलशंकालाःतिक्ताचातिकषायकः ॥

॥१८॥

॥९०॥ एकोनाविंशतिक्काथः सन्निपातज्वरापहः॥ एकमेव प्रशंसंति चरकाद्या महर्षयः॥९१॥ कुष्ठामृ
छस्यजौ च क्काथस्त्रिदोषज्वरनाशनः॥ हरिद्रा भद्रमुस्तं च त्रिफला कटुरोहिणी॥९२॥ पिचुमंदः पटोली
च देवदारु निदिग्धीका॥ एषां कषायः पीतस्तु सन्निपातज्वरं जयेत्॥९३॥ अविपक्कं प्रसेकं च शोफं
कासमरोचकं॥ टंकं कार्यमृता भार्गी नागरं द्रयवासकं॥९४॥ मुनिंब चंदनं मुस्तं पटोलं कटुरोहिणी॥
कषायं पाययेदेनं पित्तश्लेष्मज्वरापहं॥९५॥ दाहतृष्णारुचिच्छर्दिकासहृत्पार्श्वशूलजित्॥ किं
किरमालः शिवा सुंठी घनो रोहिणि पिप्पली॥९६॥ मूलमेतत्कषायेण वातश्लेष्मज्वरं जयेत्॥ पर्प्पट
श्वेतकी मुस्ता रोहिणी किरमालकं॥९७॥ द्राक्षाक्काथः तृषामूर्छादाहभ्रमज्वरापहः॥ विश्वामलयजं कु
ष्टं मुस्ता पर्प्पट वालुकं॥९८॥ ज्वरं दाहं तृषां मूर्छां एतत्क्काथो निहंति वा॥ कृसरकणामध्वाप्यासेयुक्तं
युक्तितः पाययेत्सयः॥९९॥ शाम्यंति श्वासहृद्रोगप्रलापविषमज्वराः॥ गोमयस्य रसोपेतं गोमया वा
धविश्वया॥१००॥ पक्वं पीतमजाक्षीरं विषमज्वरनाशनं॥ नागरं देवदारुश्च धान्यकं बृहतीद्व
ये॥१॥ एरंडक्काथस्य पानेन याति दाहज्वरः शमं॥ गुडूची त्रिफला वृक्ष्व गंधजालं निवारिणा॥२॥ पिष्ठां
नत१

गमस्तकेलेपश्चूत्तपित्तज्वरापहः॥उदंबरशिफाच्छिन्नवल्का त्वंसितयान्वितं॥३॥पीतंपित्तज्वरंहंति
पटोल्याचाशिफाजलं॥जातिपर्प्पटनिर्यासःसितयाहंतिपानतः॥४॥दाहज्वरंमहारौद्रदुःखंधा
नोपघेस्वरः॥पुष्यवल्कचतुर्द्दश्यांदग्धाप्रेतमुखेघटी॥५॥ज्वरंकरोतिलेपेनलेपेनप्रशमोभवेत्॥
कर्णेबद्धारवौश्वेततुरंगारिपुमूलिका॥६॥सर्वज्वरहराश्वेतमंदारस्यचैरस्यचमूलिका॥हस्तेबद्धा
रवौनिस्संज्वरंहंतिपुष्पूपिकः॥७॥सर्वज्वरहरानीलीमूलंरात्रीज्वरापहं॥काचमाचीशिफाकर्णेबद्धा
रात्रिज्वरापहा॥८॥चिरपोटीजटाहस्तेविषमज्वरनाशनी॥त्रिसंध्यामूलिकापाणौबद्धाहंतिमहा
ज्वरं॥९॥कदंबशिफाकर्णेरात्रिज्वरविनाशकृत्॥दुग्धिकामूलिकाकर्णेहंतिवेलाज्वरंतथा
॥१०॥भृंगराजजटाबद्धाकरेरात्रिज्वरापहा॥१०॥पटोलयष्टीमधुतिक्तरोहिणीघनाभयाभिर्विष
मज्वरापहः॥क्वाथः कषायःस्त्रिफलाम्जावषोपथक्पथक्वाविषमज्वरापहः॥११॥क्वाथश्छि
न्नरुहायश्चपिप्पलीचूर्णसंयुतः॥पीतोरात्रीज्वरंहंतिशुष्कंवृक्षमिवाशनिः॥१२॥अपामार्गज
टाकट्यांलोहितैःसप्ततंतुभिः॥बद्धावाररवेःशीघ्रंज्वरंहंतितृतीयकं॥१३॥तृतीयकंज्वरंहंति

गंडादिगलके स्थितं ॥ श्मशान दुग्धिका मूलं शिखास्थं सततं ज्वरं ॥ १४ ॥ कन्याकर्तितसूत्रेण बद्धापामार्गमूलिका ॥ एकाहिकं ज्वरं हंति शिखायामतिवेगतः ॥ १५ ॥ पञ्चखा निंब पत्रं वचा कुष्टं हरितकी ॥ सर्षपाः सयवा सर्पिर्धूपनं विषमज्वरे ॥ सोमं सानुचरं देवं समातृगणमीश्वरं ॥ पूजयन् प्रयतः शीघ्रं मुच्यते विषमज्वरान् ॥ १७ ॥ निर्गुंडीपत्रचूर्णं तु विषमज्वरनाशनं ॥ मंत्रेण मंत्रितं कृत्वा सप्तवारान् सुरेश्वरि ॥ १८ ॥ मंत्रः ॥ ॐ ह्रीं क्रौं हुं फट् स्वाहा ॥ नवद्वंद्व पंचनाशायेत ॥ मंत्रभेषजयोर्यत्र साफल्यं नैव दृश्यते ॥ तत्र नक्षत्रजां पीडां जानीयात् कुशलो भिषक् ॥ २० ॥ ज्योतिःशास्त्रैश्च नक्षत्रं वधिपिडं विधायच ॥ नक्षत्रविधानं कार्यं ततस्तत्तीयकज्वरेच ॥ २१ ॥ ॐ नमो रुद्राय कपिलपिंगलनेत्राय नगयोरनः पुत्राय त्रिपादस्त्रप्रहणास्त्रिशिरामैरक्तलोचनः ॥ स मे प्रीतः सुखं दद्यात् सर्वामयपतिर्ज्वरः ॥ २४ ॥ महाहवे तव मम चद्वयोरिमं पराक्रमं भुंजवत्कलेत्रावास्त्रयोः ॥ प्रणम्य मा विमनसः स्मरंति येन चंति ते ज्वरविगतज्वरा नराः ॥ २३ ॥ नां द्यंतु यं तं कवयः पुराणाः सूक्ष्माः वहंतो ह्यनुशासितारः ॥ सर्वान्ज्वरान्घ्नंतु ममानिरुद्ध प्रद्युम्न संकर्षण वासुदेवाः ॥ २४ ॥ अंगवंगकलिंगेषु सौराष्ट्र मगधेषु च ॥ वाराणस्यां

१७ ॥

॥ १७ ॥

चयच्छंतं तन्न स्मरसि नोज्वरः ॥२५॥ योसौ सरस्वतीतीरे अपुत्रास्तपसोम्भसः ॥ तस्मै तिलोदकं दद्यामुं
चत्ये काहिको ज्वरः ॥२६॥ एकाहिकं द्व्याहिकं च तथा त्रिदिवसज्वरं ॥ चातुर्थिकं तथात्युग्रं तथैव सततं
ज्वरं ॥२७॥ दोषोद्भवं सन्निपातोद्भवं तथैवागंतुकज्वरं ॥ शमं नयं तु गोविंद छिंधि छिंध्यस्य वेदनं ॥२८॥
अश्वत्थे शालिग्रामं पूज्य दुग्धतिलोदकैः ॥ कृततर्प्पणे नैव सर्वे ज्वराः प्रीतिमेत्य देहं न्यो गच्छंति

ग.५

॥२९॥ देहो लघुर्व्यपगतक्लममोहतापः पाको मुखे करणसौष्ठवमव्यथत्वं । स्वेदः क्षवः प्रकृतियोनिम
नोन्नलिप्सा कंडूश्च मूर्ध्नि विगतज्वरलक्षणानि ॥३१॥ नजातु स्नपयेत्साज्ञः सहसा ज्वरकर्षितं ॥ तेन
संधुक्षितो ह्यस्य पुनरेव भवेज्ज्वरः ॥३२॥ व्यायामं च व्यवायं च स्नानं चंक्रमणानि च ॥ ज्वरमुक्तो न सेवे
त यावन्न बलवान् भवेत् ॥३३॥ अन्नाकांक्षा क्षाशिरः कंडू क्षवथू र्लाघवं ॥ प्रस्वेदो मुखपाकश्च
ज्वरमुक्तस्य लक्षणं ॥३४॥ दाहस्वेदोन्नमस्त्रक्षाकंपोविड्भेदसंज्ञिता ॥ कूजनं चाप्ति वैगंध्यमाकृतिर्ज्व
रमोक्षणे ॥३५॥ स्वेदो लघुत्वं शिरसः कंडू पाको मुखस्य च ॥ क्षवथुश्चान्नकांक्षा च ज्वरमुक्तस्य लक्षणं
॥३६॥ ॥ इति श्री आयुर्वेदमहोदधौ श्रीवृंदचिकित्सिते ज्वरचिकित्सा प्रथमोऽध्यायः ॥१॥ ॥ ॥

प्यगुक्तं निदानेनज्वरातीसारनिर्णयः॥ कर्तव्यो भिषजा चात्र तत्क्रमेण विधिर्यतः॥२७॥ ज्वरातीसारयोरुक्तं भेषजं यत्पृथक्पृथक्॥ न तन्मिलितयो कार्यमन्योन्यं वर्द्धयत्यपि॥२८॥ अतस्तौ प्रकुर्वीत विशेषादिति भेषजैः॥ लंघनं तु नयोरुक्तं मिलिते कार्यविशेषतः॥२९॥ ज्वरातिसारे पेयादिः क्रमः स्याल्लंघिते हितः॥ उत्पलषष्टक सिद्धं लाजामंडादिकं सरी॥३०॥ ज्वरातिरीसा पेयांच पिबेत्साब्दांस्रतां नरः॥ पृश्निपर्णीबलाबिल्वनागरोत्पलधान्यकैः॥३१॥ ॥उत्पलषष्टः॥ ॥नागरातिविषामुस्ताभूनिंबामृतवत्सकैः॥ सर्वज्वरहरः क्वाथः सर्वातिसारनाशनः॥३२॥ नागरं देवदारु श्च धान्यकं बृहतीद्वयं॥ दद्यात्साचनकं पूर्वं ज्वरितापज्वरापहं॥३३॥ पाठेंद्रयवभूनिंबमुस्तपर्पटकामृता॥ जयंत्याममतीसारं सज्वरं समहौषधीः॥३४॥ ह्रीवेरातिविषामुस्ताबिल्वनागरधान्यकैः॥ पिबेत्पिछाविबंधघ्नं शूलदोषामपाचनं॥३५॥ सरक्तं हंत्यतिसारं सज्वरं वाथ विज्वरं॥ ह्रीवेरादि॥ ॥ह्रीवेरशृंगवेलाभ्यां मुस्तापर्पटकेन वा॥ मुस्तोदीच्यशृतं तोयं देयं वापि पिपासिते॥ गुडूच्यतिविषाधान्यसुंठीबिल्वाब्दबालकैः॥३६॥ पाठाभूनिंबकुटजैश्चंदनोशीरपद्मकैः॥ कषायः शीतलः पेयो ज्वरातीसारशां

नयेत्॥४८॥हृल्लासारोचकच्छर्दिपिपासादाहनाशनः॥ ॥गुडूच्यादिः॥ ॥उशीरं बालकं मुस्तं भूनिंबं
विश्वभेषजं॥समंगा धातकी लोध्रं बिल्वं दीपनपाचनं॥हंत्यरोचकपिच्छामं विबंधं सातिवेदनं॥५०॥स
शोणितमतीसारं सज्वरं वाप्यविज्वरं॥पंचमूलीबलाबिल्वगुडूचीमुस्तनागरैः॥५१॥पाठाभूनिंबह्री
बेरकुटजत्वक्फलैः सत्वं॥हंति सर्वातिसारांश्च ज्वरदोषं वमिं तथा॥५२॥सशूलोपद्रवं श्वासं कासं
हन्याच्च सुदारुणं॥पंचमूलीति सामान्यायोज्या पित्ते कनीयसी॥५३॥कलिंगातिविषाबिल्वह्रीबेरा
तांबुयवासकं॥ज्वरातिसारसंतापनाशयेदविकल्पतः॥५४॥वत्सकस्य फलं दारु रोहिणी गजपिप्प
ली॥श्वदंष्ट्रा पिप्पली धान्यं बिल्वं पाठा यवानिका॥५५॥द्वावप्येतौ सिद्धयोगौ श्लोकार्द्धेनाभिनाषितौ॥
ज्वरातिसारशमनौ विशेषाद्दाहनाशनौ॥५६॥उत्पलं दाडिमं त्वक्कं पद्मकेसरमेव च॥पिबेत्तंदुलतोय
न ज्वरातीसारनाशनं॥५७॥नागरामृतभूनिंबबिल्ववासकवत्सकैः॥समुस्तातिविषोशीरैर्ज्वरा
तिसारहृज्जलं॥५८॥मुस्तकबिल्वातिविषापाठाभूनिंबवत्सकैः क्वाथः॥मकरंदगर्भयुक्तो ज्वराति
सारो जयेद्घोरो॥५९॥ घनजलपाठातिविषापथ्योत्पलधान्यरोहिणीविश्वैः॥इंद्रजवैः श्रुतमंभः

सातिसारं जयति॥६०॥कट्वंगबिल्वजंब्वाम्रकपित्थं सरसांजनं॥लाक्षाहरिद्रेन्हीवेरं कट्फलं शुकना
सिका॥६१॥रोध्रं मोचरसं शंखं धातुकीवटशुंगकं॥पिष्ट्वा तंदुलतोयेन वटकान् अक्षसंमितान्॥६२॥
छायाशुष्कान् पिबेच्छिप्रं ज्वरातीसारशांतये॥रक्तप्रसादनाह्येतेन्मूलातीसारनाशनः॥६३॥व्योषं
वत्सकबीजं च निंबभूनिंबमार्कवं॥चित्रकं रोहिणीपाठां दार्वीमतिविषां समां॥६४॥श्लक्ष्णचूर्णिकृ
तान् सर्वान् तत्तुल्यं वत्सकत्वचं॥सर्वमेकत्र संयुज्य प्रपिबेत्तंदुलांबुना॥६५॥सक्षौद्रं वा लिहेदेतत्पा
चनं ग्राहि भेषजं॥तृष्णारुचिप्रशमनं ज्वरातीसारनाशनं॥६६॥कामलाग्रहणीदोषान् गुल्मं प्लीहान
मेव च॥प्रमेहं पांडुरोगं च श्वयथुं च विनाशयेत्॥६७॥दशमूलीकषायेण विश्वमक्षसमं पिबेत्॥
॥२१॥ ज्वरे चैवातिसारे च सशोफे ग्रहणीगदे॥६८॥किराताब्दामृता विश्वा चंदनोदीच्यवत्सकैः॥शोफाति ॥२१॥
सारशमनं विशेषाज्ज्वरनाशनं॥६९॥माकंदजंबूबदरीगुडूचीम्लेच्छांतधात्रीकलुजारलूनां॥सत्व॥
ल्मलीनां कुटजस्य वल्लिगणप्रमाणापरभेषजानां॥पलंपलं गर्गरिमाननीरैर्निःक्वाथ्य कर्षद्वित
येन सम्यक्॥उत्तार्य विश्वातिविषाविडंगमोचोपकुंचीरुचकं किरातात्॥एकैकगद्याणकमानचूर्णं

मध्येविनिक्षिप्यविधायलेहं॥ज्वरातिसारार्दितसानवस्यलाक्षार्द्रनागंमधुनाविमिश्रं॥ज्वरातिसा
रेग्रहणीगुदामरक्तोद्भवेषुप्रबलेषुदेयं॥त्रिरात्रमध्यावपिनिम्नगायाःपयःप्रवाहःखलुरोधमे
ति॥ ॥इतिगंगाधरयोगःसप्तकः॥ ॥इतिज्वरातिसारचिकित्सायांद्वितीयोध्यायः॥ ॥अथातीसा
रचिकित्सितंव्याख्यास्यामः॥ ॥लंघनमेकंमुक्त्वानान्यदस्तीहभेषजंबलिनः॥समुदीर्णदोषचयं
शमयतितस्यांसाचयस्यपि॥७०॥धान्योदीच्यस्ततंतोयंतस्मादाहातिसारिणे॥ह्रीवेरसृंगवेराभ्यांमु
स्तपर्पटकेनवा॥७१॥मुस्तोदीच्यशृतंतोयंदेयंवापिपिपासिते॥युक्तेन्नकालेक्षुत्क्षामंलघून्यन्नानि
भोजयेत्॥७२॥शालिपर्ण्यादिसिद्धेनसाधितेनससिंधुजं॥मसूरजेनयूषेणपथ्यंस्याल्लाजसक्तु
भिः॥७३॥गुर्वीपीजीरवरास्यर्थंलघ्वीसेचविपर्ययात्॥शक्तुनामाशुजीर्यंतमृदुत्वादवलेहिका॥७४॥
लाजामंडकृतेयेगिःस्तेःकृताहस्तमंडिका॥वस्त्रस्रतायवागुर्वाप्रश्रवक्त्रद्रसक्तुकं॥७५॥सुनिष्प
ण्णकचात्र्त्रिकंचठहंतिमुच्यते॥शाकमांसफलैर्युक्ताविलेप्यस्ताश्चदुर्जराः॥७६॥शालिपर्णीपृश्निपर्णी
बृहतीकंटकारिका॥बलाश्वदंष्ट्राबिल्वाग्निपाठानागरधान्यकं॥७७॥एतदाहारसंयोगेहितंस

ह्र३

वातिसारिणां॥ बृहच्छालिपर्ण्यादि॥ शालिपर्णीबलाबिल्वपृष्टिपर्ण्याचसाधिता॥७८॥ दाडिमा
म्लाहितापेयपित्तश्लेष्मविकारिणां॥ लघुनापंचमूलेनवातेपित्तेप्रशस्यते॥७९॥ धान्यपंचकसि
द्धोवाधान्यविश्वकृतोथवा॥ आहारेभिषजायोज्योवातश्लेष्मातिसारिणां॥८०॥ आमपक्वक्रमंहित्वाना
तिसारेक्रियायतः॥ अतःसर्वातिसारेषुज्ञेयाःपक्वामलक्षणं॥८१॥ ज्ञोमेस्यामाकुरुत्वाच्चाविद्यत्का
ष्ठुवत्तेजले॥ विवातिम्लवसंघातत्रैल्यश्लेष्मप्रदूषणात्॥८२॥ शारदुर्गंधिनाटोपविष्टंभार्त्तिःप्रसेकि
नः॥ विपरीतंनिरामंतुकफात्सक्कंतुमज्जति॥८३॥ नामेसंग्रहणंदद्यादतीसारेकथंचन॥ अकालेसं
ग्रहणीतोहिविकारानकुरुतेबहून्॥८४॥ शोफपांड्वामयप्लीहकुष्टगुल्मोदरज्वरान्॥ दंडकालसक
ध्मानग्रहण्यर्शोगदास्तथा॥८५॥ क्षीणधातुबलार्तस्यबहुदोषोतिनिःश्रुतः॥ आमोपिस्तंभनीयः
स्यात्॥ पाचनान्मरणंभवेत्॥८६॥ जठरानलदौर्बल्यादपक्वोयोभवेद्रसः॥ सएवमूलरोगाणामा
मइत्यभिधीयते॥८७॥ स्तोकंस्तोकंविबद्धंपुरीषंयोतिसार्यते॥ अनयापिप्पलीकल्कैःसुखोष्णैस्तं
विरेचयेत्॥८८॥ हरिद्राद्यंवावचाद्यंवापिबेदामेषुबुद्धिमान्॥ षडंगयूषयवागूंचपिप्पल्यादिप्रयो

॥२२॥

॥२२॥

जयेत्॥८९॥ धान्यकं नागरं मुस्तं बालकं बिल्वमेव च॥ आमशूलविबंधघ्नं पाचनं वह्निदीपनं॥९०॥
॥धान्यपंचकं॥ ॥पित्ते धान्यचतुष्कं च शुंठीं त्यागाद्वदंति हि॥ पिप्पलीनागरं धान्यं भूतीकमनयाव
चा॥९१॥ ह्रीबेरभद्रमुस्तानि बिल्वनागरधान्यकं॥ पृश्निपर्णी श्वदंष्ट्रा च समंगा कंटकारिका॥९२॥ ति
स्त्रः प्रमथ्या विहिताम्लोक्ता दीपनी सारिणां॥ कफे पित्ते च वाते च क्रमादेताः प्रकीर्तिताः॥९३॥ संज्ञा प्रम
थ्या ज्ञातव्या योगे दीपनपाचने॥ त्र्यूषणातिविषाहिंगुवचासौवर्चलाभया॥९४॥ पीत्वोष्णेनांभसा
हन्यादामातीसारमुद्धतं॥ अथवा पिप्पलीमूलं पिप्पलीद्वयचित्रकाः॥९५॥ सौवर्चलवचाव्योषहिं
गुप्रतिविषाभया॥ पिबेच्छ्लेष्मातिसारार्तश्चूर्णितान्वोष्णवारिणा॥९६॥ कपित्थतक्रचांगेरीमरिचा
जातिचित्रकैः॥ सुपक्वः षडयूषोयं अयं कांबलिको मतः॥९७॥ दध्याम्लो लवणैः स्नेहतिलमाषसमन्वि
तः॥ नागरातिविषामुस्तैरथवा धान्यनागरैः॥९८॥ तृष्णाशूलातिसारघ्नं पाचनं दीपनं लघु॥ पाठावत्स
कबीजानि हरीतक्यो महौषधं॥९९॥ एतदामसमुत्थानमतीसारं सवेदनं॥ कफात्मकं सपित्तं च वर्चो
बध्नाति च ध्रुवं॥१००॥ देवदारुवचामुस्तानागरातिविषाभया॥ सर्वाः स्जीर्णमन्नामनं पेयमेतैः शृतं

जलं॥१॥ श्वदंष्ट्रैरंड धान्याम्लयवपुष्करसाधिता॥ पथ्यामधुयुतालीढा श्रूलामयंथिनात्रानं॥३॥ कृ
पित्थबिल्वचांगेरीतक्रदाडिमसाधिता॥ पाचनीग्राहिणीपेयासवाते पंचमूलकैः॥३॥ दध्यम्लस्नेहल
वणतिलमाषसमन्वितः॥ यूषकांबलिकोज्ञेयोवातघ्नोबलवर्णकृत्॥४॥ पयस्यूक्तकाध्यमुस्तानां विंशति
नंदस्ताकृया॥ क्षीरावसिष्टंतसीतंहन्यादामंसवेदनं॥५॥ पक्कस्तद्वदतीसारो ग्रहणीमार्द्दवाद्यदा॥
प्रवर्तते तदाकार्यः क्षिप्रंसांग्राहिकोविधिः॥६॥ पंचमूलीबलाविश्वधान्यकोसलबिल्वजा॥ वातादि
सारिणेदेयस्तत्रेणानयतमेनवा॥७॥ कंचटदाडिमजंबूश्रृंगाटकबिंन्हीवेरं॥ जलधरनागरसहितं त्व६
गामपिवाहिनीरुध्यात्॥८॥ कल्वालवालधूंसुदृढंपिष्टैरामलकैर्भिषक्॥ आर्द्रकस्वरसेनाम्रपूर
॥२३॥ येन्नाभिमंडलं॥९॥ नदीवेगोपमंघोरमतीसारंनिवारयेत्॥ किराततिक्तकंमुस्तंवत्सकंसरसांजनं ॥२३॥
॥१०॥ पिबेस्सिक्तातिसारघ्नंसपित्तंजटरामयी॥ मधुकंकटफलंरोध्रंदाडिमस्यफलंत्वचः॥१२॥ पित्ताति
सारेमध्वक्तंपाययेत्तंदुलांबुना॥ कुटजातिविषामुस्ताहरिद्रापर्णिनीद्वयं॥१३॥ सक्षोद्रशर्करंवास्तं
पित्तश्लेष्मातिसारिणां कुटजत्वकूफलंमुस्तंक्काथयित्वापिबेज्जलं॥१४॥ अतीसारंजयेदाशुशर्करा

मधुयोजितं॥ बिल्वचूतास्थिनिर्यूहः पीतः सक्षौद्रशर्करः॥१५॥ निहन्याच्छर्द्यतीसारं वैश्वानर इवाहुतिं॥
प्रियंग्वंजनमुस्ताख्यं पाययेत यथाबलं॥१६॥ तृष्णातिसारच्छर्दिघ्नं सक्षौद्रं तंदुलांबुना॥ पटोलय
वधान्याकः क्वाथः पेयः सुशीतलः॥१७॥ शार्करामधुसंयुक्तः छर्द्यतीसारनाशनः॥ कलिंगकवचामुस्त
दारुच्यातिविषासमं॥१८॥ कल्कं तंदुलतोयेन पिबेत्पित्तानिलामयी॥ कुटजं दाडिमं मुस्तं धातुकी बिल्व
वालुकं॥१९॥ रोध्रचंदनपाठानां कषायं मधुना पिबेत्॥ सामे शूले च रक्ते च पिच्छाये वच शस्यते॥२०॥
कुटजादिरिति ख्यातः सर्वातीसारनाशनः॥ समंगातिविषा बिल्वं विश्वं ह्रीवेर धातुकी॥२१॥ कुटजा
त्वक् फलं मुस्तं क्वाथः सर्वातिसारजित्॥ श्लेष्मातिसारे प्रथमं हितं लंघनपाचनं॥२२॥ योज्यश्चामाति
सारघ्नो यथा तो दीपनो गणः॥ दलो ह्रस्वः स्वरसः पीतो निचुलस्य समाक्षिकः॥२३॥ जयत्यामममतिसा
रं क्वाथो वा कुटजत्वचः॥ वटप्ररोहं सपिष्ट्वाम्लक्ष्णं तंदुलवारिणा॥२४॥ पिबेत्तक्रेण संयुक्तमतीसार
रुजापहं॥ तंदुलांजलपिष्टं शोम्लत्वकर्षार्द्धमाममपहरति॥२५॥ सर्वातिसारग्रहणीरोगसमूहं
महाघोरं॥ कल्कः श्रीमलर्बबूलातद्दलस्सीतोतिसारहा॥२६॥ कुटजत्वक्कृतः क्वाथो घनीभूतः सुशी॥

मनः॥ लेहितोतिविषायुक्तः सर्वातीसारनुद्भवेत्॥२७॥ लेहोयत्रासिनप्रोक्तनिर्दिशेद्दवकल्कयोः॥
तत्रापिपादिकं कल्कोद्रवात्कार्यो विजानता॥२८॥ इत्थं पत्राष्टमांशेनक्वाथादतिविषारजः॥ सदार्व्यंत्रे
ठमूलानांमूलं त्वक्कुटजस्यच॥२९॥ शाल्मलीसारनिर्यासं धातकीरोध्रदाडिमां॥ पिष्ट्वाक्षसम्मितान्
दत्वापिबेत्तंदुलवारिणा॥३०॥ तेनैवमधुनायुक्तान्नैकैकान्मात्रास्थितः॥ पिबेदत्ययमापन्नो विद्धिस
र्गेणमानवः॥३१॥ अंकोठवटकानाम्नासर्वातीसारनाशना॥ पलमंकोटमूलस्यपेयंदार्वीचतत्समं
॥३२॥ पिष्ट्वातंदुलतोयेनवटकान्तसंम्मितान्॥ छायाशुष्कान्पिबेत्क्षिप्रंपिष्ट्वातंदुलवारिणा॥३३॥

।२८।

वातपित्तकफप्रायान्द्वंद्वजान्संनिपातजान्॥ हन्यात्सर्वातिसारांश्चगुटिकेयंप्रयोजिता॥३४॥ पय
स्यहेदिकेछागेन्क्षीवेरोत्सलनागरैः॥ पेयासर्वातिसारघ्नी पृश्निपर्ण्याचसाधिता॥३५॥ रसांजनंसा
तिविषंकुटजस्यफलंत्वचं॥ धातकीशृंगवेरंचपिबेत्तंदुलवारिणा॥३६॥ क्षौद्रेणयुक्तंनुदतिपित्तासो गै
रमुल्वणं॥ मंदंदीपयतेचाग्निंशूलंचाशुनिस्तयेत्॥३७॥ विडंगातिविषामुस्तंदारुपाठाकलिंगकं॥
मिरिचेनसमायुक्तंशोफातीसारनाशनं॥३८॥ कषायोमधुनापीतःत्वचोदाडिमवत्सकात्॥ सद्योज

॥२८।

यदतिसारं रक्तजं दुर्निवारकं ॥३९॥ गुडेन खादयेद्बिल्वं रक्तातीसारनाशनं ॥ आमशूलविबंधघ्नं कुक्षि
रोगविनाशनं ॥४०॥ शल्लकीबदरीजंबूप्रियालाम्रार्जुनत्वचः ॥ पीताः क्षीरेण मध्वाढ्याः पृथक् शोणित
वारणाः ॥४१॥ पीत्वा शतावरीकल्कं पयसा क्षीरभुक् जयेत् ॥ रक्तातीसारं पीत्वा वा तथा सिद्धं घृतं नरः ॥४२॥
मुस्ता सवत्सकः सातिविषः सबिल्वः सोदीच्यश्च कृतः कषायः ॥ सामे च शूले च सशोणिते च चिरप्रवृत्तेपि
हितोतिसारे ॥४३॥ ॥ वत्सकादि ॥ ॥ बिल्वाब्दधातकीपाठाशुंठीमोचरसाः समाः ॥ पीता रुंध्यादती
सारं गुडतक्रेण दुर्जयं ॥४४॥ जंब्वाम्रामलकीनां तु पर्णान्युत्थ प्रकुट्टयेत् ॥ संगृह्य स्वरसं तेषां मजाक्षी
रेण योजयेत् ॥४५॥ तत्पिबेन्मधुना युक्तं रक्तातीसारनाशनं ॥ बिल्वं छागपयः सिद्धं सितामोचरसान्वि
तं ॥४६॥ कलिंगचूर्णसंयुक्तं रक्तातीसारनाशनं ॥ ज्येष्टांबुना तंदुलीयं पीतं च ससितं मधु ॥४७॥ कुटज
स्य पलं गृह्य अष्टभागे जलं स्रुतं ॥ तथैव विपचेद्भूयो दाडिमोदकसंयुतं ॥४८॥ यावच्चैव लसीकानं शी
तं तमुपकल्पयेत् ॥ तस्यार्द्धकर्षं तक्रेण पिबेद्रक्तातिसारवान् ॥४९॥ अवश्यं मरणीयोपि न मर्त्योर्घाति
गोचरं ॥ कृष्णामृन्मधुकं शंखं रुधिरं तंदुलोदकं ॥५०॥ पीतमेकत्र सक्षौद्रं रक्तसंग्रहणं परं ॥ क्वाथतुल्यं

दाडिमांबुविभागोनुक्तोपिसमंयतः॥५१॥कल्कस्तिलानांकृष्णानांशर्कराभागसंयुतः॥अजेनपयसा
पीतंसद्योरक्तंनियच्छति॥५२॥गुदपाकेप्रदाहेवापटोलमधूकांबुनां॥सेकादिकंप्रशंसंतिछागेनपय
सापिवा॥५३॥स्वेदोधमूषिकामांसैःगोवसाम्रक्षणंतथा॥गुदनिःसरणेशस्तंचांगेरीघृतमुत्तमं॥५४॥
शोफाहीनविरोधाच्चसाधयेत्स्वेद्भिश्चिकित्सितैः॥गुदभ्रंशेनकर्तव्याचिकित्सातत्प्रकीर्त्तिता॥५५॥
नयशोकसमुद्भूतेक्रियाश्चोनयनर्मदा॥सबीजंबहुवर्णत्वात्पुटपाकक्रियामताः॥५६॥अचेदनंसु
संपक्वंदीप्ताग्नेःसुचिरोत्थितं॥नानावर्णमतीसारंपुटपाकैरुपाचरेत्॥५७॥एरंडमूलेस्वरसे
नसुंठ्याःकल्कंसुसिद्धंपुटपाकयोगात्॥क्षौद्रेणलीढंविनिहंतिशीघ्रंआमातिसारंदारुचिश्रूल ॥२५
मुग्रं॥५८॥स्निग्धंघनंकुटजवल्कजलंत्वजग्धमादायतत्क्षणमवेक्ष्यचपोथयित्वा॥जंबुपलाश
॥२५॥ पुटतंदुलतोयसिक्तंबद्धंकुशेनचबहिर्घनपंकलिप्तं॥५९॥सुस्विन्नमेतदभिपीड्यरसंग्रहीहि
त्वाक्षौद्रेणयुक्तमतिसारवतेप्रदद्यात्॥कृष्णात्रिपुत्रमतपूजितएषयोगः॥सर्वातिसारहरणेस्व
यमेवराजा॥६०॥ ॥कुटजपाकः॥ ॥स्वरसस्यगुरुत्वात्पुटपाकेजलंपिबेत्॥पुटपाकस्यपा

कोयंबहिरारक्तचूर्णिता ॥६१॥ त्वक् पिंडं दीर्घवृंतस्य काश्मरीपत्रवेष्टितं ॥ मृदावलिप्तं सुकृतमंगारे
स्वनुकूलयेच्च ॥६२॥ स्विन्नमुद्धृत्य निःपीड्य रसमादाय यत्नतः ॥ शीतीकृतं मधुयुतं पाययेदुदरामये
॥६३॥ स्नातं कुटजमूलस्य क्षुण्णं तोयार्मणे पचेत् ॥ क्वाथः पादावशेषेस्मिन् लेहं पूते पुनः पचेत् ॥६४॥
सौवर्चलयवक्षारबिडसैंधवपिप्पली ॥ धातकीइंद्रजवाजाजीचूर्णं दत्वा पलद्वयं ॥६५॥ लिह्याद्बद
रमात्रां तु शीतं क्षौद्रेण संयुतं ॥ पक्वापक्वमतीसारं नानावर्णं सवेदनं ॥६६॥ दुर्वारं ग्रहणीदोषं ज
येच्चैव प्रवाहिकं ॥ कुटजावलेहः ॥ ॥ तुलामथार्द्रां गिरिमल्लिकायाः संकुद्य पक्वा रसमाददीत ॥ त
स्मिन्सुपूते पलसंमितानि श्लक्ष्णानि पिष्ट्वा सह शाल्मलेन ॥ पाठा समंगातिविषा समुस्ता बिल्वं च
पुष्पाणि च धातकीनां ॥ प्रक्षिप्य भूयो विपचेच्च तावद्दर्वीप्रलेपस्वरसस्तु यावत् ॥ पीतस्त्वसौ काल
विदा जलेन मंडेन वाजापयसाथवापि ॥ निहंति सर्वं त्वतिसारमुग्रं कृष्णं सितं लोहितपीतकं च ॥
दोषं ग्रहीण्या विविधं च रक्तं पीत्तं तथार्शांसि सरक्तोतानि ॥ असृग्दरं चैव मसाध्यरूपं निहंत्य
वश्यं कुटजाष्टकोयं ॥७०॥ ॥ कुटजाष्टकः ॥ ॥ कुलाढ्यजलद्रोणे द्रोणे द्रव्यतुला मता ॥ वत्स

कु नि २

कस्यतुबीजानिदार्व्याश्चैवलगुत्तमाः॥पिप्पलीश्रृंगवेरंचलाक्षाकटुकरोहिणी॥७२॥षड्भिरेभिर्घृतं
सिद्धंपेयंमंडावचारितं॥अतीसारंजयेच्छीघ्रंत्रिदोषमपिदारुणं॥७३॥ ॥षडंगघृतं॥ ॥क्षीरद्रुमा
भिरूरसेविपक्वंतज्जैश्चकल्कैःपयसाथसर्पिः॥सितोपलार्द्धंमधुपादयुक्तंरक्तातिसारंशमयत्सुदी
र्णं॥७४॥वटीचवटोदुंबरवेतसानामश्वत्थवृक्षेणसमन्वितानां॥ ॥क्षीरद्रुमाः॥ ॥जीर्णेमृतोपमंक्षीर
मतिसारेविशेषतः॥छागंतद्भेषजैःसिद्धंदेयंवावारिसाधितं॥७५॥यथाम्लंतंतथाक्षीरंअतीसा
रेष्वृंजितं॥चिराच्छिन्नेषुनन्नोयमपांभागैस्त्रिभिःसृतं॥७६॥पीतेरक्तेपुरीषेचावायुनाविच्छिवर्जितं॥
प्रवाहिकेतितत्स्मात्तंयस्फेनान्नप्रवर्त्तते॥७७॥मुस्तमोचरसरोध्रधातकीस्वर्जिकैश्छुरुकपित्थजीरकैः॥
शर्करामधुसंयुतैर्लिहन्नरःक्षिप्रमेवजयतिप्रवाहिकां॥७८॥बालबिल्वंगुडंतैलंपिप्पलीविश्वभेषजं॥
दद्याद्वातेप्रतिहितेसशूलेसप्रवाहिके॥७९॥पयसापिप्पलीकल्कःपीतोवामरिचोद्भवः॥त्र्याहात्प्र
वाहिकांहन्याच्चिरकालानुबंधिनीं॥८०॥बिल्वपेशीगुडंरोध्रंतैलंमरिचयोजितं॥लीढ्वाप्रवाहिकांहं
तिक्षिप्रंसुखमवाप्नुयात्॥८१॥दध्नाससारेणसमाक्षिकेनभुंजीतनिश्चारकपीडितस्तु॥सुतप्तकु

॥२५॥ ॥२५

प्पक्वथनेनवापिक्षीरेणशीतेनमधुप्लुतेन॥८३॥कल्कस्याबालबिल्वानांतिलकल्कश्चतत्समः॥दध्नःस
सारःस्नेहाढ्यःखडोहन्यात्प्रवाहिकां॥८४॥यवानीपिप्पलीमूलंचातुर्जातकनागरैः॥मरिचाग्निजलाजा
जीधान्यसौवर्चलैःसमैः॥८५॥वृक्षाम्लधातकीरुध्राबिल्वदाडिमदीप्यकैः॥त्रिगुणैःषड्गुणसिताःक
पित्थाष्टगुणीकृतः॥८६॥चूर्णोतिसारग्रहणीक्षयगुल्मगलामयान्॥कासश्वासाग्निमांद्यार्शःपीनसा
रोचकान्जयेत्॥८७॥कर्षोन्मितातवक्षीरीचातुर्जातंद्विकार्षिकं॥यवानीधान्यकाजाजीग्रंथिव्योषपलां
शकं॥८८॥पलानिदाडिमादष्टौसितायाश्चैकतःकृतः॥गुणैःकपित्थाष्टकवत्चूर्णोयंदाडिमाष्टकः॥८९॥
शोफंस्थूलंज्वरंतृष्णांकासंश्वासमरोचकं॥छर्दिंमूर्छांचहिक्कांचदद्यातीसारिणांत्यजेत्॥९०॥स्ना
नाभ्यंगावगाहश्चगुरुस्निग्धादिभोजनं॥व्यायाममग्निसंतापमतिसारेविवर्जयेत्॥९१॥यस्योच्चा प४
राद्विनामूत्रंपवनोवाप्रवर्त्तते॥दीप्ताग्नेर्लघुकोष्टस्यशांतस्तस्योदरामयः॥९२॥ ॥इतिअतिसा
रचिकित्सितोध्यायः॥ ॥अथग्रहणिचिकित्सा॥ ॥ग्रहणीमाश्रितंदोषमजीर्णवदुपाचरेत्॥
अतिसारोक्तविधिनातस्यामंचविपाचयेत्॥९३॥कपित्थबिल्वचांगेरीतक्रदाडिमसाधितं॥यवा

ग्रपाचयेत्यामं(रा)क्रसंवर्त्तयत्सपि॥१४॥लघुनापंचमस्त्रेन पंचमस्त्रेन पाठया॥अन्नानि कल्पयेद्विद्वान्बि
ल्ववक्षाम्लदाडिमैः॥१५॥ग्रहणीदोषिणां तक्रं दीपनं ग्राहि लाघवात्॥पथ्यं मधुरपाकित्वान्न च पित्तप्र
दूषणं॥१६॥कषायोष्णविकाषित्वाद्रौक्षाच्चैव कफे हितं॥वाते स्वाद्वम्लसांद्रत्वात्सद्यस्कमविदाहितत्॥१७॥
ग्रंथांतरे तक्रकल्पं व्याख्यास्यामः॥ ॥प्रजापतिं प्रणम्याथ संशयाविष्टमानसौ॥जितात्मानौ सुवचसा
वश्विनौ परिपृच्छतः॥१८॥पथ्ये वक्त्रे बलं तक्रं सेव्यस्याहैं नित्यशः॥किंगुणं तत्सोक्षीदृक्किं वीर्यं किंच तत्स
लं॥१९॥कियत्कालं कथं सेव्यं किंप्रमाणं कफुज्यते॥परिहार्यं च किं तत्र व्यापदो युक्तिनो थकाः॥१००॥एतत्स
र्वं प्रजानाथ वक्तुमर्हस्यशेषतः॥श्रुत्वा तद्वचनं प्राह सर्वलोकपितामहः॥१॥तक्रं मधुरमम्लं च कषाया
नुरसं लघु॥उष्णवीर्यं तयारूक्षमग्निदीप्तिकरं परं॥२॥संग्राहि मधुरं पाके गुर्वन्नाजीर्णहृत्परं॥अर्ह
धान्नानसंजातामरुचिं चाशु नाशयेत्॥३॥प्राणनं तत्र वर्त्तेत गुणे तीक्ष्णविकाषिणौ॥ग्रहणीपांडुरो
गार्त्ताः शोफातीसारकामलान्॥४॥प्रमेहोदरमेदांसि क्रिमीन्मूत्रग्रहारुचीः॥विषमज्वरकुष्ठानि गुल्म
प्लीहक्रमीस्तथा॥५॥भगंदरगरश्वित्रमानाहं बस्तिजां रुजं॥मुखप्रसेकमाटोपं स्नेहसौहित्यजं गदं॥६॥

॥२७॥ च ॥२७

कफवातहृदातंक्रात् सर्वथैव नियच्छति॥ शीतकालेऽग्निमांद्ये च कफोत्थेष्वामयेषु च॥७॥ मार्गावरोधे दुष्टे

हं ×२ च वायौ तक्रं प्रशस्यते॥ स्थूलानां बलं नित्यमन्नेन सहसेवितं॥८॥ अवष्टंबलहृत्तक्रं केवलं नातिसेवया॥

गुल्मेऽर्शोग्निग्रहण्यां च पांडुरोगे ष्वरोचके॥९॥ विशेषाच्छर्द्यतीसारे तक्रमेवामृतं यथा॥ तक्रमामं कफं

स ×४ कोष्ठे हंति निकंठे करोति च॥१०॥ पीनसश्वासकासाद्येषु सद्य एव तदिष्यते॥ रोग्यवस्थान्वयुगपत् वृद्धिसात्म्यक्ष

यानुगं॥११॥ ऊर्द्धं हि दुर्बोधितरं विकारैरधिगम्यते॥ पिबेदहरहस्तक्रं निरन्नो वा प्रकामतः॥१२॥ अ

स्यर्थं मंदकायाग्नेस्तक्रमेवाक्चारयेत्॥ सप्ताहं वा दशाहं वा मासं मासार्द्धमेव च वा॥१३॥ बलकालवि

भागज्ञो भिषक् तक्रं प्रयोजयेत्॥ मथितं गोरसं घोलं तक्रमम्लं सलोडितं॥१४॥ श्वेतं दंडाहतं कांडं द

ध्यम्लं नामतः स्मृतं॥ सरसं निर्मलं घोलं मथितं रसवर्जितं॥१५॥ अर्द्धोदकमुदश्वित्स्यात् तक्रं पादजला ज ×

न्वितं॥ वातपित्तहरं घोलमुदश्वित् श्लेष्मलं भवेत्॥१६॥ त्रिदोषघ्नमनं तक्रं मथितं कफपित्तहृत्॥ समु

त२ द्धृतघृतं चैव अर्द्धोद्धृतघृतं तथैव यत्॥१७॥ अनुद्धृतघृतं चैवमित्येतत्त्रिविधं स्मृतं॥ पूर्वं वा लघुपथ्यं

च गुरु वृष्यतरं परं॥१८॥ स्वादुपाकं वृषतमं यथाक्रममुदीरितं॥ शशिकुंदसमुज्ज्वलं[illegible]निनं परि श

पक्वकपित्थसुगंधिरसं॥युवतीकरनिर्मथितंपिबसर्वरुजापहरं॥१९॥नतक्रदग्धाःप्रभवंति
रोगाःनतक्रसेव्येव्यथनंकदाचित्॥यथासुराणाममृतंप्रधानंतथानराणांभुवितक्रमाहुः॥२०॥
विकारैर्नकजायंतेसम्यक्तक्रसमाहताः॥निषिक्तंतद्धिदहतिभूमावपितृणोलुपान्॥२१॥श्रोतःसुत
क्रंशुद्धेषुरसोधातूननुपेतियः॥तेनतुष्टिर्बलंवर्णःपरंपुष्टिश्चजायते॥२२॥वातश्लेष्मविकाराणांशतं
चविनिवर्तयेत्॥आसार्थंकल्पितंदेवैःसर्प्पिस्तक्रंचमानवे॥२३॥अविकारकरंतस्मात्सात्म्याद्धिस्व
स्यसर्वदा॥२४॥ग्रहण्यांभेषजंनास्तिनासत्योतक्रतःपरं॥पित्तोद्भवांपरित्यज्यचिरजांचत्रिदोषजां
॥२५॥नैवतक्रंक्षतेदद्यान्नोष्णकालेनदुर्बले॥नमूर्च्छाभ्रमदाहेषुनरोगेरक्तपैत्तिके॥२६॥ग्रहणीरो
गिणांतक्रंदीपनंग्राहिलाघवात्॥पथ्यंमधुरपाकित्वान्नचपित्तप्रदूषणं॥२७॥कषायोष्णविकाशि
त्वाद्रौक्ष्याच्चकफेहितं॥वातेस्वाद्वम्लसांद्रत्वात्संस्कारादविदाहितत्॥२८॥सामरोगेषुतत्सेव्यंनिरा
मेनकदाचन॥रूक्षत्वाच्चविकाषित्वानिरामेवातवर्द्धनं॥२९॥नागरातिविषामुस्तंग्रहणीदोषपाचनं॥
त्र्यहंवाषडहंवापिपानीयंमंदमाचरेत्॥३०॥सहसाह्रासयेन्नान्नंनतक्रंसहसाभजेत्॥सहसासेव

॥२८॥

नाद्वग्निव्याकुलो नाग्नामाप्नुयात्॥२१॥ कलमाःशालयो रक्ताः मुद्गाश्चैव सकुलत्थकाः॥ लघून्यन्यानि मांसानि
पूर्वं सेव्यानि धीमता॥२२॥ आमान्वयो विशुद्धे च वायौ तक्रं प्रशस्यते॥ सर्वत्रापि नियुंजीत तक्रं चापि विशे
षतः॥२३॥ विश्वाग्निग्रंथिकं कर्षं चूर्णितं मधुना सह॥ लेपयेद्दोहिनीं तत्र स्थालीं तत्र नु गाः पयः॥२४॥ अ
जां वा निरुजां मुद्गमाषपर्ण्यादिलेपितां॥ दुह्यात्तत्र यथान्यायं दधि प्रति विलोडयेत्॥२५॥ दधि वा यावनं
कुर्यात् यावि नं वा तथापरं॥ लवणे रूप्यरवज्जैर्वा सुपानं दधि यावनं॥२६॥ कपित्थमज्जकल्केन पक्वाम्रस्य
रसेन वा॥ लिप्ते न्ताउ च कठिनं या वितं दधि जायते॥२७॥ सुलोडितं ततस्तक्रं स विश्वं ग्रहणीगदे॥ सौवर्णे
राजते ताम्रे लोहे गृह्णीयां मृन्मये पिबा॥२८॥ तीक्ष्णलोह नवे पांजे सर्व धातुमयेर्न्नासि॥ स्थितं पात्रे तदम्लं च वाते
पित्ते सशर्करं॥२९॥ अर्द्धवारीकृतं पूर्वं ततः पादाम्बुवारिणा॥ निःसिंचततस्तक्रं ससससदिनांतरं॥ मलपाके
थ तस्य शुद्धिस्ततस्तक्रमलोद्भवः॥ तत्प्रवृत्तिस्ततो वन्हेः संनवस्याद्रसोद्गमः॥३१॥ रक्तादीनां च धातूनां क्र
माद्वृद्धिस्ततो बलं॥ ससकैः क्रमतो ज्ञेयं ससभिर्दूरभिस्तथा तु॥३२॥ तक्रोद्भवे मलेष्वेवं दृष्टं न स्यान्न
तो नरः॥ विद्रोषो हाति पीत्तस्य स्नेहनं समुपाचरेत्॥३३॥ [illegible] न पच्यते तक्रं स्तु ष्कर रूक्षमलछविः॥

पी ४

कुरोविदह्यतेसर्थंवायुस्त्राणिपूरयेत्॥४४॥रूक्षएवंविधोज्ञेयोदुर्बलोदुर्बलेंद्रियः॥नोपेक्षेतनरं
रूक्षंतक्रंरूक्षयतोऽन्नकं॥४५॥द्रवमानादुदर्दोधाहंनवंसनिलामयाः॥यःस्यात्केवलवातार्त्तिःसतै
लंवलयाश्रुतं॥४६॥सपित्तःपित्तवातार्त्तःनवनीतंनवंपिबेत्॥कफेचांगेरसंसर्पिर्नतिक्तचित्ह्यच
स्थिताः॥४७॥वसांमज्जानमनिलात्पिबेयुर्नरुवेदनाः॥स्नेहाद्दोक्ष्यंलाघवंगौरवात्त्वरोत्याद्दोक्ष्यंस्वा
दुनावादरोचं॥४८॥षाँरयंवार्ष्याद्यंहणात्कात्र्यंकार्यंतक्रस्येतद्दूंगवीनंनिहंति॥४९॥तक्रंव्यापद्दूरं
सोम्यंसर्वधातुविवर्द्धनं॥स्नेहनंनिरपायंवाहैयंगवीनमुच्यते॥५०॥कर्षमारभ्यकर्षार्द्धंवर्द्धयेद्द्वापलं
ततः॥कर्षंकर्षंन्नकुडवाद्धिकर्षेप्रस्थमानतः॥याक्सुस्निग्धलिंगानितावत्तद्वर्द्धयेच्छनैः॥५१॥ग्ला
॥२७॥
निःसदनमंगानामधस्तात्स्नेहदर्शनं॥सम्यक्स्निग्धस्यलिंगानिस्नेहद्वेषस्तथैवच॥५२॥सुस्निग्ध
॥२
लक्षणात्न्हासोनासोस्निग्धोविधीयते॥स्नेहारुचिर्मुखस्रावोगुददाहःप्रवाहिकाः॥५३॥पुरीषाति
प्रवृत्तिश्चतदतिस्निग्धलक्षणं॥ततोऽरोगंविदित्वेनंतक्रन्हासोविधीयते॥५४॥यथापूर्वंविशेषोत्र
तक्रन्हासोनवाद्धितः॥उदरेयोविधिःप्रोक्तःकेवलेतक्रसेवने॥५५॥तत्राप्प्येवंविधंविंद्यात्स्नेहनंवानु
पं५

लोमयन्॥ सुभगः समहाश्चैवं महारोगविवर्जितः॥५६॥ महाबलो महाबुद्धिर्नरो जीवेत्समाः शतं॥ व्या
यामं च व्यवायं च दिवास्वापं प्रजागरं॥५७॥ तक्रसेवी न सेवेत चारितान्नं च वारि च॥ केवलं सौषधं वापि
निरन्नं सान्नमेव वा॥५८॥ तक्रं दोषबलापेक्षी प्रयुज्याद्ग्रहणीगदे॥ व्यापदोथ प्रवक्ष्यामि शृणुत सुचि
कित्सिका॥५९॥ अमात्राय विशुद्धे च सहसा तक्रसेवनात्॥ आमः पक्वाशयं प्राप्य ग्रहणमभिदूष
तस ५ येत्॥६०॥ तस्यातिसारे गुदरुक् विष्टंभावनिमार्दवं॥ सर्वे मुस्तविश्वं च विषन्नेन्नोद्भवाः समाः॥६१॥
एषां क्वाथो भवेन्मेदो ग्रहणीवह्निमांद्यहृत्॥ चित्रकं त्र्यूषणं हिंगु ग्रंथिकं लवणानि च॥६२॥ च व्याजमो
दकोक्षारद्वयमेकत्र चूर्णयेत्॥ रसेन मातुलुंगस्य विहिता दाडिमस्य वा॥६३॥ विहितापथ्ययस्यामं
दीपयत्याशु चानलं॥ आच्छास्पिता रुतेः पुंसि तक्रं दाहं तनोति चेत्॥६४॥ नवनीतेन संयुक्तां सितां लीढ्वा
निरामयः॥ विशेषाद्बृंहणो वृष्यो योगोयं तक्रसेविषु॥६५॥ गुणास्तक्रभस्थिताः केचिन्मूर्तिमूयवगृहि स्थि
ताः॥ नवनीतनिभास्तेषां योगात्तक्रं सुधायते॥६६॥ नवनीते रुचिर्यस्य जीवनीयस्तथं घृतं॥ सप्तवेदथ
वायोगात्सद्यः स्नेहनिवारणः॥६७॥ शतधौतघृताभ्यंग प्रदाहसागुरुः स्मृतः॥ वमो मूर्छा भ्रमे सारे भ्र

मेचस्वचिकित्सितं॥६८॥तक्रारिष्टोपहृन्येव पत्रादीनि विधानवित्॥ रूक्षस्यस्नेहनंस्नेहैः अतिस्निग्ध
स्यरूक्षणं॥६९॥श्यामाकाक्रोरदूषान्नसक्तुपिण्याकैश्चैदलैः॥उद्वेगे मगनाभ्यादिसुगंधिरूर्वितानयेत्

न३ ॥७०॥विदलानिसतैलानिहीनस्निग्धेनिषेवयेत्॥अस्यग्निर्गुरुधान्यानिसमांशानियथाबलं॥७१॥रू
क्षांबृहणयोगेषुस्तुक्षर्यामैः छूलमाचरेत्॥स्नेहजीर्णेसुमुक्तान्नेस्नेहमुष्णांबुनापिबेत्॥७२॥उद्गारादौ
विशुद्धेचस्नेहंजीर्णंविनिर्दिशेत्॥अतिस्नेहमयप्राप्तेस्नेहंयुञ्ज्याद्विचक्षण॥७३॥अजीर्णमज्वरहृत्
श्लमूर्छानिदुर्बलाः॥स्नेहंजह्युर्दिशुद्धाश्चतषितांसविसादिनः॥७४॥स्नेहंत्यक्त्वनजेदूयः स्नेहादि

॥३०॥ चक्रियाविधिं॥रूक्षणंदीपनंरूच्यंपालयन्नानलंबलं॥७५॥आनाहेसर्वीबंधेचनिरूहैः सानुवासनैः॥
श्लदेदीपनसर्पिर्भिस्तैलैश्चपरिकर्तनं॥७६॥उपचरेद्बुवस्थासुचान्येष्वपियथायथं॥चतुर्विंशतिरि ॥३
त्येताः व्यापदः परिकीर्तिताः॥बालबिल्वंसबिल्वंचसगुडंकल्कितंलिहन्॥७७॥~~बालबिल्वंसबिल्वं~~
न प्राप्नोतिनरोजातुव्यापदस्तक्रतत्परः॥केवलंसोषधंवापिनिरन्नंसान्नमेववा॥७८॥तक्रंदोषबला
पेक्षीप्रयुंज्याद्ग्रहणीगदे॥एवंविरंचिराश्विभ्यांप्राहपूर्वंसुरेश्वरः॥७९॥अरिष्टान्यथवक्ष्यामिवह्निहा

रीतसंमतान्॥ ॥इतिहारीतसंहितायांग्रहणीप्रतिषेधेतक्रविधिः॥ ॥सुंटीसमुस्तातिविषागडूची
पिबेज्जलेनक्वथितांसमांशं॥मंदानलत्वेसततामयनाममानुबंधेग्रहणीगदेच॥१॥धान्याक्रातिविषोदीच्ययवानीविश्वनागरं॥बलाद्विपर्णीबिल्वंचदद्याद्दीपनपाचनं॥२॥चित्रकंपिप्पलीमूलंद्वौक्षारौलवणानिच॥व्योषंहिंग्वजमोदांचचव्यंचैकत्रचूर्णयेत्॥३॥गुटिकामातुलुंगस्यदाडिमस्यरसेनवा॥कृत्वाविपाचयेदामंदीपयत्याशुचानलं॥४॥ ॥चित्रगुटिका॥ ॥श्रीफलशलाटुकल्कोनागरचूर्णेनमिश्रितःसगुडः॥ग्रहणीगदमत्युग्रंतक्रभुजांशीलितोजयति॥५॥जंबूदाडिमशृंगाटपाठाकंचटपल्लवैः॥पक्वंपर्युषितंबालबिल्वंसगुडनागरं॥६॥हंतिसर्वानतीसारान्ग्रहणीमतिदुस्तरां॥नागरातिविषामुस्ताक्वाथःस्यादामपाचनः॥७॥चूर्णंहिंग्वाष्टकंचापिवातिकेष्टपलंघृतं॥नागरातिविषापिमुस्ताधातकीचरसांजनं॥८॥चूर्णंहिंग्वाष्टकंचापिवत्सकत्वक्फलंबिल्वंपाठाकटुकरोहिणी॥पिबेत्समांशाकंचूर्णंसक्षौद्रंतंदुलांबुना॥९॥पैत्तिकेग्रहणीदोषेरक्तंयस्योपचेश्यते॥अर्शांस्यथगुदेशूलंजयेच्चैवप्रवाहिकां॥१०॥नागराद्यमिदंचूर्णंकृष्णात्रेयेणपूजितं॥जलमष्टगुणंदत्वापलंकुदित

॥११॥

तंदुलान्॥९१॥नाचर्यिचानलोदेयंतंदुलोदककर्मणि॥ ॥नागराद्यंचूर्णं॥ ॥भूनिंबकटुकव्योषमुस्तकेंद्र
यवान्समान्॥द्वौचित्रकाद्वत्सकत्वक्भागान्शोषउशाचूर्णयेत्॥९२॥गुडशीतांबुनापीतंग्रहणीदोषगुल्म
नुत्॥कामलज्वरपांडुत्वमेहारुच्यतिसारजित्॥९३॥भूनिंबाद्यंचूर्णं॥ ॥कलिंगहिंग्वतिविषावचासौ
वर्चलाभयाः॥छ॥र्दिनुग्रंथिशूलेषुपानव्योष्णेनवारिणा॥९४॥दशमूलकषायेणसुंठीमक्षिसमांपिबे
त्॥ज्वरेचैवातिसारेचसशोफेग्रहणीगदे॥९५॥ग्रहिण्यांश्लेष्मजुष्टायांवमितस्ययथाविधिः॥कटुम्लल
वणक्षारैस्तैस्तैश्चाग्निंविवर्द्धयेत्॥९६॥चित्रकंग्रंथिकंपथ्यंमुस्तंप्रतिविषांवचां॥सुंठीमुस्तंविडंगंच
सुरात्तक्रोष्णवारिणा॥९७॥श्लेष्मिकंग्रहणीदोषंपीतमेतद्विनाशनं॥हिंगुक्षारसमापथ्यासुंठीपिप्पलि
चित्रकाः॥द्विगुणास्सर्वचस्यानंतुश्लेष्मग्रहणिदोषजित्॥९८॥यवानिकारव्यजाजीचव्यपिप्पलिनागरं॥
कफग्रहणीदोषघ्नंपीत्तमेतद्विनाशनं॥१००॥केवलंसौषधंचापिनिरन्नंसन्नमेववा॥तक्रंदोषबला
पेक्षीयोजयेद्ग्रहणीगदे॥१॥सर्वजायांग्रहण्यांतुसामान्यविधिरिष्यते॥मस्तुरस्यकषायेणबिल्व
गर्भंपचेत्घृतं॥२॥हंतिकुक्षामयान्सर्वान्ग्रहणीपांडुकामलाः॥व्रीहीप्रियंगयोःक्वाथंव्युषितंदोषलं

॥२९

विदुः॥४॥मसूराणांतुलाक्काथोबिल्वगर्भेपचेत्घृतं॥भिन्नविट्कंप्रशंसंतिमसूरघृतमुत्तमं॥५॥शि
न्नानिबालबिल्वानिखादेत्क्षौद्रेणमानवः॥तक्रेणानूनतगर्भेणसार्द्धंतुग्रहणीगदे॥५॥त्र्यूषणत्रिफला
क्काथेबिल्वमात्रेगुडास्यकल्के॥सर्पिःषोडशपलंपक्कामात्रांमंदानलःपिबेत्॥६॥ ॥इतिअष्टफलकंघृ
तं॥ ॥बिल्वाग्निचव्यार्द्रकशृंगवेरक्काथेनकल्केनचसिद्धंसिद्धमाज्यं॥सच्छागदुग्धंग्रहणीगदोत्थे॥
शोथाग्निसादारुचिनुद्वरिष्टं॥७॥मार्चसिंधूत्पलयोषबालबिल्वांबुधातुकी॥सिद्धमाज्यमजाक्षीरेचांगेरी
रसचाग्निदः॥८॥हन्याद्ग्रहण्यतीसारौपथ्यापथ्यान्विनोध्रुवं॥पाठांतरेकपित्थोपिप्रदेयोत्रघृतेपुनः
॥९॥बालचांगेरीघृतं॥ ॥नागरंपिप्पलीमूलंचित्रकोहस्तिपिप्पली॥श्वदंष्ट्रापिप्पलीधान्यबिल्वं
प०३२॥ पाठायवानिका॥१०॥चांगेरीस्वरसेसर्पिःकल्कैरेभिर्विपाचितं॥चतुर्गुणेनदध्नात्रतद्घृतंकफवात
नुत्॥११॥अर्शांसिग्रहणीदोषंमूत्रकृच्छ्रंप्रवाहिकां॥गुदभ्रंशार्तिमानाहंघृतमेतद्व्यपोहति॥१२॥चांगेरी
घृतं॥ ॥मरिचंपिप्पलीमूलंनागरंपिप्पलीतथा॥भल्लातकंयवानीचविडंगंहस्तिपिप्पली॥१३॥हिं
गुसौवर्चलंचैवबिडंसैंधवकंचयत्॥सामुद्रंसजवक्षारंचित्रकोवचयासह॥१४॥एतेरर्द्धपलैर्भागैर्घृ

शु२

तक्रस्थं विपाचयेत्॥ दसमूलीरसे सिद्धं पयसा द्विगुणेन वा॥१५॥ मंदाग्नीनां हितं श्रेष्ठं ग्रहणीदोषनाशनं॥
विष्टंभमामदौर्बल्यं प्लीहानमपकर्षयेत्॥१६॥ कासंश्वासं क्षयं वापि दुर्नामसगरं नं दरं॥ कफजान्हंति रो
गाश्च वातजान् कृमिसंभवान्॥ सर्वास्तान्नाशयत्याशु शुष्कं दार्वनलो यथा॥ मरिचाद्यं घृतं॥ ॥विश्वौष
धस्य कल्केन दशमूलीजलेशृतं॥ निहन्याद्दृयथुं शोथं ग्रहणीसामनामयं॥१८॥ सुंठीघृतं॥ ॥घृतं
नागरकल्केन सिद्धं वातानुलोमनं॥ ग्रहणीपांडुरोगघ्नं प्लीहकासज्वरापहं॥१७॥ सुंठीघृतं॥ ॥प्रस्थ
त्रयेणामलकीरसस्य शुद्धस्य षुद्धस्य दर्व्यार्द्ध तुलां गुडस्य॥ चूर्णीकृतैर्ग्रंथिकजीरचव्यव्योषेभकृष्णा
हपुषाजमोदैः॥ विडंगसिंधूत्रिफलायवानीपाठाग्निधान्यैश्च पिचुप्रमाणैः॥२१॥ दत्वा त्रिवृच्चूर्णप
लानि चाष्टौ अष्टौ च तैलस्य पचेद्यथावत्॥ तं भक्षयेदक्षफलप्रमाणं यथेष्टचेष्टं त्रिसुगंधियुक्तं॥ अने
न सर्वे ग्रहणीविकाराः स्श्वासकासस्वरभेददोषाः॥ शाम्यंति चायं चिरमंतरेग्नैत्तस्य पुंस्त्वस्य च वृ
द्धिहेतुः॥ स्त्रीणां च वंध्यामयनाशनस्यात्कल्याणको नाम गुडः प्रदिष्टः॥ तैलेनाष्टपले भृज्यात्त्रिसुगंधि
कपलं पलं॥ सिद्धे निधेयमत्रैव गुडकल्याणपूर्वकं॥२५॥ ॥इति कल्याणको गुडः॥ द्रोणं मधूकपु
चा

स्व ॥३२ त्रि ॥३२ हे३

ग्रहणीदोष एव च ॥२७॥ एषामग्निबले हीने वृद्धिर्वृद्धे परिक्षयः ॥ तस्मादग्निं सदा रक्षेदेषु त्रिषु विशेष
तः ॥२८॥ ग्रंथांतरे ॥ ॥अर्शोतिसारग्रहणीविकाराः प्रायेण चान्योन्यनिदानभूताः ॥ सन्नेऽनले संति न
संति दीप्ते न तस्तु रक्षेच्च विशेषतोऽग्निः ॥२९॥ वाग्भटादप्युक्तं ॥ ॥दुर्नाम्नां साधनोपायः चतुर्द्धा परिकी
र्तितः ॥ भेषजक्षारशस्त्राग्निः साध्यत्वयाप्युच्यते ॥१॥ यत्किंचिन्मधुरं स्निग्धमुष्णं वातानुलोमनं ॥
भेषजं पानमन्नं वा ॥ तत्सेव्यं नित्यमर्शसैः ॥२॥ वातातिसारवद्भिन्नवर्च्चस्यर्शसि पाचयेत् ॥ उ
दावर्त्तविधानेन गाढविट्कानि चाचरेत् ॥३॥ प्रवृत्तबहुलास्राणि पित्तशोणितनाशनैः ॥ विड्विबंधे
हितं तक्रं यवानीबिडसंयुतं ॥४॥ नाहिरोहंति गुदजाः पुनस्तक्रसमाहताः ॥ शांतसु तक्रं शुद्धेषु
रसः सम्यगुपैति यः ॥५॥ तेन पुष्टिबलं वर्णः प्रहर्षश्चोपजायते ॥ वातश्लेष्मविकाराणां वातं चावि

॥२२॥

निवर्त्तते ॥६॥ सगुडां पिप्पलीयुक्तामभयां घृतभर्जितां ॥ त्रिवृद्दंतियुतां वापि भक्षयेद्वानुलोमनीं ॥
॥७॥ तिलकल्कसंयुक्तं भक्षयेदग्निवर्द्धनं ॥ कुष्ठरोगहरं श्रेष्ठमर्शसां नाशनं परं ॥८॥ तिलान
ल्लातकं पथ्या गुडश्चेति समांशकं ॥ दुर्नामश्वासकासघ्नं प्लीहपांडुज्वरापहं ॥९॥ मल्लि संस्मरणं दे

पि२ पक्त्वाग्नौपुटपाकवत्॥अद्यात्सतैललवणंदुर्नामविनिवर्त्तयेत्॥४९॥असितानांतिलानांप्राक्कुंचं
शीतवारिणा॥खादतोऽर्शांसिसाम्यंतिद्विजदार्ढ्यंगिपुष्टिदं॥५०॥स्विन्नंवार्त्ताकफलंव्योषयवक्षारपे
रस३ नसलिलेन॥तद्वद्घृतमरिचयुक्तंगुडेनवातस्यतोऽश्नाति॥५२॥पिबतिचतक्रंभूतंतस्याश्वेवात्रवद्धि
गुदजानि॥यांतिचनाशंपुंसःसहजान्यपिसप्तरात्रेण॥५३॥पितश्लेष्मप्रशमनीकच्छूकंडूरुजापहा॥
गुदजान्नाशयत्याशुयोजितासगुडाभया॥५४॥त्वचंचित्रकमूलस्यपिष्ट्वाकुंभंप्रलेपयेत्॥तक्रंवादधि
वातत्रजातमर्शोहरंपिबेत्॥५५॥त्रिफलादशमूलाग्निनिकुंभाणांपलंपलं॥वारिद्रोणेशृतंपाद
शेषगुडतुलायुतः॥५६॥आभांडेस्थितोमासंदंत्यारिष्टोनिषेवितः॥गुदजक्रम्युदावर्त्तग्रहणीपांडु
रोगहाः॥५७॥दंत्यारिष्टः॥ ॥अरिष्टादेस्तुसंधानंधातकीलिप्तभाजने॥हरीतकीनांप्रस्थार्द्धंप्रस्थ
मामलकस्यच॥५८॥स्यात्कपित्थाद्दशपलंततोर्द्धेनेंद्रवारुणी॥विडंगपिप्पलिलोध्रंमिरिचंसैलवा
लुकं॥५९॥द्विपलांशंजलस्यैतच्चतुर्द्रोणेविपाचयेत्॥द्रोणशेषेरसेतस्मिन्पूतेशीतेप्रदापये
त्॥६०॥गुडस्यद्विशतंतिष्ठेन्मासार्द्धंघृतभाजने॥पश्चात्तदूर्ध्वंपिबेत्स्येयंततोमात्रायथाबलं॥६१॥

ष्याणां विडंगस्याढकद्वयं ॥ नद्यान्नकाढकं तद्वच्चित्रकस्य च दापयेत् ॥२६॥ मंजिष्ठाष्टपलं चैव चतुर्द्रोणे
न सा पचेत् ॥ पादावशिष्टं सीतं तन्मध्वाढकं समायुतं ॥२७॥ मृणालच्छेदशक्लैश्च लाचंदनैरूपलेपिते ॥
घटे निक्षिप्य तन्मासं पिबेज्जातं यथाबलं ॥२८॥ रक्तपित्तहरं हृद्यं ग्रहणीदोषनाशनं ॥ क्रिमिकासकुष्ठ
शोफार्शः प्रमेहारोचकापहं ॥२९॥ चंदनं पद्मकोशीरं पाठा मूर्वा कुटंनटं ॥ षड्ग्रंथा सारिवास्फोतासप्त
पर्णाटरूषकान् ॥३०॥ पटोलोदुंबराश्वत्थवटप्लवैरुकपिछनात् ॥ कटुकारोहिणीमुस्तनिंबंचार्द्धप
लांशकं ॥३१॥ द्रोणेपांसाधयेत्पादशेषप्रस्थं घृतात्पचेत् ॥ किरातत्तिक्तकेंद्रजवावीरामागधिकापलैः
॥३२॥ कल्कैरक्षसमैः पेयं तत्सिनग्रहणीगदे ॥ लिंगैरसाध्या ग्रहणीविकारा येस्तेरतीसारगदानि
सिद्धेत् ॥३३॥ वृष्यस्य नूनं ग्रहणीविकारहत्वा तनुं नो विनिवर्त्तते च ॥३४॥ परिसंवत्सरं क्षीणबल
मांसहुतासनं ॥ उपद्रवैश्च संयुक्तं वर्जयेद्ग्रहणीगदं ॥३५॥ करोत्यर्थमतीसारत्रोपं वातिबलक्षयः ॥
कासश्वासारुचिर्हिक्का अरिष्टा ग्रहणीगदे ॥३६॥ ॥ इति ग्रहणीचिकि० चतुर्थोध्यायः ॥ ॥ अथार्
शसांचिकित्सां व्याख्यास्यामः ॥ ॥ त्रयो विकाराः प्रायेण ये परस्परहेतवः ॥ अर्शांसि चातिसारश्च

स पि ता

अस्याभ्यासादरिष्टस्य गुदजानां तिसंक्षयं॥ ग्रहणीपांडुहृद्रोगप्लीहगुल्मोदरापहं॥६३॥ कुष्टशोषा
रुचिहरो बलवर्णाग्निवर्द्धनः॥ सिद्धोयमभयारिष्टः कामलश्वित्रनाशनः॥६४॥ कृमिग्रंथ्यर्बुदव्यंग
राजयक्ष्मज्वरांतकृत्॥ ॥अभयारिष्टः॥ पानमानमरिष्टादेः क्वाथमानसमं विदुः॥६५॥ भेषजलाभ्य
लेकेचित्प्रथमं मदलक्षणं॥ भल्लातकानि त्रिफलादंतीचित्रकमेव च॥ एतानि सममागानि सैंधवं
द्विगुणं भवेत्॥ कपालाग्नौ न वैसम्यक् मृदुना गोमयाग्निना॥६६॥ एतत्कल्याणलवणं श्रेष्ठमर्शोविका
रिणां॥ ॥कल्याणलवणं॥ ॥त्रिफलं शृंगवेरस्य चतुर्थं मरिचस्य च॥६७॥ पिप्पल्याः कुडवार्द्धं च व्या
धाःपलमेव च॥ तालीसपत्रस्य पलं पलार्धं केसरस्य च॥६८॥ द्वे पले पिप्पलीमूलात् चित्रकस्य प
लं तथा॥ सूक्ष्मैलाकर्षमेकं च कर्षं च त्वङ्मृणालयोः॥६९॥ अजमोदाम्लजाजीं च सुसूक्ष्माण्येकत्र चू
र्णयेत्॥ गुडात्पलानि त्रिंशच्च चूर्णमेकत्र कारयेत्॥७०॥ अक्षप्रमाणगुटिकाः प्राणदा इति विश्रुताः॥
तालीसपत्रवटकास्त एव परिकीर्तिताः॥७१॥ पूर्वं भक्षास्तु पश्चाच्च भोजनस्य यथाबलं॥ मार्ध्वं
मांसरसं यूषं क्षीरं तोयं पिबेदनु॥७२॥ हन्यादर्शांसि सर्वाणि सहजान्यस्रजानि च॥ वातपित्त

॥३४॥

कफोत्थानिसन्निपातोद्भवान्पि॥७३॥पानात्सयेमूत्रकृछ्रं वातरोगे गलग्रहे॥विषमज्वरेस्चमंदाग्नौ
पांडुरोगेतथैवच॥७४॥कृमिमिहृद्रोगिणां वैच एतास्यूरमृतोपमाः॥सुंठ्यास्थानेजयायाश्वविग्रहे
पित्तपायुजे॥७५॥प्राणदोयंसितांदत्वाचूर्णमानाच्चतुर्गुणं॥अम्लपित्ताग्निमांद्यादौप्रयोज्योगुदजा
तुरे॥७६॥ ॥प्राणदोमोदकः॥ ॥अनुपानेप्रयोक्तव्यंव्याधौश्लेष्मजवेसलं॥पलद्वयंचनिलजेपित्त
जेतुपलद्वयं॥७७॥पथ्यापंचपलान्येकमजाज्याभरिचस्यच॥पिप्पलीपिप्पलीमूलंचव्यचित्रकना
गराः॥७८॥पलानिवद्ध्यात्कमशोयवक्षारपलद्वयं॥मल्लातकपलान्यष्टौकंदस्तुद्विगुणोमतः॥७९॥
द्विगुणेनगुडेनैषांवटकानक्षसंमतान्॥खादेत्कंनक्षयेह्मातस्तकंमंभोनुवापिबेत्॥८०॥मंदाग्नि
दीपयेत्येषग्रहणीपांडूरोगनुत्॥कांकायनेनशिष्येभ्यःशास्त्रक्षाराग्निभिर्विना॥८१॥भिषगम
तमिदंप्रोक्तंश्रेष्ठमर्शोविकारिणां॥ ॥इतिकांकायनमोदकः॥ ॥लवणोत्तमवन्हिकलिंगयवा
न्चिरबिल्वमहापिचुमंदयुतान्॥पिबसप्तदिनंमथितालोडितंयदिमर्द्दितुमिच्छसिपायुरुजः
॥८२॥लवणोत्तमाद्यंचूर्णं॥ ॥सुंठीकृष्णामरिचनागदलत्वगेलाचूर्णंकृतंक्रमविवर्द्धितमूर्द्ध

मन्याचू॥ स्वादेदिमं समसितं गुडजा ग्निमांद्यगुल्मारुचिश्वसनकंठहृदामयेषु॥ ८७॥ समशर्करं चूर्णं॥ ॥ सनागररूक्षरवृद्धदारकं गुडेनयोमोदकमुदारं॥ अत्तीस्सु दुर्नामकरोगदारकं करोति वृद्धं सहसे वदारकं॥ ८८॥ चतुःसमोमोदकः॥ ॥ व्योषाग्न्यरुष्करविडंगतिलाभयानां चूर्णं गुडेन सहितं तु सदोपयोज्यं॥ दुर्नामरोगशकृत्श्वासकासा(?) द्विबंधानग्नेर्जयत्यबलतांकृमिपांडुतां च॥ ८९॥ चूर्णे चूर्णसमो ज्ञेयो मोदकोद्विगुणेगुडः॥ ॥ इतिव्योषाद्यंनामचूर्णमोदकः॥ ॥ मरिच महौषधचित्रकसूरणा भागास्तथोत्तरंद्विगुणाः॥ सर्वसमोगुडभागः सेव्योयं मोदकः प्रसिद्धफलः॥ ज्वलनं ज्वलयति जठरमुन्मूलयति गुल्मशूलगदान् निःशेषयतिश्लीपदमर्शा(?)॥ सिनाशयत्याशु॥

॥३५॥ ॥ ॥ इतिस्वल्पसूरणेमोदकः॥ ॥ चूर्णीकृताः षोडशसूरणस्य भागा वन्हेरष्टौमहौषधस्यापि ॥८९॥ अर्द्धेन भाग ... मरिचस्य ततोपिचार्द्धेनत्रिफलाकणासमूलातालीसारुष्करवृमिघ्नानां॥ ॥९०॥ भागामहौषधसमादहनांशाताल मूलीच॥ भागः सूरणतुल्योदातव्यो वृद्धदारुकस्यापि ॥९१॥ ... लेमस्विंन्नोसर्वाण्येकत्रकारयेच्चूर्णं॥ द्विगुणेनगुडेनयुतः सेव्योयंमोदकः प्रकामघनैः ॥३५॥

गुदजस्य भोज्यरहितेषु घितरेषु द्रवं कुर्ते।। भस्मकमानजनितं पूर्वमगस्त्तेस्तु योगराजेन।।९३।। भीमस्य
महारथेनापितौ तेन महाशनौ जातौ।। अग्निबलवृद्धिहेतुर्न केवलं सूरणो महावीर्यः।।९४।। शस्त्रावतिशस्त्र
क्षाराग्निनिर्विनाप्यर्शांसि निर्हंति।। श्वयथुश्लीपदजित् ग्रहण्यां च रसायनं पुंसां।।९५।। ।।बृहत्सूरणमोद
कः।। ।।चव्यं चित्रकशुंठी पाठाक्षारं कुस्तुंबरूणि च।। यवानी पिप्पलीमूलं उभे च बिडसैंधवे।।९६।। चित्र
कं बिल्वमन्नयं पिष्टा सर्पिर्विपाचयेत्।। सकृद्वातानुलोमार्थं जायते दध्नि चतुर्गुणे।।९७।। प्रवाहिकां गु
दभ्रंशं मूत्रकृच्छ्रं परिस्रवं।। गुदवंक्षणशूलं च घृतमेतद्व्यपोहति।।९८।। ।।चव्याद्यं घृतं।। ।।पिप्पली
मधुकं बिल्वं शताह्वा मरिचं वचा।। कुष्टं सठी पुष्करारव्यं चित्रकं देवदारु च।।९९।। पिष्ट्वा तैलं विपक्त
व्यं द्विगुणक्षीरसंयुतं।। अर्शसां मूढवातानां तच्छ्रेष्ठमनुवासनं।।१००।। गुदनिःसरणं शूलं मूत्रकृच्छ्रं
प्रवाहिकां।। कट्यूरुपृष्ठदौर्बल्यमानाहं वक्षणाश्रयं।। पिच्छास्रावं गुदे शोफं वातवर्चोविनिग्रहं।। उत्था
नं बहुशो यच्च जयेच्चैवानुवासनात्।।२।। ।।पिप्पल्याद्यं तैलं।। ।।त्रिवृत्तेजोवतीदंतीश्वदंष्ट्रा
चित्रकं सठी।। गवाक्षी विश्वमुस्ताह्वा विडंगानि हरीतकी।।३।। पलोन्मितानि चैतानि पलान्यष्टावरुष्क

रात्॥ पद्दलं वज्ञदारुश्च सुरणस्यतु यौत्र॥४॥ जलद्रोण द्वये क्वाथं चतुर्भागावशेषितं॥ पूतं चूतं रसे स्वू
यः काथेन्य स्त्रिगुणोगुणः॥५॥ लेहं पचेत्ततस्तावद्यावद्दर्वीप्रलेपनं॥ अवतार्य ततः पश्चाच्चूर्णीनी
मानिदापयेत्॥ धातवत्तेजोवती वृंदचीत्रकाद्विपलांशकान्॥ एकालग्मरिचं वापिगजाव्हाचापिषद्द
लं॥७॥ द्वात्रिंशत्पलमेतेषां चूर्णं दत्वाग्निधापयेत्॥ ततोक्षमात्रां युंजीत जीर्णे क्षीररसासिनः॥८॥ पंच
गुल्मान् प्रमेहांश्च पांडुरोगं हलीमकं॥ जयेद्दर्शांसि सर्वाणि तथा सर्वोदराणिच॥९॥ दीपयेज्जूर्णीमां
धं यक्ष्माणं चापकर्षति॥ पीनसे च प्रतिश्याये आढ्यवाते तथैवच॥१०॥ अयं सर्वगदेषु वक्ल्याणो ले
हउच्यते॥ दुर्नामारिरयं चास्तु दृष्टो वारसहस्रशः॥११॥ नवं स्येन प्रयुंजानाः शतवर्षं निरामयाः॥ आयु
र्वादीर्घ जननो वलीपलीतनाशनः॥१२॥ रसायनवरश्चैव मेधाजननउत्तमः॥ गुडश्रीबाहुशालोयं दुर्ना
मारिप्रकीर्तितः॥१३॥ ॥इति बाहुशालगुडः॥ ॥तोयपूर्णे यदा पात्रे क्षिप्तो न प्लवते गुडः॥ क्षिप्तश्च
निश्चलस्तिष्टेत्पतितस्तु न शीर्यते॥१४॥ यदा दर्वीप्रलेपस्याद्यावदातंतुलीनवेत्॥ एषपाको गुडादीनां स
र्वेषां परिकीर्तितः॥१५॥ सुखमार्द्दसुखस्पर्शगंधवर्णरसान्वितः॥ पीडितो नयते मुद्रां गुडः पाकमुपागतः

॥२६॥

॥२

॥१६॥ भल्लातकसहस्रे द्वे जलद्रोणे विपाचयेत्॥ पादशेषे रसे तस्मिन्स्वचेद्गुडतुलां भिषक्॥१७॥ भल्लातकसहस्रार्द्धं छित्वा तत्रैव दापयेत्॥ सिद्धे गुडे स्मिंस्त्रिफलाव्योषयवानीमुस्तसैंधवैः॥१८॥ कर्षांशैश्चूर्णितैर्दद्यात् त्वगेलापत्रकेसरैः॥ खादेदग्निपलापेक्षी प्रातरुत्थाय मानवः॥१९॥ कुष्टार्शःकामेहग्रहणीगुल्मपांडुनुत्॥ कुष्टार्शःकामलामेहग्रहणीगुल्मपांडुतां॥ हन्यात्प्लीहोदरं श्वासं कृमिरोगभगंदरान्॥२०॥ भल्लातकगुडस्त्वेष श्रेष्ठश्चार्शोविकारिणां॥ ॥इति भल्लातकगुडः॥ ॥दशमूलामृताभार्गीश्च दंष्ट्रासचित्रकं॥२१॥ भल्लातकसहस्रं तु पलांशं क्वाथयेद्बुधः॥ दत्वा गुडतुलामेकां लेहीभूतं समुद्धरेत्॥२२॥ माक्षिकं पिप्पलीतैलमौरबूकं च दापयेत्॥ कुडवं कुडवं चात्र त्वगेलां च तथा॥२३॥ अर्शःकासमुदावर्तपांडुत्वं शोफमेव च॥ नाशयेद्वह्निसादं च गुडोभल्लातकः स्मृतः॥२४॥ रक्तार्शसामुपेक्षेत रक्तं मादौ श्रवद्विषक्॥ दुष्टास्ते निग्रहीतेश्शूलानाहवसृग्यदा॥२५॥ नवनीततिलाभ्यासात्केसरनवनीतं शर्कराभ्यासाच्च॥ दधिसरमथिताभ्यासाद्गुदजाः शाम्यंति रक्तवहाः॥२६॥ ससांगो सलमोचाह्वतिरीटतिलचंदनैः॥ छागंक्षीरं प्रयोक्तव्यं गुदजे शोनितापहं॥२७॥ कुटजफलवल्कलकेसरनीलोसलरोध्र

मरि ५

धातकीकल्कैः॥ सिद्धं घृतं विधेयं शूले रक्तार्शसां भिषजा ॥१८॥ कुटजघृतं ॥ ॥ चित्रकं त्रिफलामुस्तं ग्रं
थिकं विकाम्लता ॥ हस्तिपिप्पल्यपामार्गदंडोत्पलकुटेरकाः ॥१९॥ एषां चतुःपलान् भागान् जलद्रोणे वि
पाचयेत् ॥ भल्लातकसहस्रे द्वे छित्वा तत्रैव दापयेत् ॥२०॥ तेन पादावशेषेण लोहपात्रे विपाचयेत् ॥ तु
लार्द्धं तीक्ष्णलोहस्य घृतस्य कुडवद्वयं ॥२१॥ त्र्यूषणं त्रिफला वह्निः सैंधवं विडमौद्भिदं ॥ सौवर्चलं वि
डंगं च पलिका संप्रकल्पयेत् ॥२२॥ कुडवं वृद्धदारस्य तालमूल्यास्तथैव च ॥ शूरणस्य पलान्यष्टौ चू
र्णं कृत्वा विनिक्षिपेत् ॥२३॥ सिद्धे शीते प्रदातव्यं मधुनः कुडवद्वयं ॥ प्रातर्भोजनकाले वा ततः स्वादेद्य
थाबलं ॥२४॥ अर्शांसि ग्रहदोषं पांडुरोगमरोचकं ॥ कृमिगुल्माश्मरीमेहमेहान् शूलं व्यपोहति ॥
॥२५॥ करोति शुक्रोपचयं वलीपलितनाशनं ॥ रसायनमिदं श्रेष्ठं सर्वरोगहरं परं ॥२६॥ भल्लातका
वलेहः ॥ ॥ कुटजत्वक्पलशतं जलद्रोणे विपाचयेत् ॥ अष्टभागावशेषेण कषायमवतारयेत् ॥२७॥
वस्त्रपूतं पुनः क्वाथ्यं यावल्लेहत्वमागतं ॥ भल्लातकं विडंगानि त्रिकटुं त्रिफलां तथा ॥२८॥ रसांजनं
चित्रकं च कुटजस्य फलानि च ॥ वचा प्रतिविषा बिल्वं प्रत्येकं तु पलं पलं ॥२९॥ त्रिंशत्पलं गुडस्या

॥३७॥

त्रचूर्णीकृत्यप्रदापयेत्॥मधुनःकुडवंदद्यात् घृतस्यकुडवंतथा॥६०॥एषलेहस्तुत्रामयेदर्शांसिचसमु
द्भवं॥वातिकंपैत्तिकंचैवश्लैष्मिकंसन्निपातकं॥६१॥येच्चदुर्नामजारोगास्तान्सर्वांश्चनाशयेत्॥रक्त
पित्तमतिसारंपांडुरोगमरोचकं॥६२॥ग्रहणीमार्दवंकासंश्वयथुंकामलामपि॥अनुपानेघृतंदद्या
न्मधुतक्रंजलंपयः॥६३॥जीर्णेतुपथ्यभोजीस्यादर्शोभ्यःप्रतिमुच्यते॥ ॥कुटजावलेहः॥ ॥तोय
कालमुष्कारुस्यविपचेद्भस्माढकंषड्गुणेपात्रेलोहमयेदृढे विपुलधीर्दर्व्याशनैर्घट्टयेत्॥दग्धाग्नौ
बहुशंखनाभिशुक्लान्एतावच्छेषंक्षिपेत्पयोरंजनालमेषदंतिक्षारोभवेत्वाकृतान्॥६४॥
पानीयभावनायत्वास्यपरिश्राव्यंचतुर्गुणे॥द्विगुणंवाढकेषत्रभागमानोपलक्षणात्॥६५॥अंघ्रिपञ्च
स्यरत्नत्वेक्षारांभोग्राह्यमिष्यते॥पाणियप्रतिचारणीयइतिचक्षारोद्विधात्रस्यनेतत्राद्योगरगुल्मा
दिनामनेदुर्नामकादोपरः॥तुर्येणाष्टमकेनषोडशानभेनान्येनसंबृंहितेमध्येश्रेष्ठइतिक्रमेणवि
क्षा२ हितः॥क्षारोदकात्संसर्वरूक्षैर्भावितंरजनीचूर्णैःस्नुहीक्षीरेपुनःपुनः॥बंधनाच्चदृढंसूत्रंछिनत्त्यर्शो
भगंदरं॥६७॥ ॥क्षारसूत्रं॥ ॥प्राग्दक्षिणंनतोवामंपृष्ठजंखाग्रजंक्रमात्॥पंचतिच्छेःसंस्वेद्यदहे

क्षारेण वन्हिना ॥ ४८ ॥ वातजश्लेष्मजं चार्शः क्षारेणास्रजपित्तजे । जीन्रा फालिकापत्रैः रूक्षैः संलक्ष्य क्षे २
लेपयेत् ॥ ४९ ॥ क्षारेण वा कृशानतिष्टेत् यंत्रद्वारं पिधाय च । तच्च पानीयवीक्षीप पक्कजंबूफलोपमं ॥
॥ ५० ॥ यदि स्याच्च तदा नष्टं नो चिह्निफेनसा पुनः ॥ तत्तु षां बुध्नुतं सद्यो यष्टीवल्केन लेपयेत् ॥ ५१ ॥ त
त्रिन्मुंतालुवर्णाभं वन्हिदग्धं स्थिरां शान्तं ॥ निर्वाप्य मधुसर्पिर्भ्यां वन्हिसंजातवेदनं ॥ ५२ ॥ गुदश्वयथु
शूलार्तं मंदाग्निं पाययेत् द्रुतं ॥ त्र्यूषणा पिप्पलीमूलपाठा हिंगुसचित्रकं ॥ ५३ ॥ सौवर्चलपुष्कराख्यम
जाजी बिल्वपेसिकां ॥ विडंगयवानीहपुषा विडंगं सैंधवं वचां ॥ ५४ ॥ तत्तत् डीकं च मद्येन मंडेनष्पादकेन
वा ॥ तेषां संग्रहणीदोषाः शूलानाहाद्विमुच्यते ॥ ५५ ॥ गुडेन सुंठीमथवा पकुल्यां पथ्यां तृतीयामथ दाडि
मं वा ॥ आमेष्वजीर्णे गुगुदामयैर्वर्च्चो विबंधेषु च नित्यमिष्टं ॥ ५६ ॥ पाययेद्वा तक्रश्चूर्णं त्रिफलामधु
संयुतं ॥ हन्ते गुदाश्रये दोषे गुदजान्यांति संक्षयं ॥ ५७ ॥ गोमूत्राध्युषितां दद्यात् सगुडं वा हरीतकीं ॥ हरी
तकीं तक्रयुतां त्रिफलां वा प्रयोजयेत् ॥ ५८ ॥ चित्रकं हपुषां हिंगुं दद्याद्वा तक्रसंयुतं ॥ पंचकोलयुतं वा
तक्रेणैव प्रदापयेत् ॥ ५९ ॥ तक्रेणार्शांसि निघ्नंति मुन्नालीकुटजाग्निकाः ॥ पीत्वा वे कुटजावाग्निर्मंजिष्ठा

॥३८॥
पु ४

॥३८

सपुनर्नवा ॥६०॥ चिरबिल्वाग्निसंधूक्ष नागरेंद्रयवासरूक् ॥ तक्रेण पिबतोऽर्शांसि निपतंत्यसृजा
सह ॥६१॥ शालिषष्टिकगोधूमयवान्नसंस्कृतैर्घृतैः ॥ अम्लाक्षीरेण यानिंबपलोलानां रसेन वा
॥६२॥ मांसैर्मांसरसैर्वापि कंदवार्त्ताकमूलकैः ॥ जीवंत्यापोदकाशाकैस्तंदुलीयकवास्तुकैः ॥६३॥
म४ अन्यैर्वासृष्टविण्मूत्रैरूर्द्धर्वन्हिदीपनैः ॥ क्षारेण वन्हिना वापि वातश्लेष्मसमुद्भवं ॥६४॥ क्षारेणैव
दहेदर्शः पित्तरक्तसमुद्भवं ॥ कुटजत्वङ्निर्यूहसनागरः सरक्तसंयगाः ॥६५॥ त्वक्दाडिमस्य तद्व
त्सनागरश्चंदनरसश्च ॥ चंदनकिराततिक्तकधन्वयवासाकनागराः क्वथिताः ॥६६॥ रक्तार्शसां
प्रशमनाः दार्वीत्वगुशीरनिंबाश्च ॥ मधुकं सपंचवल्कल बदरीत्वगुदंबरधवपटोलं ॥६७॥ परि
षेचने प्रयोज्यं वृषककुभयवासनिंबाश्च ॥ कुटजोत्वचो विपाक्यं पलशतमार्द्रं महेंद्रसलिलेन ॥
॥६८॥ यावत्स्यादरसं तद्द्रव्यं रसस्ततो ग्राह्यः ॥ मोचरसः ससमंगाफलिनी च समांशिकैस्त्रिस्तेश्च
॥६९॥ वत्सकबीजं तुल्यं चूर्णीकृतमत्र दातव्यं ॥ पूतोत्क्वथितः सांद्रः रससो दार्वीप्रलेपको ग्राह्यः ॥७०॥
मात्राकालोपहितारसक्रियैषा जयतिरक्तं ॥ ज्योतिष्काबीजवल्केन लेपो रक्तार्शसां हितः ॥७१॥ स्नुहा

२ सं

ग्निलांगलीदंतीमूलैर्लेपोर्कससंहितः॥तद्वत्कणाशिरीषाग्निस्नुक्क्षीरामयसैंधवैः॥७२॥रजनी
चूर्णयुतं स्नुक्क्षीरेण प्रलेपनं॥कृष्णावासनिशा पिष्ट्वा गोपित्तेन प्रलेपयेत्॥७३॥कोशातकीर
जोघर्षान्निपतंति गुदोद्भवाः॥अर्कपयःसुधाकांडं कटुकालांबुपल्लवाः॥७४॥करंजोबस्तमूत्रेणले
पनं श्रेष्ठमर्शसां॥निशाकोशातकीचूर्णं स्नुक्पयःसैंधवान्वितं॥७५॥गोमूत्रेण समायुक्तं लेपो दुर्ना
मनाशनः॥स्नुह्यर्कनिस्त्रैः क्षीरैः भल्लातकसमन्वितैः॥७६॥ज्योतिष्मती त्रिफला दंती कोशातक्यग्नि
सैंधवैः॥चूर्णैरेतैः समं धत्तेः गुडयेत्सूत्रकं दृढं॥७७॥सूत्रं तत्पादयेदर्शः छिन्नमूलं द्रुमो॥कासीस
दंतीसिंधूत्थ करवीरानलैः पचेत्॥७८॥तैलमार्कपयो निंबमभ्यंगा कदलीलकात्॥दंत्याश्वमा
रकासीसविडंगैलाग्निसैंधवैः॥७९॥सार्कक्षीरैः स्नुतं तैलमभ्यंगात्स्यायुकीलजित्॥चित्रकस्यप
लं त्वेकं द्विपलं सूरणस्य च॥८०॥पलार्द्धं नागरस्यापि मरिचं कालमात्रकं॥भल्लातककणामूलं विडं
गं त्रिफलाकणा॥८१॥तालीससहितान् सर्वान् अक्षमात्रं प्रयोजयेत्॥द्वे पले वृद्धमारुस्यताल
मूल्याः पलं भवेत्॥८२॥वरांगमरिचांशेन सर्वानेकत्र चूर्णयेत्॥गुडेनमर्दयित्वातु द्विगुणे

॥२९॥ ॥३

नेहबुद्धिमान्॥८३॥ मोदकः स्मरणोनाम अक्षमात्रप्रमाणतः॥ उपयुक्तो निहंत्याशु गुदकीलान्नसंशयः॥८४॥ अग्निवृद्धिकरः पुंसां सेव्यमानो महागुणः॥ हपुषा कुंचिका धान्या मजाजीकारवी सठी॥८५॥ पिप्पलि पिप्पलीमूलं चित्रको हस्तिपिप्पली॥ यवानी चाजमोदा च तच्चूर्णं तक्रसंयुतं॥८६॥ मंदाम्ल कटुकं विद्वान् स्थापयेद्घृतभाजने॥ व्यक्ताम्ल कटुकं जातं तक्रारिष्टं मुदुप्रियं॥८७॥ पिबेन्मात्रया काले चान्नस्य न क्षितस्य षा॥ दीपनं रोचनं वर्ण्यं कफवातानुलोमनं॥८८॥ गुदश्वयथुकंडूर्त्तिनाशनं बलवर्द्धनं॥ व्योषगर्भे पलंशस्य त्रिगुणेन स्मवारिणि॥ साधितं पिबतः सर्पिः पतंत्यर्शांस्य संशयात्॥ त्रिंशत्पलानी सुठीनां जलद्रोणे विपाचयेत्॥९०॥ तेन पादावशेषेण कल्केनासांपचेद्घृतं॥ दुर्नामश्वासकासघ्नं प्लीहपांड्वामयापहं॥९१॥ विषमज्वरशांत्यर्थं तद्घृतं रोचकनाशनं॥ सुंठीघृतमिति ख्यातं वृ आत्रेयेण पूजितं॥९२॥ नागरेण जले पक्वं बस्तिकुक्षिगदापहं॥ सर्प्पिरर्शोविकारघ्नं ग्रहणी दीपनं परं॥९३॥ भल्लातकसहस्रार्द्धं जलद्रोणे विपाचयेत्॥ तेन पादावशेषं तु कषायमवतारयेत्॥९४॥ घृतप्रस्थं समावाप्य कल्कानीमानि दापयेत्॥ त्र्यूषणं पिप्पलीमूलं

चित्रकं हस्तिपिप्पली ॥ ९५ ॥ हिंगुश्चयाजमोदा च पंचैव लवणानि च ॥ क्षारौ द्वौ हपुषा चेव द्दद्या

द्दर्द्ध पलोन्मितं ॥ ९६ ॥ दधि कांजिक युक्तानि स्नेहमात्रासमानि या ॥ अर्द्रकस्य रसंश्चेव शंनाज

नरसं तथा ॥ ९७ ॥ तत्सर्वमेकतः कृत्वा शनैर्मृद्वग्निना पचेत् ॥ एतद् ग्नीमुखं नाम मंदाग्नीषु प्रश

स्यते ॥ ९८ ॥ अर्शसां नाशनं श्रेष्टं सर्ववातानुलोमनं ॥ कफवातोद्भवे गुल्मे श्लीपदे च यथोदरे ॥ ९९ ॥

शोफं पांडुमयं कासं ग्रहणी श्वासमेव च ॥ एतानि नाशयत्याशु सूर्यस्तमश्च वोदितः ॥ १०० ॥ हीवे

रमुत्पलं रोध्रं समंगा च्यव्यचंदनं ॥ पाठां सतिविषा बिल्वं धातकी देवदारु च ॥ १ ॥ दार्वीत्वग्नाग

मांसीमुस्तं क्षारो यवाग्रजः ॥ चित्रकः श्वेतपुष्पाणि चांगेरी स्वरसे घृतं ॥ २ ॥ एकस्थं साधयेत्त

र्वं तत्सुर्प्पिः परमौषधं ॥ अर्शोतिसारग्रहणी पांडुरोगे ज्वरे रुचौ ॥ ३ ॥ मत्रकृच्छ्रे गुदभ्रंशे शोव

स्यानौ प्रबोधकैः पिच्छास्रावेर्शसां मूले योज्यमेतत्त्रिदोषजित् ॥ ४ ॥ अवाक्पुष्पी बलाव्याघ्री

पृश्निपर्णी त्रिकंटकं ॥ न्यग्रोधोदुंबराश्वत्थप्लक्षांगाश्च द्विपलोन्मितान् ॥ ५ ॥ कषाय एकतः पथ्यः

सर्वदात्वर्शसां हितः ॥ पिप्पली पिप्पलीमूलं मरिचं देवदारु च ॥ ६ ॥ कलिंगा शाल्मलीपुष्पं वीरा

॥ ८० ॥

॥ ८

चंदनभंजनं॥ कुटकुलंचित्रकंमुस्तंप्रीयंग्वातिविषास्थिरा॥७॥ पद्मोत्पलानांकिंजल्कसमंगासनिदग्धिका॥
बिल्वंमोचरसंपाठाभागाः कर्षसमन्विताः॥८॥ चतुःप्रस्थस्रुतंपथ्यंकषायमवतारयेत्॥ त्रिंशत्पलानितु
प्रस्थेविज्ञेयोर्द्धपलाधिकः॥९॥ सुनिषण्णकचांगेर्य्योः प्रस्थौद्वौस्वरसस्यच॥ द्रव्यैरन्यैर्यथालाभंघृत
प्रस्थंविपाचयेत्॥१०॥ एतदर्शास्यतीसारे रक्तस्रावेत्रिदोषजे॥ प्रवाहिकेगुदभ्रंशेमूत्रेपिच्छासुविविधासु
च॥११॥ उत्थानेचापिबहुशोबस्तिशूलेगुदाश्रये॥ मूत्रग्रहेमूढवातेमंदाग्नावरुचावपि॥१२॥ प्रयोज्यंवि
धिवत्सर्पिर्बलवर्णाग्निवर्द्धनं॥ विविधेष्वन्नपानेषुकेवलंवारिरसंमयं॥१३॥ यद्वायोर्वानुलोमाययदग्नि
बलवर्द्धये॥ अन्नपानौषधंसर्वंतत्सेव्यंनित्यमर्शसैः॥१४॥ ॥इतिसर्वाचिकित्सायांपंचमोध्यायः॥ ॥
अथाजीर्णचिरंचिकालसकलंचिकित्सितंव्याख्यास्यामः॥ ॥प्रायेणाहारवैषम्यादजीर्णंजायतेनृणां॥ तन् स्य
मूलोरोगसंघातस्तद्विनाद्विनश्यति॥१५॥ तत्रामेवमनंकार्यंविदग्धेलंघनंहितं॥ विष्टब्धेस्वेदनंशास्तंरस
शेषेशयीतच॥१६॥ विडंगभल्लातकचित्रकामृताःसनागरास्तुल्यगुडेनसर्पिषा॥ पिबंतियेमंदहुता
शनानराः भवंतुचाउवतुल्यवन्हयः॥१७॥ त्रिकटुकमजमोदासैंधवंजीरकेद्वेसमधरणधृतानामष्टमो॥
ति

हिंगुभागः॥ प्रथमकवलेभोज्यः सर्प्पिषा चूर्णएषः जयतिजठराग्निंवातगुल्मंनिहंति॥१८॥ हरीतकी
भक्षमाणानागरेणगुडेनवा॥ सैंधवोपहितावापिसातत्सेनाग्निबोधनी॥१९॥ किंचिदामेनमंदाग्निंर
नसागुडनागरे॥ यद्यप्यत्क्रेणभुंजीतयुक्तेनानुपदूषणे॥२०॥ विश्वाभयागडूचीनांकषायेनतुदूष
णं॥ पिबेत्श्लेष्मणिमंदाग्नौसव्यत्रसुरभीरुतं॥२१॥ विदह्यतेयस्यतुभुक्तमात्रंदह्यंतिहत्कोष्टगल
श्चयस्य॥ द्राक्षासितांमाक्षिकसंप्रयुक्तांलीढाभयांवाससुखंलभेत॥२२॥ सिंधूत्थहिंगुमगधोद्भववन्हि
चूर्णउष्णांबुनापिबतियः खलुनष्टवन्हीः॥ तस्यामिषेससघृतेनवरान्नमन्नंतस्मिन्वयस्यखिलमा
त्रमिहक्षणेन॥२३॥ सिंधुत्थहिंगुत्रिफलायवानीव्योषैर्गुडेर्वटकंप्रकुर्यात्॥ तेनाक्षितेनस्त्रिमिवाभु
वानोभुंजीतमंदाग्निरपिप्रभूतं॥२४॥ धान्यनागरसिद्धंवातोयंदद्याद्विचक्षणः॥ आमाजीर्णप्रशम
नंश्लघ्नंवन्हिदीपनं॥२५॥ वत्सकंससवर्णचद्विचूरंजंदुरालभं॥ पाठानागरमूर्वांचषड्ग्रंथामदनं
दहेत॥२६॥ गोमूत्रेणप्रयुक्तस्तुक्षारोयंवन्हिदीपनः॥ कपित्थतक्रचांगेरीमरिचाजाजिचित्रकैः॥२७॥ क
कवातहरोग्राहीषड्ओदीपनपाचनः॥ त्र्यूषणंत्रिफलाकल्कंबिल्वमात्रेगुडासले॥२८॥ सर्प्पिषोष्टपलं

३१५ ॥५

५५॥

जि

पलमात्रां मंदानलः पिबेत्॥ धान्यजीरकसंसिद्धं घृतमग्निविवर्द्धनं॥२९॥ रोचनं शमनं छर्द्दिदाहज्वरवि
नाशनं॥ पंचमूलस्य नयाव्योषपिप्पलीमूलसैंधवैः॥३०॥ रास्नाक्षारद्वयाजाजीविडंगसठीभिर्घृतं॥ पु
क्तेन मातुलुंगस्य स्वरसेनार्द्रकस्य च॥३१॥ तक्रमस्तुसुरामंडसौवीरकतुषोदकैः॥ कांजिकेन तु न सक्तं पी
तमग्निकरं परं॥३२॥ शूलगुल्मोदरस्वासकासानिलकफापहं॥ सबीजपूरकरसं सिद्धं वापि पिबेद्घृ
तं॥३३॥ मस्त्विं पिप्पलीमूलं नागरं पिप्पली तथा॥ भल्लातकयवानी च विडंगं हस्तिपिप्पली॥३४॥ हिंगुसौ
वर्चलं चैव अजाबिडधान्यकं॥ सामुद्रं सैंधवं क्षारं चित्रकं वचया सह॥३५॥ एभिरर्द्धपलैर्भागैर्घृत
प्रस्थं विपाचयेत्॥ दशमूलरसे सिद्धं पयसा द्विगुणेन वा॥३६॥ मंदाग्नीनां हितं सिद्धं ग्रहणीदोष
नाशनं॥ विष्टंभाध्मानदौर्बल्यं प्लीहानमपकर्षति॥३७॥ कासं श्वासं क्षयं वापि दुर्नामसभगंदरं॥ क
फजान् हंति रोगां च वातजान् कृमिसंभवान्॥३८॥ तान् सर्वान्नाशयत्याशु शुष्कं दार्वनलो यथा॥ कुरंज
नी बस्तिशिरोगशूच्यं जुनवत्सकाः॥३९॥ रास्नात्रिकंटशतपर्वपुनर्नवाभिर्विश्वौषधामलकतामरदारि
भिश्च॥ क्वाथः कृतः सकलधातुगते तु सामे सर्वांगगेपि पवने हितकृन्नराणां॥४०॥ पीतः कषायो वम

नाद्येराहन्याद्विश्वूच्विकां॥ तीव्रार्त्तिरपिनाजीर्णी पिबेच्छूलघ्नमौषधं॥४१॥ आमसन्नोमलोनाल्पयन्नंदो
षोषधात्रानं॥ शूलेनिरन्नेकोष्टेद्भिःकोष्णानिस्त्रावितःपिबेत्॥४२॥ हिंगुप्रतिविषाव्योषःसौवर्च्चल
वचाभया॥ अथवापिप्पलीमूलंतवजादारुसैंधवं॥४३॥ सुंठीशीरंसलवणंपिप्पलीलवणानिच॥ पा
ठाम्लवेतसक्षारयवानीपौष्करानिच॥४४॥ विश्वच्यामतिवद्धायांपार्श्वेदाहःप्रशस्यते॥ शर्करारस
संयुक्तंप्रपीतंवाकुचंरसं॥४५॥ विश्वच्यांपरमंगुह्यमुपदिष्टंचिकित्सकैः॥ व्योषंकरंजस्यफलंहरिद्रांमूलं
समावाप्यथमातुलुंग्याः॥४६॥ छायाविशुष्काःगुटीकाःकृताःस्ताहन्युर्विश्वचीनयनांजनेन॥४७॥ कुष्ट
सैंधवयोःकल्कंचुक्रतैलसमन्वितं॥ विश्वच्यांमर्द्दनंकोष्णंखल्लीशूलनिवारणं॥४८॥ चव्यपत्ररास्नागुरु
शिग्रुकुष्टैरम्लप्रपिष्टैःसवचाशताह्वैः॥ उद्वर्त्तनंखल्लिविशूचकाघ्नंतैलंविपक्वंचतदर्थकारी॥४९॥
॥४२॥
म्त्रिकंप्रतिपिण्याकंकुष्टंभल्लातकानिच॥ द्वौक्षारौसैंधवंचैवतैलंयुक्तंविपाचयेत्॥४९॥ एतदुद्वर्त्तनं
कुर्याद्दुपदेहंविचक्षणेः॥ सरूक्षादुष्टमुदरमम्लपिष्टैःप्रलेपयेत्॥ दारुहैमवतीकुष्टशताह्वाहिंगुसैंध
वैः॥५०॥ अम्लेनयुक्तंखलुखंम्लचूर्णसक्षारमर्तिंजठरेनिहन्यात्॥ स्वेदोघटैर्वाबहुबाष्पपूर्णैरूक्षे

स्तथान्यैरपि पाणितल्पैः ॥५१॥ पिबेद्विपक्वं समजाजकषायं कदंबनीपार्जुनवृक्षकाणां ॥ क्वाथं सुखोष्णं
लवणप्रगाढं विसूचिकाजीर्णविशोपमर्दि ॥५२॥ एरंडबिल्वबृहतीद्वयमातुलुंगपाषाणभित्त्रिवृदुदुंबर
लूत्कलः कषायः ॥ सक्षारहिंगुलवणोरुबुतैलमिश्रः श्रोण्यूरुपैमेदुहृदयस्तनरूपैक्षयः ॥५३॥ सुवासि
तं साधु विरेचनं वा सुलंघितं वा मनुजं विदित्वा ॥ पेयादिनिर्दीपनपाचनीयैः सम्यक्सुधार्त्तं समुपक्रमेत
॥५४॥ ॥ इत्यजीर्णविसूच्यादिचिकित्सितं षष्टोध्यायः ॥ ॥ अथ कृमिचिकित्सितं व्याख्यास्यामः ॥ ॥
मुस्ताखुपर्णिफलदारुत्रिगुणकाथः सकृष्णाकृमिघ्नस्तु कल्कः ॥ मार्गद्वयेनापि चिरप्रवृद्धान् कृमीन्निहंति
कृमिजांश्च रोगान् ॥५५॥ विडंगसैंधवक्षारकंपिल्लकहरीतकीं ॥ पिबेत्तक्रेण संयुक्तां सर्वकृमिनिवृत्तये ॥५६॥
पत्रैर्मूषिकपर्ण्यास्तु पिष्टैः पिष्टविमिश्रितैः ॥ पादौ नः पोलिकापक्वा धान्याम्लं च पिबेदनु ॥५७॥ लिह्या
त्क्षौद्रेण वैडंगचूर्णं कृमिविनाशनं ॥ पारिभद्रकपत्रोत्थं रसं वा मधुना पिबेत् ॥५८॥ पलाशबीजः स्वर
सं पिबेद्वा क्षौद्रसंयुतं ॥ पिबेद्विजत्रुकल्कं वा तक्रेण कृमिनाशनं ॥५९॥ धात्रीरसं पिबेद्वापि छागलं मू
त्रमेव च ॥ स्वरसः कासमर्दस्य फणिज्जार्जकयोस्तथा ॥६०॥ निर्गुंडीसुरसापर्णी कुलाहलसुगंधिका ॥

सवकः कालमाक्षश्च विषमुष्टिप्रचीरणः ॥६१॥ विडंगंकाचमाचिवमरूवामुषिकर्णिका ॥ श्रीपर्णीचि
तिवर्गीयं कृमिश्लेष्मविनाशनः ॥६२॥ कासारुचिप्रतिश्यायश्वासहाव्रणशोधनः ॥ फलत्रयंवचादंती
तवक्षं पिलवेः समैः ॥६३॥ सिद्धं सर्पिर्गवां मूत्रे पीतं कृमिविनाशनं ॥६४॥ ॥इति कृमिचिकित्सितं
सप्तमोध्यायः ॥ ॥अथ पांडुचिकित्सितं व्याख्यास्यामः ॥ ॥फलत्रिकाम्रतावासातिक्ताभूनिंब
निंबजः ॥ क्वाथः क्षौद्रयुतो हन्यात्पांडुरोगं सकामलं ॥६५॥ त्रिफलाया गुडूच्या वा दार्व्या निंबस्य वा
रसं ॥ प्रातः प्रातर्मधुयुतो कामलार्त्तः पिबेन्नरः ॥६६॥ नागरं लोहचूर्णं वा पथ्याचूर्णामयाशमजं ॥ गुग्गु
लं वाथ मूत्रेण कफपांड्वामयी पिबेत् ॥६७॥ क्षीणेन लोहचूर्णं वा गोमूत्रेण सुसाधितं ॥ त्र्यूषणं त्रिफ
लामुस्तं विडंगं चित्रकं समं ॥६८॥ नवायोरजसो भागास्तच्चूर्णं क्षौद्रसर्पिषा ॥ लेहयेत् पांडुहृद्रोगकु
ष्ठार्शः कामलापहं ॥६९॥ अयस्तिलत्र्यूषणकोलभागैः सर्वैः समं माक्षिकधातुचूर्णं ॥ तैर्मोदकः क्षौद्र
सर्पिषायुतो नुतन्नः पांड्वामयेदूरगतेपि शस्तः ॥७०॥ अयोरजव्योषविडंगचूर्णं लिह्याद्धरिद्रां त्रिफलां
न्वितं वा ॥ सशर्करा कामलिनो त्रिनं ऊीहि तागवाक्षी सगुडा च सुंठी ॥७१॥ दार्वी सत्रिफला व्योषं विडं

॥८०॥ ॥८०॥

गानयोरजः॥ मधुसर्प्पियुतं लिह्यात्कामलापांडुरोगवान्॥ ७२॥ लोहचूर्णं निशायुग्मं त्रिफलाकटुरोहि-
णी॥ प्रलिह्य मधुसर्पिभ्यां कामलार्त्तः सुखी भवेत्॥ ७३॥ धात्रीलोहरजोव्योषनिशाक्षौद्राज्यशर्कराः॥
लीढा निवारयत्याशु कामलामुद्धतामपि॥ ७४॥ तुल्यां वायोरजः पथ्यां हरिद्रां क्षौद्रसर्पिषा॥ चूर्णितं
कामली लिह्यात्कुडक्षौद्रेण वा नयो॥ ७५॥ पंचकोलं समरिचं देवदारु फलत्रिकं॥ विडंगमुस्तयुक्ता-
श्च भागास्त्रिपलसंमिताः॥ ७६॥ यावंत्येतानि चूर्णानि मंडूरं द्विगुणं ततः॥ पक्त्वाष्टगुणिते मूत्रे घनी-
भूतं तमुद्धरेत्॥ ७७॥ ततोक्षमात्रान् वटकान्पिबेत्तक्रेण तक्रभुक्॥ पांडुरोगं जयेत्तद्वत्पांडुरोग-
मरोचकं॥ ७८॥ अर्शांसि ग्रहणीशोफ मरुस्तंभहलिमकं॥ कृमिप्लीहानमुदरं गलरोगांश्च नाशये-
त्॥ ७९॥ मंडूरवज्रवटका रोगानीकप्रभेदनाः॥ त्र्यूषणं त्रिफला मुस्तं विडंगं चव्यचित्रके॥ ८०॥ दा-
र्वीत्वक् माक्षिको धातुग्रंथिकोदेवदारु च॥ एषां द्विपलिकान्भागान्चूर्णं कृत्वा पृथक् पृथक्
॥ ८१॥ मंडूरं द्विगुणं चूर्णं शुद्धमंजनसन्निभं॥ मूत्रेमष्टगुणे पक्त्वा तस्मिंस्तु प्रक्षिपेत्ततः॥ ८२॥ उदंबरस-
मान्कुर्वन्वटकास्तान्यथाग्निच॥ उपयुंजीत तक्रेण साम्यजीर्णे च भोजनं॥ ८३॥ मंडूरवटकाः

४२

॥ ५४ ॥

ह्यत्तेभाणदाः पांडुरोगिणां ॥ कुष्टानि ज्वरष्टं शोफमूत्रस्तंभकफामयान् ॥ ५ ॥ ॥ अर्शोसि कामलामे
हं प्लीहानं नाशयंति च ॥ क्षौद्रं हरीद्रामंजिष्टाबालामलक्याप्ययोरजः ॥ लोद्रं चैतेषु गोऽधिदारिष्टः पांडु
रोगिणां ॥ ६ ॥ धात्रीफलसहस्रे द्वे पीडयित्वा रसं भिषक् ॥ क्षौद्राष्टभागं पिप्पल्याचूर्णद्विकुडवायुतं ॥
॥ ७ ॥ शर्कराई तुलोन्मिश्रां पक्षात्रिद्विघटे स्थितं ॥ पाययेन्मात्रया प्रातर्जीर्णे मितहिताशिनः ॥ ८ ॥
कामलापांडुहृद्रोगवातरक्तविषमज्वरान् ॥ कासहिक्कारुचिं श्वासं श्चैषोरिष्टः प्रणाशयेत् ॥ ९ ॥
अंजनं कामलार्त्तस्य द्रोणपुष्पीरसः स्मृतः ॥ निशागैरिकधात्रीणां चूर्णं वा संप्रकल्पयेत् ॥ १० ॥ नस्यं
कर्कोटमूलं स्यात्सेयं वा जीमूतिनीफलं ॥ दद्याश्चतुः पलरसे पिष्टैर्दंतित्रिलादुभिः ॥ ११ ॥ तद्वत्प्रस्थे
घृतात्सेयः सिद्धं पांड्वार्तिशोफवान् ॥ पुराणसर्पिषः प्रस्थो द्राक्षार्द्धप्रस्थसाधितः ॥ १२ ॥ चूर्ले द्वे
ग्रंथिकं वह्निदीप्यकोषणसैंधवं ॥ कृमिघ्नत्रिफलासुंठीधान्यकाजाज्यमोदकाः ॥ १३ ॥ पालिका
नि तच्चूर्णं तैलयोश्च पलाष्टकं ॥ रसप्रस्थत्रयो धात्र्या गुडस्यार्द्धशतं पचेत् ॥ १४ ॥ एष कल्याण
कोनामकामेन रोगदापहः ॥ मेहकुष्टज्वरश्वासग्रहणीजिद्रसायनं ॥ १५ ॥ पुनर्नवां दार्वभयां गु
ग

॥ ५

द्रूचीं पिबेत्सम्मूत्रां महिषाक्षयुक्तां ॥ त्वग्दोषशोफोदरपांडुरोगस्थौल्यप्रमेहोर्द्धकफामयैः ॥९६॥ मंडूर
लोहाग्निविडंगपथ्याव्योषाक्षमुस्तामलकैः समेताः ॥ मूत्राम्बुनोयं मधुनावलेहः पांड्वामयं हंत्य
चिरेण घोरं ॥९७॥ ॥इति पांडुकामलचिकित्सिते अष्टमोध्यायः॥ ॥अथ रक्तपित्तचिकित्सितं व्या
ख्यास्यामः॥ ॥ह्रीवेरधान्यकं धान्यं चंदनं मधुयष्टिका॥ वृषोशीरयुतः क्वाथः शर्करामधुयोजि
तः॥९८॥ रक्तपित्तं जयत्युग्रं तृष्णादाहज्वरांस्तथा॥ सारिवापद्मकोशीरमधुकं चंदनद्वयं ॥९९॥ का
श्मर्यं मधुकं चेति सारिवादिरयं गणः॥ रक्तपित्तं निहंत्याशु तृष्णां चापि प्रमाथिनी॥१००॥ तीव्रपि
त्तज्वरामर्दि महादाहविनाशनः॥ उत्पलं कुमुदं पद्मं कह्लारं लोहितोत्पलं॥१॥ मधुकं चेति पित्तास्
क्तृट्छर्दिविषहा गणः॥ आटरूषं निर्यूह प्रियंगुमृत्तिकांजनं॥२॥ विनीय लोध्रं सक्षौद्रं रक्तपि
त्तहरं पिबेत्॥ तथा वृषकषायं चा शर्करामधुसंयुतं॥३॥ पाययेत्तेन सद्योहि रक्तपित्त प्रशाम्य
ति॥ न वृषेण समं किंचिद्भेषजं रक्तपित्तिनां॥४॥ वृषपत्राणि निःपीड्य रसं मधु सशर्करा॥ अनेन
प्रशामं याति रक्तपित्तं सुदारुणं॥५॥ वासायां विद्यमानायां आशायां जीवितस्य च॥ रक्तपित्तैर्निक्ष

धं ३

पीश्वासी क्षिमर्थं च वसीदति ॥६॥ हृत्कंठस्य मध्ये तु प्रविष्टः कफकुंजरः ॥ आटरूषमहासिंहगंधमाघ्रा
य नस्यति ॥७॥ अंजनं तार्क्ष्यजं च्छायामानागपंकजकेसरी ॥ मधुकं चेत्ययं वर्गः पित्तास्रग्विषदाहनुत् ॥८॥ ज
पिबेत्सीतकषायं वा बीजं चार्जुनसंभवं ॥ उदुंबरफलानां चा रसं संपीड्य पाययेत् ॥९॥ चंदनेंद्रजवा
पाठाकटुकामसदुरालभं ॥ गुडूचीवासकं लोध्रं पिप्पलीक्षौद्रसंयुतं ॥१०॥ कफान्वितं जयेद्रक्तं तृष्णा
कासज्वरापहं ॥ शतावरीराजमाषक्षुद्रमर्यं सपरूषकं ॥ जयेत्तत्क्तपित्तं च सद्यःशूलहरं परं ॥ त्वक्जाचान
यात्री घ्रापफलान्यारग्वधस्य च ॥१२॥ त्रायमाणागवाक्षीवामलमामलकानि च ॥ विरेचयं प्रयुंजीत प्र
मुतमधुशर्करा ॥१३॥ दद्यादिक्षुरसं शीतमथ वा शर्करोदकं ॥ ससीतामदनं क्षौद्रं पक्कं वा वमने हितं ॥
॥१४॥ जलं खर्जूरमृद्वीकामधूकैः सपरूषकैः ॥ शृतशीतं प्रयोक्तव्यं तर्पणं चसशर्करं ॥१५॥ बृंहणं स
घृतक्षौद्रं लाजाचूर्णैः प्रदापयेत् ॥ कुर्ड्गरक्तपित्तं तत्कपीतं व्यपोहति ॥१६॥ ह्रीवेरं चंदनोशीरं मुस्त
पर्प्पटकैः शृतं ॥ केवलं शृतशीतं वा दद्यात्तोयं पिपासिते ॥१७॥ मसूरमुद्गचणकाः समकुष्टाढकीफलाः ॥
प्रशस्ता युषाः पथ्यार्थं कल्प्या नारक्तपित्तिनां ॥१८॥ पयः सीताढ्यं शृतशीतमाजं गव्यं पयो वा प्रसमीक्ष्य

वन्हि॥ यष्टिमधूकार्जुनजीवनीयेः द्राक्षाबलागोक्षुरकैः स्थितं वा॥१९॥ द्राक्षायापर्णिनीनिर्वाबलयानागरे
णवा॥ श्वदंष्ट्रयाशतावर्यारक्तमिजित्साधितं पयः॥२०॥ छागंपयः स्यात्परमंप्रयोगेगव्यंसृज्यंपंचगुणेजलेवा॥
सशर्करंमाक्षिकसंप्रयुक्तंविदारिगंधादिगणेःसृतंवा॥२१॥ पक्वोदुंबरकाश्मर्यपथ्याखर्जूरगोस्तनाः॥म
धुनाघ्नंतिसंलीढाःरक्तपित्तंपृथक्पृथक्॥२२॥ अतसीकुसुमसमांस्येवयवाचरहास्वर्णां नसापीता॥सा
धयतिरक्तपित्तं यदिभुक्तोमुद्गयूषेण॥२३॥ उशीरकालेयरोध्रपद्मकंप्रियंगुकाकधूलशंखगैरिकाः॥
पृथक्पृथक्चंदनतुल्यमागिकासशर्करास्तंदुलधावनेप्लुताः॥२४॥ अटरूषकरसंरसांजनंलोद्रपां
डुमधुसैंधवान्वितं॥ द्राक्षयापिबतियः प्रियंगवः घ्राणवक्त्रगुदशोणितहारि॥२५॥ सरक्तपित्तंतमकंपि
पासांदाहंचपित्ताः शमयतिसद्यः॥ अतिनिस्तरक्तोवाक्षौद्रयुक्तं पिबेदसृक्॥२६॥ यकृद्वाभक्षयेदा
ममामंपित्तसमायुतं॥ पारापतस्यमांसंवाघृतसिद्धंसशर्करं॥२७॥ भक्षयेन्मधुनाशीतंरक्तपित्तनि
बर्हणं॥ कुमुदोत्पलपत्राणिपद्मसौगंधकानिच॥२८॥ शर्करामधुयुक्तानिघृतभृष्टानिभक्षयेत्॥ खर्जु
रस्याप्रियंगूणांकोविदारस्यशाल्मलेः॥२९॥ पुष्पचूर्णानिमधुनालिह्याद्वारक्तपित्तनुत्॥ वासस्यरसे

पथ्यासमधापरिभाविताः॥२०॥ रक्तस्रावमधुनीलीदारक्तपित्तंद्रुतंजयेत्॥ द्रवेणयावताद्रव्यमेकीभूयाद्र
तांव्रजेत्॥२१॥ तावत्प्रमाणंनिर्दिष्टंभिषग्भिर्जीवनाविधौ॥ ॥अनयामधुसंयुक्ता पाचनीदीपनीमता॥
श्लेष्माणंरक्तपित्तंचहंतिशूलातिसारजित्॥२२॥ लोहगंधेचनिःश्वासेउद्गारेधूमगंधिनी॥ पथ्वीला
शाणमुत्रातुखादेद्विगुणशर्करां॥२३॥ लिह्यात्तथावास्तुकबीजचूर्णंक्षौद्रान्वितंतंदुलतोयपिष्टं॥ लिह्यां
चलाजांजनमेवचूर्णंलिह्यात्तथाक्षौद्रयुतांतुगात्र॥२४॥ क्षीरेयलाख्यांमधुमिश्रेनप्रपीयजीर्णेप ते
यसानुमद्यं॥ सद्योनिहन्याद्रुधिरंततोयंक्रांतार्जुनानामथवापिकल्कः॥२५॥ कल्कंमधूकत्रिफला
र्जुनानांनिशिस्थितंलोहमयेसुपात्रे॥ साम्यंविलिह्यात्सपिवेत्सुशीतंसशर्करंछागपयक्षतार्त्तः॥२६॥
एलापत्रत्वचोर्द्धार्द्धंपिप्पल्यर्द्धपलंतथा॥ सितामधुकखर्जूरमृद्वीकाश्चपलोन्मिताः॥२७॥ संचूर्णम ॥७
॥८५॥ धुसंयुक्तांगुटिकासंप्रकल्पयेत्॥ अक्षमात्रांततश्चैकांभक्षयेच्चदिनेदिने॥२८॥ कासश्वासंज्वरंहिक्कां
छर्दिमूर्छाभदत्रमं॥ रक्तनिष्ठीवनंतृष्णांपार्श्वशूलमरोचकं॥२९॥ शोषप्लीहाढ्यवातांश्चस्वरभेदंक्ष
तक्षयं॥ गुटिकातर्पणीवृष्यारक्तपित्तंविनाशयेत्॥३०॥ एलाद्यागुटिका॥ नासाप्रवृत्तंरुधिरंघृतभृष्टं

श्लक्ष्णा पिष्टमामलकं॥ सेतुरिवतोयधिगं रक्तं छिन्द्यान्मूर्द्धि लेपेन॥४१॥ घ्राणप्रवृत्ते जलमाशु देयं स
शर्करं नासिकयापयोवा॥ द्राक्षारसं क्षीरघृतं पिबेद्वा सशर्करं चेक्षुरसं हितं वा॥४२॥ नस्यं श्रेष्ठं बु
नाशेरवच्चंदनोसलगेरिके॥ नासास्रवन्मनं दूर्वारसस्वूतास्छिजोपिवा॥४३॥ रसोदाडिमपुष्पो
त्थोरसोदूर्वानवोथवा॥ आम्राछिजपलाउवोनासायास्तरक्तजित्॥४४॥ रसोदाडिमपुष्पास्थः
स्तोनस्यगतोसृजी॥ पयोवारसस्तद्वत्सक्षौद्रदूदलीरसः॥४५॥ दूर्वामुसलकिंजल्कमंजिष्टासे
लवालुकं॥ सर्वाश्वेतामुशीरंचमुस्तचंदनपद्मकं॥४६॥ द्राक्षामधुकयष्ट्याह्वकाश्मरीचंदनंसितं॥
विपचेत्कार्षिकैः कल्कैः घृतप्रस्थं सुखाग्निना॥४७॥ तंदुलांबुलजाक्षीरं दत्वाचैवचतुर्गुणं॥ तत्सान्
वामनोरक्तं नासिकाचगतेसृजि॥४८॥ चूर्णान्यायस्यगच्छेत तस्यचूर्णोपपूरयेत्॥ चक्षुश्श्रावणिस्त्के
चपूरयेत्तेनचक्षुषी॥४९॥ मेढ्रपायुप्रवृत्तेचबस्तिकर्मचतद्धितं॥ रोमकूपप्रवृत्तेचतदभ्यंगंप्रयोज
येत्॥५०॥ दूर्वाद्यंचघृतंनामप्रयोज्यंरक्तपित्तनां॥ वृषस्यस्वरसंदत्वाद्रवैरेभिः प्रयोजयेत्॥५१॥
प्रियंगुपद्मकारोध्रमंजनंवाचचूर्णयेत्॥ तच्चूर्णंयोजयेत्तत्र रसेक्षौद्रसमन्विते॥५२॥ नासिका

रा३

॥७॥

मुखपायुस्योयोनिमेढ्रं गुदस्थितं॥ रक्तपित्तं तच्चद्दंतिसिद्धयेषप्रयोगतः॥५३॥ यथाग्नास्त्रक्षतेनैवर
क्तंतिष्ठति वेगितं। दप्पनेन चूर्णेन तिष्टत्सेवाक्चूर्णितं॥५४॥ मेढ्रं गुतिप्रवृत्ते तु बस्तिनत्तुरसं ज्ञितः॥
श्रतं क्षिरं पिबेद्वापि पंचमूल्यास्तृणाव्हया॥५५॥ सच्छागदुग्धश्चर्शर्वरीस्वरसो हिनो दाडिमपुष्पजश्च॥
वासासमग्रा खंसहपुष्पमूलां स्त्याक्ष्र षापं कुसुमानि। वास्याः॥ प्रदाय कल्कं विपचेद्घृतं तत्सक्षौद्रमास्य
विनिहंति रक्तं॥५६॥ ॥वासाघृतं॥ ॥सणस्यकोविदारस्य च षस्य कुकुभस्य च। पुष्पंचूर्णं त्वाप्रयासे
ति पुष्पकल्कंचतुंपलं॥५७॥ शतावरी दाडिमतिंतिडीकं काकोलिमेदे मधुकं विदारिं॥ पिष्ट्वा च मूलं प
लपूरकस्य घृतं पचेत्क्षीरचतुर्गुणेन॥५८॥ कासज्वरानाहविबंधशूलं तद्रक्तपित्तं च घृतं निहंन्या
त्॥ ॥शतावरीघृतं॥ ॥शतावर्यास्तुमूलानां रसप्रस्थद्वयं मतं॥५९॥ तत्समं च पचेत्क्षीरं घृतप्रस्थं
विपाचयेत्॥ जीवकर्षभकौ मेदामहामेदा तथैव च॥ काकोली क्षीरकाकोली मृद्वीका मधुकं बला॥ मु
द्गपर्णिमाषपर्णि विदारी रक्तचंदनं॥६१॥ शर्करामधुसंयुक्तं सिद्धं विस्रावयेद्भिषक्॥ रक्तपित्तविकारे
षु वातरक्तगदेषु च॥६२॥ क्षीणशुक्रे च दातव्यं वाजीकरणमुत्तमं॥ अंगदाहं शिरोदाहं ज्वरं पित्तसमुद्भवं॥६३॥

॥७॥

योनिशूलं प्रवाहं च मूत्रकृच्छ्रं च पैत्तिकं॥ एतान् रोगान् निहंत्याशु छिन्नाभ्रमिव मारुतः॥६५॥ शतावरी
सर्प्पिरिदं बलवर्णाग्निवर्द्धनं॥ शतावरीघृतं चास्मिन् शर्करा मधुपादिकं॥६६॥ मधुना पादिकं देयं
वासासर्प्पिषि चोत्तमं॥ ॥शतावरीघृतं॥ ॥कूष्मांडकात्पलशतं सुस्विन्नं निःकुलीकृतं॥ पचेत्तप्ते घृ
तप्रस्थे शनैस्ताम्रमये दृढे॥६८॥ यदा मधुनिभः पाकस्तदा खंडशतं न्यसेत्॥ पिप्पलीशृंगवेराभ्यां द्वे
पले जीरकस्य च॥६९॥ त्वगेलापत्रमरिचधान्यकानां पलार्द्धकं॥ न्यसेच्चूर्णीकृतं तत्र दार्व्या संघट्टये
त्तदा॥७०॥ लेहीभूते सुशीते च दद्यात्क्षौद्रं घृतार्द्धकं॥ तद्यथाग्निबलं खादेद्रक्तपित्ती क्षतक्षयी॥७१॥
सिद
कासश्वासतमश्छर्दितृष्णाज्वरनिपीडितः॥ वृष्यं पुनर्नवकरं बलवर्णप्रसादनं॥७२॥ उरःसंधा
नकरणं बृंहणं स्वरबोधनं॥ अश्विभ्यां निर्मितं श्रेष्ठं कूष्मांडकरसायनं॥७३॥ यच्च पित्तज्वरे प्रोक्तं
बहिरंतश्च भेषजं॥ रक्तपित्ते हितं तच्च क्षीणक्षतहितं च यत्॥७४॥ शालिषष्टिकनीवारस्त्वणमु
द्गमसूरकाः॥७४॥ पटोलनिंबवेत्राग्रतंदुलीयादयो हिताः॥ शालिषष्टिकगोधूमयवमुद्गा
दयः शुभाः॥७५॥ इति रक्तपित्तचिकित्सितं नवमोऽध्यायः॥ ॥अथ राजयक्ष्माचिकित्सितं व्याख्यास्यामः॥
वे

सपीप्पलीकं सयवं सकुलत्थं सनागरं दाडिमं आमलकोपेतं स्निग्धं मांसरसं पिबेत् ॥ ७६ ॥ तेन षड्
ड्विनिवर्त्तंते विकाराः पीनसादयः ॥ दध्यते द्विगुणं मांसं सर्वतोष्टगुणं जलं ॥ ७७ ॥ पादस्थं संस्कृ
तं चाज्ये षडंगो यूष उच्यते ॥ धान्यकं पिप्पली विश्वदशमूली जलं पिबेत् ॥ ७८ ॥ अश्वगंधामृताभी
रुदशमूली बलावृषं ॥ पुष्करातिबलाघ्नं तिक्षयं क्षीररसासिन ॥ ७९ ॥ दशमूली बलारास्नापुष्क
रं सुरदारुची ॥ नागरेः क्वथितं तोयं पार्श्वार्तिकासशांतये ॥ ८० ॥ स्थिरापुनर्नवारेंडं सूर्पवनकसज्जी
रकाः ॥ श्वदंष्ट्रा भीरुलांगूली विदारी हंसपादिका ॥ ८१ ॥ वृहत्यो वृश्चिकाली च द्वेसहे कंटकारि बला ॥
त्रोपृ गुल्मानिलश्वासकासपित्तहरो गणः ॥ ८२ ॥ बलांस्थिरां पृष्टिपर्णीं वृहतीसनिदिग्धिकां ॥ सा
धयित्वा रसे तस्मिन्पयामंधं सनागरं ॥ ८३ ॥ द्राक्षाखर्जूरसर्प्पिर्भिः पिप्पल्यैव सहस्तं ॥ सक्षौद्रं ज्वर
कासघ्नं स्वर्यं चैतत्प्रयोजयेत् ॥ ८४ ॥ मूलकानां कुलत्थानां यूषैर्वा सूपसंस्कृतैः ॥ गुहेशयाः सप्रस
हाः सोरगाः सजलेशयाः ॥ ८५ ॥ सधान्यजवगोधूमाः मुक्ताश्चापि सदा हिताः ॥ छागं मांस पयः छा
गं छागं सर्प्पिः सशर्करं ॥ ८६ ॥ छागोपसेवा सततं छागमध्ये तु यक्ष्मनुत् ॥ मधुनाद्यैर्विडंगाश्म
सा

॥८७॥

॥८९

वचुल्लोहघ्नाज्ञया॥८७॥ घ्नंतियक्ष्माणमत्युग्रं सेव्यमाना हितासिना॥ शिलाजितुमधुव्योष ताप्यलोहर
जो सिच॥८८॥ क्षीरभुक्छेहिनश्याशुक्षयक्षयमवाप्नुयात्॥ कृष्णाद्राक्षासितालेहः क्षयहा क्षोद्रतैलवा
न्॥८९॥ मधुसर्पिर्युतोवाश्वगंधा कृष्णासितोद्भवः॥ शर्करामधुसंयुक्तंनवनीतंलिहन् क्षयी॥९०॥
क्षीराशीलभवेत्पुष्टिंतत्तुल्यंवाज्यमाक्षिकं॥ सितोपलातुगाक्षीरीपिप्पलीबकुलत्वचः॥९१॥ अंत्यादू
र्द्ध्वं द्विगुणितंलेहयेन्मधुसर्पिषि॥ चूर्णितंप्राशयेद्वन्श्वासकासकफातुरो॥९२॥ पार्श्वशूलिनम
ल्पाग्निमुपजिह्वमरोचकं॥ हस्तपादांगदाहेषुज्वरेरक्तेतथोर्द्ध्वगे॥९३॥ ॥शितोपलादि॥ ॥दशमू
लिस्तात्क्षीरात्सर्पिर्यदुदियान्नवं॥ तत्क्षणान्मधुसंयुक्तंघृतंस्वरविबोधनं॥९४॥ प्रातःपुष्यानतंकुष्ठं
मधुकंदेवदारूच॥ पिष्टालेपःससर्पिष्कः पृष्टपार्श्वांगरुक्नुच॥९५॥ तालीसपत्रमरिचंनागरंपिप्प
लीशुभा॥ यथोत्तरंभागवृध्यात्वगेलेचार्द्धभागिके॥९६॥ पिप्पल्यष्टगुणेचात्रप्रदेयासितशर्करा॥
कासश्वासारुचिहरंतच्चूर्णंदीपनंपरं॥९७॥ हृत्पांडुग्रहणीरोगप्लीहशोषज्वरापह॥ छर्द्यतीसा
रशूलघ्नंमूढवातानुलोमनं॥९८॥ एलाजमोदामलकाभयाख्यगायत्रिनिवासनशाल्सारान्॥

ह

ते र

विडंगभल्लातकचित्रकोग्रां कटुत्रिकं नागरसुराष्ट्रजं च ॥ ९९ ॥ पक्त्वा जले तेन पचेत्तु सर्पिस्तस्मिंस्तु सिद्धे
त्वचतारिकैं तु ॥ त्रिंशत्पलान्यत्र सितोपलया दद्यात्तु गोक्षीरपलानि षड्च ॥ १०० ॥ प्रस्थे घृतस्य द्विगु
णं च दद्यात्क्षौद्रं ततो मंथहतं निदध्यात् ॥ पलं पलं प्रातरतो लिहेच्च पश्चात्पिबेत्क्षीरमतंद्रितश्च ॥ १ ॥
एतद्धि मेध्यं परमं पवित्रं चक्षुष्यमायुष्यतमं तथैव ॥ यक्ष्माणमाशु व्यपहंति नूनं पांड्वामयं चैव भगं
दरं च ॥ २ ॥ श्वासं च हंति स्वरभेदकासं हृत्प्लीहगुल्मग्रहणीगदांश्च ॥ न चात्र किंचित्परिवर्जनीयं रसा
यनं चैतदुपास्यमानं ॥ ३ ॥ एलामंथं ॥ ॥ बिल्वं विदारी ह्रस्वा च पंचमूलं पुनर्नवा ॥ पंचानां क्षीर
वृक्षाणां शुंगान्मुष्टिं शकानपि ॥ ४ ॥ एषां कषाये द्विक्षीरे विदार्या रसांस्त्रिके ॥ जीवनीयैः पचेत्कल्के
रक्षमात्रे घृताढके ॥ ५ ॥ सितापलानि पूते च सीते द्वात्रिंशदापयेत् ॥ गोधूमपिप्पलीवासी चूर्णं शृंग ॥ ५० ॥
॥ टकस्य च ॥ ६ ॥ समाक्षिकं कौडविकं तत्सर्वं खनमंथितं ॥ स्थानं सर्पिर्गुडां कृत्वा भूर्जपत्रेण वेष्टयेत्
॥ ७ ॥ तान् जग्ध्वा पलिकान् क्षीरं मद्यं चानु पिबेत्कफे ॥ शोषकासक्षतक्षीणश्रम भारकर्शितो ॥ ८ ॥ रक्त
निष्ठीवने तारं पीनसारोचके तथा ॥ हिनापार्श्वशिरःशूले भेदे च स्वरवर्णयोः ॥ ९ ॥ सर्पिर्गुडः ॥ ॥

दघा

बिल्वाग्निमंथश्योनाकः काश्मर्यपाटलाबला॥पर्ण्यश्चतस्रःपिप्पल्यःश्वदंष्ट्राबृहतीद्वयं॥२४॥शृंगीतांअ
मलकीद्राक्षाजीवंतीपुष्करागरुः॥अभयाचामृतावृद्धिर्जीवकर्षभकौसठी॥२५॥मुस्तापुनर्नवामेदाम्ल
क्ष्मैलोत्पलचंदने॥विदारीवृषमूलानिकाकोलीकाकनासिके॥२६॥एषांपलोन्मितान्भागान्शतान्या
मलकस्यच॥पंचदद्यात्तदैकस्थंजलद्रोणेविपाचयेत्॥२७॥ज्ञात्वागतरसंगव्यंस्संगृह्णीतगालितं॥मे
मंथामलकमुद्धृत्यनिःकुलंतैलसर्पिषोः॥२८॥पलद्वादशकेभ्रष्ट्वादत्वाचार्द्धतुलांभिषक्॥मत्स्यंडिका

पलं

याःपुतायाःलेहवत्साधुसाधयेत्॥२९॥षट्पलंमधुनश्चात्रसिद्धसीतेप्रदापयेत्॥चतुंगाक्षीर्याः

को॥

पिप्पलाद्विपलंतथा॥३०॥पलमेकंनिदध्याच्चत्वगेलापत्रकेसरात्॥इत्ययंच्यवनप्राशःपरमुक्तौर
सायनः॥३१॥कासश्वासहरश्चैवविशेषेणोपदिश्यते॥क्षीणक्षतानांवृद्धानांबालानांचांगवर्द्धनं

पं३

॥३२॥स्वरक्षयमुरोरोगंवातशोणितं॥पिपासामूत्रशुक्रस्थान्दोषांश्चाप्यपकर्षति॥३३॥अस्यमात्रा
प्रयुंजानोयथारुच्यग्निभोजनं॥अस्यप्रयोगाच्यवनःसुवृद्धोभूत्पुनर्नवः॥३४॥मेधांस्मृतिकांती
मनामयंचमायुःप्रकर्षंबलमिंद्रियाणां॥स्त्रीषुप्रहर्षंपरमाग्निवृद्धिंवर्णप्रसादंपवनानुलोम्यं॥

हद्रोगे

रसायनस्यास्यनरप्रयोगाल्लभेतजीर्णोपिकुटीप्रवेशात्॥ क्षतक्षयंसर्वमयास्यरूपंबिभर्त्तिरूपंनव
यौवनानां॥२४॥ केचिदिच्छंतिमत्स्यंड्याः स्थानेतुसितशर्करां॥ मद्दुः कल्कः सरूसाक्तोद्रष्टधात्र्याःप्र
शस्यते॥२५॥ च्यवनप्राशः॥ ॥द्विपंचमूलीस्वयंगुप्ताशंखपुष्पी सं ठी बला॥ हस्तिपिप्पल्यपामा
र्गपीप्पलीमूलचित्रकाः॥२६॥ भार्गीपुष्करमूलंचद्विपलांशं॥ नु यवाढकान्॥ हरीतकीशतंचैकं जल
द्रोणेविपाचयेत्॥२७॥ तेलात्तसपिप्पलीर्णा॥ सिद्धसित्तेचमाक्षिकान्॥ लेहयेन्न्द्वभयेनित्यमतःस्वादेद्र
सायनात्॥२८॥ यवश्चिन्ने कषायंतुपूतंतच्चाभयान्वितं॥ पचेद्गुडतुलांदत्त्वाकुडवंचपृथग्घृतं॥२९॥
तद्वलीपलितंहन्याद्वर्णायुर्बलवर्द्धनं॥ पंचकासान्क्षयंश्वासंहिक्कासविषमज्वरान्॥३०॥ हन्याच्च
लानि बृहत्यो पूतिकस्य च ॥ १० ॥ गवेधुकस्य मूलानि तथा सहचरस्य च ॥ एषां दशपलान् भागान् जल
द्रोणे विपाचयेत् ॥ ११ ॥ पादावशेषे पूते च गर्भं चैनं समाचपेत् ॥ पुनर्नवा वचा दारु शताव्हा चंदनागरुः ॥ १२ ॥
शैलेयं तगरं कुष्टं एला मांसी स्थिरा बला ॥ अश्वगंधा सैंधवं रास्ना पलार्द्धानि च पेषयेत् ॥ १३ ॥ गव्याजः
पयसः प्रस्थौ द्वौ दद्यात्तत्र प्रदापयेत् ॥ शतावरीरसप्रस्थं तैलं प्रस्थं विपाचयेत् ॥ १४ ॥ अस्य तैलस्य सिद्ध
स्य शृणु वीर्यमतः परं ॥ आयुष्मांश्च नरः पीत्वा निश्चयेन दृढो भवेत् ॥ १५ ॥ गर्भमश्वतरी विद्यात्किं पुन

॥७५॥

र्मानुषी तथा ॥ हृच्छूलं पार्श्वशूलं च तथैवार्द्धावभेदकं ॥ १६ ॥ अपचीं गंडमालां च वातरक्तं गलग्रहं ॥ नारा
यणमिति ख्यातं शुभं वातविकारिणां ॥ १७ ॥ महानारायणं तैलं ॥ ॥ बिल्वमग्निमंथं श्योनाकं पाटलां कंटकारिकां ॥
...

॥७॥

ल्कमालती ॥ पुष्पीहीवेरमधुकसारिवापद्मकेसरैः ॥ १८ ॥ शतं पक्त्वाश्वगंधाया जलद्रोणे विपाचयेत् ॥
विश्राव्य विपचेत्तैलं दत्वा क्षीरं चतुर्गुणं ॥ १९ ॥ मेदा पुनर्नवा द्राक्षा मंजिष्ठा बृहतीद्वयैः ॥ एलैलवाल

१२

त्रिफलामुस्तचंदनपद्मकैः॥१७०॥ पक्वं रक्तामयं वातरक्तं पित्तं सगदं॥ हन्यात्सुप्तिं च कुब्जं बलं कुर्यात्सानाभ्यं
गानुवासनैः॥१॥ अश्वगंधाद्यं तैलं॥ ॥माषात्तसीयवकुरंटककंटकारीगोकंटकटिंदुकजटाश्च पिब
धुत्तोयैः॥ स्वयंगुप्तासमास्थिसपट्बीजकुलत्थकोलाक्वाथनवस्तापिसितस्य रसेन वापि॥२॥ शुद्ध्या समा
गंधिकया सितपुष्पपाचसैरंडमूलसपुनर्नवया सरण्या॥ रास्नाबलामृतलतात्रिवृदुर्बिपक्वमाषाख्य
मेतदवबाहुहरं च तैलं॥३॥ अर्द्धांगशोषमपतानकमाद्यवातमाक्षेपकं पनुजकं पशिरःप्रकंपं॥ नस्येन
बस्तिविधिना परिषेचनेन हन्यात्कटीजघनजानुभुजं समीरम्॥४॥ माषतैलं॥ ॥माषक्वाथबलाक्वाथे
रास्नायादशमूलजे॥ यवकोलकुलत्थानां छागमांसं न वेसथके॥५॥ प्रस्थं तैलस्य चैकस्य क्षीरं दत्वा च
तुर्गुणं॥ रास्नात्मगुप्तासिंधूत्थशताह्वैरंडमुस्तकैः॥६॥ जीवनीयबलाव्योषैः पचेदक्षसमैर्भिषक्॥ हस्त
कंपे शिरःकंपे बाहुशोषे चबाहुके॥७॥ बाधिर्ये कर्णशूले च कर्णनादे च दारुणे॥ विश्वाच्यामर्दिते कुब्जे ग
ध्रस्यामपतानके॥८॥ बस्त्याभ्यंजनपानेषु पावनेषु प्रयोजयेत्॥ माषतैलमिदं श्रेष्ठं उर्द्धजंत्रुगदापहं॥
॥९॥ वृहन्माषतैलं॥ ॥द्वि पंचमूलीनि काथ्य तैलघोनेके ड्वानिर्गुणोः॥ माषाढकं साधयित्वा तन्निर्यू

हं च चतुर्गुणं ॥१०॥ ग्राहयित्वा च विपचेत्तैलप्रस्थं पृथक् समं ॥ कल्कार्थं च समावाप्य भिषक् द्रव्याणि बुद्धि
मान् ॥११॥ अश्वगंधां सठीं दारु बलां रास्नां प्रसारणीं ॥ कुष्ठं परूषकं भार्गीं द्विविदार्ये पुनर्नवा ॥१२॥ मातुलुं
गफलाजाज्यौ रामठं शतपुष्पिका ॥ शतावरीं गोक्षुरकं पिप्पलीमूलचित्रके ॥१३॥ जीवनीयगणं सर्वं
संहत्यैवं ससैंधवं ॥ तत्साधु सिद्धं विज्ञाय माषतैलमिदं हरेत् ॥१४॥ बस्त्यभ्यंजनपानेषु नावने च प्रयो
जयेत् ॥ पक्षाघाते हनुस्तंभे चार्दिते सापतंत्रके ॥१५॥ अवबाहुकविश्वाच्यो खंजपंगुलयोरपि ॥
या० ६ ॥७६॥ हस्तकंपे शिरःकंपे कुब्जे मान्ययोरपि ॥१६॥ हनुमन्याग्रहे चैव अधिमंथे च वातिके ॥ शुक्रक्षये कर्णना
देकर्णशूले च पूरणे ॥१७॥ कैल्लायखंजं नामने भैषज्यमिदमादिशेत् ॥१८॥ महामाषतैलं ॥ ॥कृतद्वि ॥७
मूलबलातिबलानां यद्बहुलेन रसेन विपक्वं ॥ तैलमनल्पतुषोदकसिद्धं मारुतमस्थिगतं प्रहरेत् त ६
॥१९॥ कृतद्व्याद्यं तैलं ॥ ॥रसोनकल्कस्वरसैर्विपक्वं तैलं पिबेद्यस्त्वनिलामयार्त्तः ॥ तस्याशु नश्यं
र ति हि वातरोगा ग्रंथ्या विन्नाला इव दुर्गहीनाः ॥२०॥ रसोनतैलं ॥ ॥प्रसारण्यास्तुलामश्वगंधायाश्च द
शमूलतः ॥ तुल्यं तुल्यं पचेद्वारि द्रोणपक्षांशशोषितं ॥२१॥ तैलाढकं चतुःक्षीरं दधितुल्यं द्विकांजि

के॥ द्विपलैर्ग्रंथिकससारप्रसारिण्यप्लसैंधवैः॥२२॥ समंजिष्ठाग्निर्यष्ट्याह्वैर्पलिकैर्जीवनीयकैः॥सु
ध्यांपंचपकं दत्वात्रिंशाङ्काल्लुतकानिचा॥२३॥ पचेद्दासत्तदिनावातंहंतिसंधिशिरोगतं॥पुंस्त्वाहापस्म
तिप्रज्ञाबलवर्णाग्निवर्द्धये॥२४॥ अक्षांसौवर्चलंतैतयंमेध्यंवातहृत्स्मृतं॥ ॥प्रसारणितैलं॥ ॥प्रसा
रण्यैतैलं॥ ॥प्रसारणीशतंक्षुण्णंपचेत्तोयार्मणेस्तुभे॥२५॥तेनपादावशेषेणतैलंदद्यात्सवांजिकं॥
द्विगुणंचपयोदद्यात्कल्कान्द्विपलिकास्तथा॥२६॥चित्रकंपिप्पलीमूलंमधुकंसैंधवंवचा॥शतपुष्पां
देवदारुरास्नावारुणपिप्पली॥२७॥प्रसारिण्याश्चमूलानिमांसीभल्लातकानिच॥पचेन्मद्वग्निना
तैलंवातश्लेष्मानिलान्जयेत्॥२८॥अशीतिर्नरनारीस्थान्वातरोगान्व्यपोहति॥कुब्जानूतिमिपरपं
गुत्वंगध्रस्यामर्दितंतथा॥२९॥हनुपृष्टंशिरोग्रीवास्तंभंचाशुनियच्छति॥ ॥कुब्जप्रसारणीतैलं॥ ॥
समूलपत्रामुत्साद्यशरत्कालेप्रसारणी॥३०॥शतंयाह्यंसहचरात्सतावर्याःशतंतथा॥बलाश्वगंधा
त्मगुप्ताकेतकीनांशतंशतं॥३१॥पचेच्चतुर्गुणेतोयेद्रव्येस्तोलाढकंभिषक्॥मस्तुमांसरसंचुक्रंप
यसश्चाढकंढकं॥३२॥दध्याढकसमायुक्तं॥पाचयेन्मृदुनाग्निना॥द्रव्याणांतुप्रदातव्यामात्राता

द्रूपलानि क्षा ॥८४॥ नगरं चंदनं कुष्ठं चूर्णारं मुस्तकं त्वचं ॥ शंखनासैं धवपिप्पल्यो मांसी मंजिष्ठजंष्टिका

॥८५॥ तथा मेदा महामेदा जीवकर्षभकौ पुनः ॥ रास्ना पुष्पाह्वा व्याघ्रनखं शुंठी देवाह्वमेव च ॥८६॥ काको

लीक्षीरकाकोली वचा भल्लातकं तथा ॥ पीष्य पीत्वा समानेनानुसाधनीयाः प्रसारणी ॥८६॥ नातिप

क्वं न हीनं च सिद्धं पूतं निधापयेत् ॥ यत्र यत्र प्रदातव्या तन्मे निगदितः शृणु ॥८७॥ कुब्जानामथ पंगूनां

वामनानां तथैव च ॥ यश्च स्तब्धस्पंदि चैकांगं येच नाग्नास्थि संधयः ॥८८॥ वातशोणित दुष्टानां वातोपह

तचेतसां ॥ स्त्रीम दक्षीण शुक्राणां वाजीकरणमुत्तमं ॥८९॥ वस्तौ पाने तथाभ्यंगे भोज्ये चैव प्रदापयेत् ॥

प्रयुक्ता नाशयत्याशु वातजान्विविधान्गदान् ॥९०॥ सप्तशतिकाप्रसारणी तैलं ॥ ॥ शाखामूलदलैः प्र

॥७७ सारणितुलास्तिस्त्रः कुरंटतुले घिन्नायाश्चतुरस्तुले त्वरबुतोरास्नान्नारीषात्तुलं ॥ वेवाहात्तु स दे ॥७७

के तत्पत्र घतच्छान्निः क्वाथ्य कुंभांशाके तोयं तैलघटं तुषांबु कलशोदत्वा दढ्नं मस्तुनः ॥९१॥ सुक्तान्

स्थागरसा दध्यैक्षुरसतः क्षीराच्च दत्वा दढ्नं स्यप्तक्षा मर्कटजीवनद्विविदुसा काकोलि क्षारक्षुरा ॥ सूक्ष्मेला

घनसारकुंदसरलाद्भार्ङ्गीमारमांसीनखैः श्लिय्योत्पलपद्मकाह्वयनिशाकाकोल्लिकग्रंथिकैः ॥९२॥

चांगेर्यांनयचोरकपूगकुष्ठरास्नाराजीपुष्पाभीरुमिश्रीवासामरदारुचंदनवचाशैलेयसिंधुद्भवैः ॥
शैलेयमोदकटंकणराग्निनलिकाव्याघ्रीनखसच्चोरकैः कस्तूरीदशमूलकेतनतंशतामांसीगंधांबुभिः ॥
॥ ४३ ॥ क्वाथैंतीतार्क्ष्यतत्रशल्लकीफल्गुलघुश्यामाशताह्वाभयैः मल्लातत्रिफलांबुचूसरमहाश्यामालवं
गान्वितैः ॥ सव्योषैस्त्रिफलैर्महीयसीपचेन्मंदेनपात्रेग्निनापानाभ्यंजनवस्तिनस्यविधिनातन्
मारुतंनाशयेत् ॥ ४४ ॥ सर्वांगैकांगगतंतथाचयवगंसंध्यस्थिमज्जाश्रीतंश्लेष्मस्थानपिपेतिरा
श्वशमयेन्नानाविधानामयान् ॥ धातूंश्वंहयतिस्थिरंश्चकुरुतेपुंसांनवंयौवनंवृद्धस्यापिबलंक
रोतिसमुहद्बंध्यासुगर्भप्रदं ॥ ४५ ॥ पीत्वातैलमिदंसुक्षितु सुतंरस्तनेमुनान्रूरुहाः सिक्ताः शोषमुपा
गताश्चफलिनः स्निग्धाभवंतिस्थिराः ॥ नाग्नांगाःसुदृढाभवंतिमनुजागावोहयाःकुंजराः
॥ ४६ ॥ एकादशांतिकंमहाप्रसारणीतैलं ॥ ॥ यागंधंकेत
केनांवहतिपरिमलंवर्णनःपिंजरानास्वादेतिक्ताकटुर्वापरिलघुतुलितामर्दितापिच्छिलाच ॥ दग्धा
नोयातिभस्मंचिमचिमतिन्वरीमर्चर्मर्मगंधाहुताशे ॥ साम्तुद्धाशे ॥ नर्नीयावरम्गनलजाराजयोग्याम

सु ५

दिष्टा॥ ४७॥ कृत्वा तज्जलमध्ये स्थापयित्वा महद्भिः पुनरपि तदग्ध्वं चिन्तनीयं मुहूर्तं॥ न चेतियदि
सरक्तं तज्जलं पीतवर्णं न भवति भगनाभिः कृत्रिमो न्यो विकारः॥ ४८॥ द्वे पले सैंधवास्यं च सुंठ्याश्च
विकन्वित्रकात्। द्वे द्वे भल्लातकास्थी नि विंशति द्वेतयाढके॥ ४९॥ आरनालस्य चेत्प्रस्थं तैलसैते रे
पसदं॥ गध्रस्यरूयहार्शोन्ति सर्ववातविकारनुत्॥ ५०॥ सैंधवाद्यं तैलं॥ ॥ वल्कलायाः सुराया
स्तु सुपक्वायाः शतं घटे॥ ततो द्विन रसोत्तु तु सगुडं कुदितं क्षिपेत्॥ ५१॥ पिप्पलीमूलमजाजी चव्य
चित्रकात्॥ नागरं मरिचं कुष्टचूर्णितावाक्षसंमितं॥ ५२॥ ससाहात्पर तः पेया वातरोगविनाशनी॥
कृमिकुष्टक्षयानाहगुल्मार्शः प्लीह एव तत्॥ ५३॥ अग्निसंदीपनी चैव पांडुरोगविनाशनी॥ सर्पि
तैलवसामज्जापानाभ्यंजनवस्तयः॥ ५४॥ स्वेदाः स्निग्धा निवातं च स्थानं प्रावरणानि च॥ बृंहणं
यच्च यत्सर्वं प्रशस्तं वातरोगिणां॥ ५५॥ रसाः पयांसि भोज्यानि स्वाद्वम्ललवणानि च॥ ॥ इति वं
दे वातव्याध्यधिकारो नाम द्वाविंशतिमः॥ ॥ अथ वातरक्तचिकित्सितं व्याख्यास्यामः॥ ॥ उत्ता
नमवगाढं च द्विविधं वातशोणितं॥ त्वग्मांसाश्रयमुत्तानमवगाढं तरांश्रयं॥ ५७॥ पिंडतैलादिनाभ्यंगः

(margin, left: ७८॥ ; margin, right: मरिचं ५ ; ॥७८॥)

पानंतिक्तादिसर्प्पिषः॥ सेकालेपाह्यसृक्स्रुतिः शोधनंचोभयोर्हितं॥ ५८॥ गाढेविशेषतःसर्प्पिः पानंशुद्धिःसिराव्यधाः॥ गोधूमचूर्णछगलीपयश्चसछागदुग्धोरुबुबीजकल्कः॥ ५९॥ लेपोविधेयंत्रातधौतसर्प्पिःसेकेपयश्चाधिकमेवशस्तं॥ अम्बुनागराधान्याकर्षत्रितयेनपाचनंसिद्धं॥ ६०॥ जयंतिसरक्तवातमांसकुष्टान्यशेषेण॥ वत्सादन्युद्भवः क्वाथः पीतोगुग्गुलुमिश्रितः॥ ६१॥ समीरणसमायुक्तंशोणितंसंप्रसाधयेत्॥ ६२॥ वासागुडूचीचतुरंगुलानामेरंडतैलेनपिबेत्कषायं॥ क्रमेणसर्वांगजमप्यशेषंजयेदसृग्वातभवंविकारं॥ ६३॥ तिक्ताथवापंचगुडूचेन पथ्याजम्बापि वाछिन्नरुहाकषायं॥ तद्वातरक्तंशमयत्युदीर्णमाजानुसंभिन्नमपिद्रवरूपं॥ ६४॥ घृतेनवातंसगुडाविबंधंपित्तंसिताढ्यामधुनाकफंच॥ वातस्गुग्रूरुबुतैलमिश्रंसुंठ्याभवावातंशमयेद्गुडूची॥ ६५॥ अमृताकफवातघ्नीकफमेदोविशोषणी॥ वातरक्तप्रसमनीचकूवीसर्प्पनाशनी॥ ६६॥ गुडूच्याः स्वरसंकल्कंचूर्णंवाक्वाथमेववा॥ प्रभूतकालमासेव्यंमुच्यतेवातशोणितात्॥ ६७॥ तद्वच्छिद्दारीक्षुरकः क्वाथोवातास्त्रनाशनः॥ पटोलत्रिफलाभीरुकटुकामृतसाधितं॥ ६८॥ क्वाथंपीत्वाजयत्यसृ

सा १

सदाहं वातशोणितं ॥ दत्त्याम्लकीसृतं क्षीरं सद्यः शूलनिवारणं ॥६९॥ परिषेकोनिलप्राये तक्तोष्णेन सस
र्प्पिषा ॥७०॥ धात्रीमुस्ताहरिद्राणां कषायं वा कफाधिके ॥ कोकिलाख्यामृताक्वाथे पिबेत्कृष्णां यथाबलं
॥७१॥ पथ्याभोजी त्रिसप्ताहान्मुच्यते वातशोणितात् ॥ कफरक्तप्रशमनं कंडू[illegible]सर्प्पनाशनं ॥७२॥ वि
सैं हास्यपंचमूलं मूलीच्छिन्नरुहैरंडगोक्षुरक्वाथः ॥ एरंडतैलमंथं ठसैं धवचूर्णान्वितः पीतः ॥७३॥
प्रशायति वातरक्तं तथामवाताढ्यं च कटीशूलं ॥ मूत्रपुरीषविबंधं च मर्मविकारश्च दुर्वारं ॥७४॥ अमृ
ताकटुकायष्टीसुंठीकल्कं समाक्षिकं ॥ गोमूत्रपीतं जयति सकफं वातशोणितं ॥७५॥ पिप्पलीवर्द्ध
मानं वा सेव्यं पथ्यां गुडेन वा ॥ त्रिफलायाः कषायं वा कफाधिके प्रयोजयेत् ॥७६॥ सर्प्पिस्तैलवसाम
ज्जापानाभ्यंजनबस्तिभिः ॥ सुखोष्णैरुपनाहैश्च वातोत्तरमुपाचरेत् ॥७७॥ मधुकाद्द्विगुणं तैलं
तैलाद्द्विजं पयो भवेत् ॥ एतद्यथाबलं पेयं वातरक्तविनाशनं ॥७८॥ लेपः पिष्टास्तिलाः सम्यक्भृ
ष्टाः सिनिर्वृताः ॥ क्षीरपिष्टातसी लेपो वर्द्धमानफलेन वा ॥७९॥ रास्नागुडूचीमधुकं बले द्वे सजी
वकर्षभकं पयश्च ॥ घृतं च [illegible]ं मधुशर्करायुक्तो निलार्त्तिप्रणुदस्रदेहः ॥८०॥ सहस्रशतधौतेन

॥७७॥ १५२ ॥७ ६४

घृतेनरुधिरोत्तरे॥ लेपनंउंछंउछ्रशीतेनघृतसर्जरसेनवा॥५१॥ श्लेष्मवातोत्तरे सेकाः मज्जातैल
वसाघृतैः॥ रक्तोत्तरेक्षीरघृतमधुक्षौद्रशीतवारिभिः॥५२॥ लेपनंशाल्मलीवल्कमविक्षीरेणसंयु
तं॥ सेचनंवावकर्तव्यमविक्षीरेःक्षणंक्षणं॥५३॥ शौवातरक्तप्रशमनंशीलयेत्समभाहितः॥ लां
गल्यास्त्वभयासांगचंदमुध्ययत्नतः॥५४॥ योजयेत्त्रिफलालोहरजस्त्रिकटुकैःसह॥ गुग्गुलुं अमृ
मृतवल्लिभिर्मातुलुंगरसेनवा॥५५॥ त्रिफलाछायारसेयुक्तागुटिकाकोलसंमिता॥ भक्षयेन्मधुना
लोद्भ्रमेणुज्ञर्वतियस्यकृच्छ्रं॥५६॥ पादस्फोटंमहाघोरंस्फोटंसर्वांगजंचयत्॥ तत्सर्वंनाशयत्या
शुआसाध्यंचैवशोणितं॥५७॥ त्रिफलानिंबमंजिष्ठावचाकटुकरोहिणी॥ वत्सादनीदारुनि
शाकषायंनवकार्षिकं॥५८॥ वातरक्तंतथाकुष्ठंपामांवैरक्तमंडलं॥ कुष्ठंकपालिकाकुष्ठंपाना
देवापकर्षेति॥५९॥ नवकार्षिकं॥ ॥कर्षादोतुपलंयावद्दद्यात्सोऽग्निकंजलं॥ ततस्तुकुडवंयावत्तो
यमष्टगुणंनचेत्॥६०॥ गुडूचीक्वाथकल्काभ्यांसपयस्कंघृतंसृतं॥ हंतिवातंतथारक्तंकुष्ठंजयति
दुस्तरं॥६१॥ गुडूचीघृतं॥ ॥अमृतायाःपलशतंजलद्रोणेविपाचयेत्॥ तेनपादावशेषेण

॥८०॥

घृतप्रस्थं विपाचयेत्॥९२॥ अमृतायाः फलान्यष्टौ कल्कयेष्वानि कारयेत्॥ चतुर्गुणेन पयसा तैलं क्षीरं च चतुर्गुणं॥९३॥ दत्वा पाकं भवेदेतद्वातास्रकुष्ठनाशनं॥ कामलापांडुरोगघ्नं प्लीहकासज्वरापहं॥९४॥ शतावरीकल्कगर्भं रसे तस्याश्चतुर्गुणे॥ क्षीरतुल्यं घृतं सिद्धं वातशोणितनाशनं॥९५॥ बलाकषायकल्काभ्यां तैलं क्षीरसमं पचेत्॥ सहस्रशतपाकं वातमस्तत्वातपित्तनुत्॥९६॥ रसायनमिदं श्रेष्ठमिंद्रियाणां प्रबोधनं जीवनं बृंहणं स्वर्यं वातासृग्दाहनाशनं॥९७॥ धन्यं पुंसवनं चैव नारीणां शुक्रवर्द्धनं॥ रेतोयोनिविकारघ्नमेतद्वातविकारनुत्॥९८॥ शताह्वयाच कुष्ठेन मधूकेन नतेन च॥ एकैकेन साधितं तैलं वातरक्तरुजापहं॥९९॥ सारिवासर्जमंजिष्ठायष्टीकल्कपयोन्वितं॥ तैलं पक्वं प्रयोक्तव्यं पिंडाख्यं वातशोणिते॥१००॥ मसमधूच्छिष्टमंजिष्टं ससर्जरससाधितं॥ पिंडतैलं तदभ्यंगाद्वातरक्तरुजापहं॥१॥ सारिवासर्जयष्ठ्याह्वमधूच्छिष्टैः पयोन्वितं॥ सिद्धं सेरंडजं तैलं अभ्यंगाद्वातरक्तनुत्॥ पद्मकोशीरयष्ठ्याह्वरजनीक्वाथसाधितं॥ स्यात्सिंधैः सर्जमंजिष्ठावीराकाकोलिचंदनैः॥२॥ खुडाख्यं पद्मकमिदं तैलं रुग्दाहनाशनं॥ बलाचातिबलामेदामस्म

को॰

॥८

रुसांत्रानावरी॥५॥काकोलीं क्षीरकाकोलीरास्नाम हूीचपाचयेत्॥घृतंचतुर्गुणं क्षीरंतैलवावात
रक्तनुत्॥५॥हृत्पांडुरोगविसर्प्पककामलादाहनाशनं॥श्वावणीक्षीरकाकोल्यौ क्षीरिकाजीवकैः समैः
॥६॥सिद्धंसर्षभकैःसर्प्पिःसक्षीरंवातरक्तनुत्॥वमनेहिषवलोचनोदरसन्निभवर्मीर्णस्यगुग्गुलोः
पस्थ॥७॥प्रक्षिप्यतोयद्रोणार्द्धेत्रिफलामम्लायथोक्तपरिमाणं॥संसाधयेत्सम्युक्त्यदर्व्यासंघट
येच्चतावात्॥८॥अर्द्धक्षयितंजातंतोयंज्वलनस्यसंपक्वात्॥अवतार्यवस्त्रपूतंपुनरपिसंसाध
येदयःपात्रे॥९॥सांद्रीभूतेतस्मिन्अवतार्यहिमोपलस्पर्शे॥पथ्याचूर्णंद्विपलंत्रीकटुकचूर्णं
तदक्षपरिमाणं॥१०॥कृमिरिपुचूर्णंद्विपलंकर्षंत्रिवृदंसो॥पलमेकंछिन्नरुहंदहत्वासंमर्द्येत्
तत्प्रयत्नेन॥११॥संस्थापयेच्चगुरुसंस्निग्धभांडेघृतेनसुरभिणं॥आदायतस्यमात्रांविदित्वाति
थिर्दिवतप्रणम्यति॥१२॥खादेद्यथाग्निमनुनोव्याधिबलापेक्षयासम्यक्॥उपयुज्यचानुपाने
यूषंमंडंसुगंधीसलिलंच॥१३॥इच्छाहारविहारेभेषजकालाश्चसर्वस्तुः॥तनुत्वविरोधिवातशो
णितमेकंहित्त्वासुलवणंचिरोत्थमपि॥१४॥भग्नच्युतपस्थितंक्ष्कस्फुटितमपिनिहंतियत्नेन॥व्रणका

सगुल्मं कुष्टश्च यथ्यूदर पांडुरोगामेदांसि ।।१५।। मंदाग्नित्वविबंधे प्रमेहदोषांश्च नाशयति ।। श्व
सततं निषेव्यमाणः कालेन निहंति रोगगणं ।।१६।। अश्विनूयजरादोषं करोति कैशोरकं रूपं ।। ।।
कैशोरको गुग्गुलः ।। ।। प्रस्थमेकं गुडूच्याश्च अर्द्धप्रस्थं तु गुग्गुलु ।।१७।। प्रसेकं त्रिफलायाश्च
तत्प्रमाणं विनिर्दिशेत् ।। सर्वमेकत्र संक्षिप्य क्वाथयेत्तुल्वणे सनसि ।।१८।। पादशेषं परिस्राव्य कषा
यं ग्रहयेद्भिषक् ।। पुनः पचेत्कषायं तु यावत्सांद्रत्वमागतं ।।१९।। दंती व्योषविडंगानि गुडूची त्रिफला
त्वचः ।। ततश्चार्द्धपलं पूतं गृहीयाद्वा प्रतिप्रति ।।२०।। कर्षं तु त्रिवृतायाश्च सर्वमेकत्र चूर्णयेत् ।। वातरक्तं
।।८१।। तथा कुष्टं गुदजान्यग्निसादनं ।।२१।। दुष्टव्रणं प्रदेहांश्च आमवातं तथा गंदरान् ।। नाड्यावानश्च व
पथ्यसर्वं नेतान् व्यपोहति ।।२२।। अश्विभ्यां निर्मितः पूर्वं महिषाख्यश्च गुग्गुलु ।।२२।। महिषगुग्गु ।।८१।।
लुः ।। ।। अमृतायाद्विप्रस्थं प्रस्थमेकं तु गुग्गुलोः ।। प्रत्येकं त्रिफलाप्रस्थं वर्षाभूप्रस्थमेव वा ।।२३।।
सर्वमेकत्र संक्षुद्य क्वाथयेन्नल्वणे नासि ।। पुनः पचेत्साद्रशेषं यावत्सांद्रत्वमागतं ।।२४।। दंतित्रि
वृन्मूलानां कणा विश्वा फलत्रिकं ।। गुडूचीत्वक् विडंगानां प्रत्येकार्द्धपलं मतं ।।२५।। त्वचा कर्ष

पं ४

मेकैकंतुसर्वमेकत्रचूर्णयेत् ॥ सिद्धमुष्णेन्यसेत्तत्र अमृतागुग्गुलोःपलं ॥ २६ ॥ तद्यथाग्निबलंखादेद
स्रपित्ते विशेषतः ॥ वातरक्तंतथाकुष्ठंगुदजान्यग्निसादनं ॥ २७ ॥ दुष्टव्रणप्रदेहांश्च आमवातंभगं
दरं ॥ नाड्याढ्यवातश्वयथून्सर्वानेतान्व्यपोहति ॥ २८ ॥ अभिष्यंनिर्मितेह्येष आमृताख्यस्यगुग्गुलुः
॥ ॥ इति आमृताद्योगुग्गुलुः ॥ ॥ शतावरीनागबलादेवदारुंसमुस्तकाः ॥ २९ ॥ पुनर्नवामृताकृष्णा
वाजिगंधात्रिकंटकाः ॥ पृथक्दशपलानेतान्सूक्ष्मचूर्णानिकारयेत् ॥ तदर्द्धशर्करायुक्तान्चूर्णा
न्संमर्द्दयेद्बुधः ॥ ३० ॥ स्थापयेत्स्नीग्धभांडेतु मध्वर्द्धोढकसंयुतं ॥ एकत्रसर्वमालोड्यत्रिसुगंधि
पलेनच ॥ ३१ ॥ तद्यथाग्निबलंज्ञात्वातस्यमात्रांप्रयोजयेत् ॥ वातरक्तंक्षयंकुष्टंकासंश्वासंमरोच
कं ॥ ३२ ॥ वातपित्तकफप्रायान्द्वंद्वजान्संनिपातकान् ॥ हन्ति संकरोतिपुरुषंवलीपलितवर्जितं ॥ ३३ ॥
योगसारामृतोनामप्रज्ञाकांतिविवर्द्धनः ॥ दिवास्वप्नंवन्हितापंव्यायामंमैथुनंतथा ॥ कटूष्णंगुर्व
भिस्यंदिलवणाम्लानिवर्जयेत् ॥ ३४ ॥ ॥ इतिवंदेवातरक्तचिकित्सितंत्रयोविंशतिमोध्यायः ॥
अथोरुस्तंभचिकित्सितंव्याख्यास्यामः ॥ ॥ भल्लातकामृतासुंठीदारूपथ्यापुनर्नवाः ॥ पंच

॥८२॥

मूलीद्वयोर्भिश्रमुरुस्तंभनिबर्हणं॥७७॥पिप्पलीपिप्पलीमूलंभल्लातकफलानिच॥कल्कंमधुयुतंपी
त्वाउरुस्तंभाद्विमुच्यते॥७८॥ग्रंथीकारुष्करफलानांक्वाथंक्षौद्रान्वितंपिबेत्॥चव्याभयाग्निदारूणांकल्कं
वामधुसंयुतं॥७९॥त्रिफलाचव्यकटुकंग्रंथिकंमधुनालिहेत्॥उरुस्तंभविनाशायपुरंमूत्रेणवापिबेत्
॥८०॥लिह्यात्र्यंत्रिफलाचूर्णंक्षौद्रेणकटुकाग्निकौ॥सुखांबुनापिबेद्वापिचूर्णंषट्धरणंनरः॥८१॥
पिप्पलीवर्द्धमानंवामाक्षिकेणगुडेनवा॥उरुस्तंभेप्रशंसंतिगंडीरेष्टकमेवच॥८२॥सक्षारमूत्रैरश्वे
दंश्चकारंजफलसर्षपैः॥मूलैर्वाप्यश्वगंधायाःमूलैरर्कस्यवाभिषक्॥८३॥पिचुमंदस्यवामूलैर
थवादेवदारुणः॥क्षौद्रसर्षपवल्मीकमृत्तिकासंयुतैर्भिषक्॥८४॥गाढमुत्सादनंकुर्यात्उरुस्तंभेप्र
लेपनं॥दंतिद्रवंतिसुरसासर्षपैश्चापिबुद्धिमान्॥८५॥तर्कारीविश्वसुरसंन्निंबगुवत्सकुनिंबूजैः॥प
पत्रमूलफलैस्तोयंश्रुतमुष्णंचसेवनं॥८६॥कुष्ठंश्रीच्यकोदीच्यसरलंदारुकेसरं॥अजगंधाश्वगंधा
चतिलंतैलंचसार्षपं॥८७॥साक्षौद्रमात्रयातस्मादूरुस्तंभार्दितःपिबेत्॥बलाम्यांपिप्पलीमूलना
गरादश्वकृतकद्वयैः॥८८॥तैलप्रस्थःसमोदभागमस्यूरुग्रहापहः॥यस्यात्कफप्रशमनंनचमारुत

कोपनं॥ तस्सर्वं सर्वदा कार्यमुरुस्तंभस्य भेषजं॥ ४९॥ ॥इति वृंदे उरुस्तंभचिकित्सितं चतुर्विंशतितमो

ध्यायः॥ ॥अथामवातचिकित्सितं व्याख्यास्यामः॥ ॥शुंठीगोक्षुरकक्वाथः प्रातः प्रातर्निषेवितः॥सा

मवातकटीशूलपाचनं रुक्प्रणाशनं॥ ५०॥ रास्नागुडूचीचैरंडदेवदारुमहौषधं॥ पिबेत्सर्वांगजे वाते

सामे संध्यस्थिमज्जगे॥ ५१॥ रास्नामृतारग्वधदेवदारुत्रिकंटकैरंडपुनर्नवाणां॥ क्वाथं पिबेन्नागरचू

र्णमिश्रं जंघोरुपार्श्वत्रिकपृष्ठशूली॥ ५२॥ दशमूलीकषायेण पिबेद्वा नागरांभसा॥ कटिशूलेषु सर्वेषु तै

लमेरंडसंभवं॥ ५३॥ शटीशुंठ्यभयाचोग्रा देवाह्वातिविषामृता॥ कषायमामवातस्य पाचनं रूक्षभो

जनं॥ ५४॥ पिप्पली पिप्पलीमूलं चव्यचित्रकनागरं॥ क्वथितं वा शरेदेतदामवातं सुदारुणं॥ ५५॥ चित्र

का कटुका पाठा कलिंगातिविषामृता॥ देवदारुवचामुस्तानागरातिविषारुणाः॥ ५६॥ पिबेदुष्णांबुना नि

समामवातस्य भेषजं॥ चित्रकेंद्रजवाः पाठा कटुकातिविषाभया॥ ५७॥ आमवातहरश्चैव चूर्णं पेयं सुखां

बुना॥ अलंबुषा गोक्षुरकत्रिफलानागरामृताः॥ ५८॥ अथोत्तरं भागवृद्ध्या श्यामाचूर्णं च तत्समं॥ पिबेन्म

स्तुसुरातक्रकांजिकोष्णोदकेन वा॥ ५९॥ आमवातं जयत्याशु सशोफं वातशोणितं॥ अलंबुषा गोक्षुरम

२१३

लंवाचरूणस्यच॥६०॥गुडूचीनागरंचेतिसमभागानिचूर्णयेत्॥क्रोजितेनतुतत्सेयंबिडालपदसंमितं॥६१॥आमवातेप्रवृद्धेपियोगोयमम्रतोपमः॥मणिमंथस्यभागौद्वौयवक्षारस्यतत्समं॥६२॥त्र्यजमोदभागाश्चनागरंद्वागपंचकं॥दद्याच्चैवहरीतक्यः सूक्ष्मचूर्णकृतंशुभं॥६३॥मस्त्वारनालमूत्रैश्चसुरयाच्छोदकेनवा॥पीतंजयेदामवातगुल्महृद्वस्तिजान्गदान्॥६४॥प्लीहानमथम्रत्आदीनानाहस्यार्शसांहितं॥वातानुलोमनमिदंचूर्णवैश्वानरंस्मृतं॥६५॥हिंगुचव्यबिडंसुंठीकृष्णाजाजीसपुष्करं॥नागोत्तरमिदंचूर्णपित्तवातामजिद्भवेत्॥६६॥तैलमेरंडतैलंवागदसर्पिः सरामठ॥पीत्वामस्त्वारनालेनमिश्रीतंसामवातजित्॥६७॥पुनर्नवासदेवाह्वासठीसुंठीतिक्तातिमः॥प्रसारणीचतर्कारीफलंवामदनस्यच॥६८॥चुक्रकांजिकपिष्टाश्चसुम्ल्लक्ष्णालेपनेहिताः॥पुनर्नवार्कबृहतीवर्द्धमानफणिज्जकैः॥६९॥कल्पयेत्क्वाथमेतैस्तुदूर्वाशिग्रुसनेर्निषक्॥स्वेचनंसामवातस्योरुबूकपयसापिवा॥७०॥

इतिवैद्यअमवातचिकित्सितंपंचविंशतिमोध्यायः॥ ॥अथशूलचिकित्सितंव्याख्यास्यामः॥ ॥

चूर्णतदेतदितितुंबरपुष्कराह्वःपथ्यांम्लवेतसबिडंरुचकंसहिंगु॥सिंधुद्भवेनसहितंयववारिपीतं

१८८॥ १८८॥

शूलापतंत्रकविकारहरं प्रदिष्टं ॥ तुंबरूण्यभया हिंगु पुष्करं लवणत्रयं ॥ पिबेद्यवांबुना प्रातः शूलगुल्मा
पतंत्रकी ॥ ७३ ॥ हिंगु सौवर्चलं पथ्या बिडं सैंधवतुंबरु ॥ पौष्करं च पिबेच्चूर्णं दशमूलजवांभसा ॥ ७४ ॥
पार्श्वहृत्कटिपृष्ठानां शूलतंत्रापतानके ॥ श्लेष्मणा वेप्रसेके च विगलरोगे च शस्यते ॥ ७५ ॥ विश्वोरुबू
कदशमूलयवांभसेन तु द्विक्षारहिंगुलवणत्रयपुष्कराणां ॥ चूर्णं पिबेद्धृदयपृष्ठकटिग्रहार्म
पक्षांशयां शात्रिशिरज्वरपार्श्वशूली ॥ ७६ ॥ एरंडबिल्वबृहतिद्वयमातुलुंगपाषाणभित्त्रिकटुमूल
कृतः कषायः ॥ सक्षारहिंगुलवणो रुबुतैलमिश्रश्रोण्यूरमेंद्रहृदयस्तनरुक्षु पेयाः ॥ बलापुनर्नवे
रंडबृहतिद्वयगोक्षुरैः ॥ सहिंगुलवणैः पितं सद्यो वातरुजापहं ॥ ७८ ॥ चूर्णं समरुचकं हिंगु महौष
धीनामुष्णांबुना कफसमीरणसंभवासु ॥ ७९ ॥ हृत्पार्श्वपृष्ठजठरार्तिविशूचिकासु पेयं तथा यवरसेन
न विड्विबंधाः ॥ ८० ॥ हिंग्वम्लवेतसामलकं यवास्तिद्राक्षाभयासैंधवतुल्यभागं ॥ चूर्णं पिबेद्वारुणिमं
डमिश्रं शूले प्रवृद्धे निलजे शिवाय ॥ ८१ ॥ यवानिहिंगुसिंधूत्थक्षारसौवर्चलाभयाः ॥ सरामंडेन पा
तव्या वातशूलनिषूदनाः ॥ ८२ ॥ सौवर्चलाग्निकाजाजीमरिचैर्द्विगुणोत्तराः ॥ मातुलुंगरसैः पिष्टा गु

पे२

क्रिमिघ्नं शूलहृत् ॥८१॥ शुक्ताम्लवेतसव्योषयवानीलवणत्रिकैः ॥ बीजपूररसोपेतैर्गुटिका वातशूलनु
त् ॥८२॥ बिल्वैरण्डतिलैः कृत्वा गुटिकां सोष्णभेषिता ॥ वातशूलोपशान्त्यै सद्य प्रमथ्यादुष्ट्यानया ॥८३॥
पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ॥ यवागूः पानीयास्याः शूलघ्नी चोपसाधिता ॥८४॥ सहिं
गुतुंबरव्योषयवानिचित्रकानयाः ॥ ससारलवणैश्चूर्णं पिबेत्प्रातः सुखांबुना ॥८५॥ विण्मूत्रानि
लशूलघ्नं पाचनं वह्निदीपनं ॥ बिल्वमूलमथैरण्डं चित्रकं विश्वभेषजं ॥८६॥ हिंगुसैंधवसंयुक्तं स
द्यः शूलनिवारणं ॥ निर्दग्धिकाबृहत्यौ च कुशकासेक्षुबालिकाः ॥८७॥ श्वदंष्ट्रैरण्डमूलानि वारिणा
सह पाचयेत् ॥ पिबेत्सशर्कराक्षौद्रं शूलपित्तानिलात्मके ॥८८॥ शतावरीरसयष्ट्याह्ववाघलक्ष्मण
ज्वह्ना गोक्षुरो ॥ शृतं शीतं पिबेत्तोयं सगुडक्षौद्रशर्करं ॥९०॥ पित्तासृग्दाहशूलघ्नं सद्यो दाहज्वरा
पहं ॥ त्रिफलारिष्टयष्ट्याह्वकटुकारग्वधैः शृतं ॥९१॥ पाययेन्मधुसंमिश्रं दाहशूलोपशान्तये ॥ त्रि
फलारग्वधंक्वाथं सक्षौद्रं शर्करान्वितं ॥९२॥ पाययेद्रक्तपित्तघ्नं दाहशूलनिवारणं ॥ शतावरीरसं
क्षौद्रयुक्तं प्रातः पिबेन्नरः ॥९३॥ दाहशूलोपशान्त्यै सद्यः सर्वपित्तामयापहं ॥ पटोलत्रिफलारिष्टैः शृ

स्रो१
॥८९॥
त्रि २
॥८

तंक्षौद्रयुतं पिबेत्॥९४॥पित्तश्लेष्मज्वरछर्द्दिदाहशूलोपशांतये॥धात्र्यारसं विदार्या वा त्रायंती गोस्त
नांबुना॥९५॥पिबेत्सशर्करां क्षौद्रं पित्तशूलविमर्द्दनं॥सौवर्चलं दाडिमं च तथा हिंग्वम्लवेतसं॥९६॥
महौषधं च पीतानि नाशयंत्यपतंत्रकं॥कंबलावृत्तदेहस्य प्राणायामं विकुर्वतः॥९७॥कृद्धतैलेन तु
सक्तूनां धूपशूलनिवारणं॥शंखचूर्णं सलवणं सहिंगुव्योषसंयुतं॥९८॥उष्णोदकेन तत्पीतं शूलं
हंति त्रिदोषजं॥गोमूत्रसिद्धं मंडूरं त्रिफलाचूर्णसंयुतं॥९९॥विलिहन्मधुसर्पिर्भ्यां शूलं हंति त्रि
दोषजं॥तीक्ष्णायश्चूर्णसंयुक्तं त्रिफलाचूर्णमुत्तमं॥१००॥प्रयोज्यं मधुसर्पिर्भ्यां वातशूलनिवा
रणं॥मूत्राम्लपाचितां शुष्कां लोहचूर्णसमन्वितां॥१॥सगुडामनयां दद्यात्सर्वशूलोपशांतये॥त्रि
फलायास्तथा धात्र्याश्चूर्णं वा काललोहजं॥२॥शर्करचूर्णसंयुक्तं सर्वशूलेषु लेहयेत्॥त्रिफला
क्वाथगोमूत्रक्षौद्रक्षीररसोपथ्यवा॥३॥एरंडतैलद्विगुणे र्हितं शांस्ये विरेचनं॥शंबूकजं भस्म पीतं
जलेनोष्णेन तत्क्षणात्॥४॥पक्तिजं विनिहंत्याशु शूलं विष्णुरिवासुरान्॥शंबूकमूषणं चैव पंच
वल्कचणानि च॥५॥समांशां गुटिकां कृत्वा कुलंबुकरसेन वा॥प्रातर्भोजनकाले वा नक्षयीत यथाबलं॥६॥

॥८५॥

शूलाद्विमुच्यतेजंतुःसहसापरिणामजात्॥एरंडवन्हिशंबूकवर्षाभूगोक्षुरंसमं॥८॥अंतर्दग्धापि
बेदग्धिरूक्षाभिःशूलशांतये॥यःपिबतिसप्तरात्रंसक्तुनेकानकुलत्थयूषेण॥९॥सजयतिपरिणामा
रूषंचिरजामपिक्षिप्रनूतनजां॥समाधिगुडंसर्पिःप्रस्थंक्षीरंचतुर्गुणं॥९॥पक्वंपीत्वाजयत्या
शुपक्तिजंशूलमुद्धतं॥सम्बिन्नंहितुलार्द्धंस्याद्द्राक्षंकुष्मांडकासुरवं॥१०॥निष्पीड्यमुदकेनेन
प्रस्थंचामलकीरसं॥खंडस्यचतुलार्द्धंस्यात्प्रस्थार्द्धंसर्पिषोभवेत्॥११॥चूर्णीकृतंचकुडवंपि
प्पलीपरिणामनुत्॥मरिचस्यपलंचैकंसुंठीद्विपलसंयुतं॥१२॥तालीसपत्रंधान्यंचचतुर्जातंस
मुस्तकं॥कर्षप्रमाणंतत्कार्यंप्रस्थार्द्धंमधुनासह॥१३॥सर्वशूलापहंश्रेष्ठंपरिणामकृतंतथा॥
वातपित्तकृतान्रोगान्स्वीसकासापहंपरं॥१४॥हृत्शूलमम्लपित्तंचहन्यात्शूलंसुदुस्तरं॥खंडंचाद्वि
पिबेत्प्राज्ञोरसायनमिदंमहत्॥१५॥षडसामलकीनाम्नाकृष्णात्रेयेणपूजिताः॥वमनंलंघनंस्वेदः
पाचनंफलवर्त्तयः॥१६॥क्षारचूर्णानिगुटिकाःसम्यंतेशूलनाशनाः॥ ॥इतिवैद्यशूलापनंत्राधिका
रोनामषड्विंशोध्यायः॥ ॥अथानाहोदावर्त्तचिकित्सितंव्याख्यास्यामः॥ ॥श्यामादंतीद्रवंतीस्नु

॥८५॥

कृमहाश्यामाम्नोत्तवत्॥ससप्ताशंखिनीश्वेताराजवृक्षः सतिल्वकः॥१८॥कंपिल्लकंकरंजश्चवेह
मक्षीरीस्त्रयंगणः॥उदावर्त्तेदिरानाहविषंल्मविनाशनः॥१९॥तवत्सूक्ष्माहरीतक्यो द्विचतुर्भचन्ना
गिकाः॥गुटिकागुडतुल्यास्ता विड्बंधगदापहाः॥२०॥तवृद्धरीतकीश्यामास्नुहीक्षीरेणभावये
त्॥वटिकामूत्रपीतास्ताः श्रेष्ठास्त्वानाहभेदिकाः॥२१॥हरीतकीयवक्षारंपीलूनित्रिवृत्तथा॥घृ
तन्नष्टमिदंपेयमुदावर्त्तविनाशनं॥२२॥हिंगुमाक्षीकसिंधूत्थैः पथ्यावर्त्तिसुवर्त्तिनां॥घृतान्यक्तां
गुदेदद्यादुदावर्त्तविनाशनं॥२३॥मदनंपिप्पलीकुष्टवचागौराश्चसर्षपाः॥गुडक्षारसमायुक्ताफ
लवर्तिः प्रशस्यते॥२४॥आनाहेगुदशूलेच अम्लमूलेभेचवा॥राठधूमगुडव्योषगुडमूत्रेर्विपाचि
ता॥२५॥गुदेंगुष्टसमावर्तिर्विधानाहशूलनुत्॥आगारधूमंपिप्पल्योमदनंराजसर्षपाः॥२६॥
गोमूत्रपिष्टसगुडाफलवर्तिप्रशस्यते॥निपात्व्यमूत्राम्लमधूनिदंतीपिंजीतवृध्मागुडधूमकुष्टैः॥
वर्तिः कराङ्गुष्टनिभांघृतोक्तांगुदेरुजानाहहरीविदध्यात्॥२७॥वाद्यंयूषेणपिप्पल्यामूलकानांसैर
सेनवा॥तुल्यास्निग्धामुदावर्तादानगुल्मात्प्रमुच्यते॥२८॥ ॥इत्यानाहोदावर्त्ताधिकारः सप्तविंशतिमः॥

॥ अथ गुल्मचिकित्सितं व्याख्यास्यामः ॥ ॥ मातुलुंगरसो हिंगु दाडिमं बिडसैंधवं ॥ सुराम-
ण्डेन पातव्यो वातगुल्मरुजापहं ॥ २९ ॥ वचाभयाविडंगसुंठीहिंगुकुष्ठाग्निदीप्यकान् ॥ द्वित्रिष-
ट्चतुरेकाष्टसप्तपंचांशकान् क्रमात् ॥ ३० ॥ चूर्णमद्यादिभिः पीतं गुल्मानाहोदरापहं ॥ गुल्मार्शः
श्वासकासघ्नं ग्रहणीदीपनं परं ॥ ३१ ॥ यवानिहिंगुसिंधूत्थक्षारसौवर्चलाभयाः ॥ सुरामंडेन पा-
तव्याः शूलगुल्मनिसूदनाः ॥ ३२ ॥ हिंगुत्रिकं पाठा हपुषामभया वचा ॥ अजमोदाजगंधा च तिंतिडी-
काम्लवेतसौ ॥ ३३ ॥ दाडिमं पौष्करं धान्यमजाजी चित्रकं वचं ॥ द्वौ क्षारौ लवणं पञ्च चव्यं चैकत्र चू-
र्णयेत् ॥ ३४ ॥ चूर्णमेतत्प्रयोक्तव्यमन्नपानेष्वनत्ययो ॥ प्राग्भक्तमथवा पेयं मद्येनोष्णोदकेन
वा ॥ ३५ ॥ हृत्पार्श्वबस्तिशूलेषु गुल्मे वातकफात्मके ॥ आनाहे मूत्रकृच्छ्रे च शूले च गुदयोनिजे ॥ ३६ ॥
ग्रहण्यर्शोविकारे च प्लीह्नि पाण्ड्वामये रुचौ ॥ उरोविबंधे हिक्कायां कासे श्वासे गलग्रहे ॥ ३७ ॥ भावितं
मातुलुंगस्य चूर्णमेतद्रसेन वा ॥ बहुशो गुटिकाः कार्याः कार्मुकास्स्युः स्ततोधिकं ॥ ३८ ॥ नागरार्द्धप-
लं पिष्ट्वा द्वे पले लुंचितस्य च ॥ बिल्वसैंधवं गुडपलं क्षीरेणोष्णेन पाययेत् ॥ ३९ ॥ वातगुल्ममुदावर्त्तयो-

निश्शूलंचनाशयेत्॥सोवर्चलंश्टंगवेरंदाडिमंसाम्लवेतसं॥१॥स्वासहृद्रोगशमनंस्यादेतद्धिंगु
पंचकं॥पाठानिकुंभरजनीत्रिकटुत्रिफलात्मकं॥१॥लवणंवत्सबीजंचचूर्णंगोमूत्रसाधितं॥
घनीभूतंचगुटिकांकृत्वाखादेदनुत्क्रवान्॥१॥गुल्मप्लीहाग्निसादंचनाशयेयुरसेषतः॥हिंगु
पुष्कर मूलानितुंबराणिहरीतकी॥४॥स्यामाविडंसैंधवंचयवक्षारंमहौषधं॥यवक्काथेदध्नैव
तत्घृतंसिद्धंतुपाचयेत्॥५॥तेनास्यभिद्यतेगुल्मसशूलःसपरिग्रहः॥वचाहरीतकीहिंगुसैं
धवंसाम्लवेतसं॥६॥यवक्षारंयवानीचपिबेदुष्णेनवारिणा॥एतद्धिगुल्मनिचयंसशूलंसप
रिग्रहं॥७॥भिनत्तिसप्तरात्रेणवन्हिंचवृद्धिंकरोतिच॥वातकर्ष्वोविबंधेवासमुद्रंदक्कसर्षपैः॥८॥
कृष्णायायौनिधानव्यावर्त्तयोमस्त्रिराः॥पिबेदरंडतैलंवावारुणीमंडमिश्रितं॥९॥तदेववै
लेपयसावानगुल्मीपिबेन्नरः॥खादेद्वाध्याकुरान्भ्रष्टान्पूतिकान्पवक्षयो॥५०॥पिबेत्तव्व
नागरवासगुडंवाहरीतकीं॥गुग्गुलुत्वचतादंतिशर्करासैंधवंवचा॥५१॥द्राक्षारसेनतसीतंगु
ल्मभेदनमुत्तमं॥मुत्रमघपयोद्राक्षरसैर्वीक्षयथाबलं॥पिप्पलीपिप्पलीमूलंचित्रकाजाजीसैं

सधवेः॥५२॥ हंति युक्ता सुरा गुल्मं शीघ्रं काले प्रयोजिता॥ द्राक्षाभयारसं गुल्मे पैत्तिके सगुडं पिबे

त्॥५३॥ लिह्यात्कल्कं पिप्पलीकं वापि विरेकार्थं मधुद्रवं॥ त्राता क्वाचिरबिल्वालकूदारुभार्गीकणोद्भवं॥५४॥

कल्कः पीतो हरेद्गुल्मं तिलक्काथेन रक्तजं॥ तिलक्षारो गुडव्योषघृतभार्गीयुतो न चेत्॥५५॥ पानं

रक्तजन्ये गुल्मे नष्टपुष्पे च योषितां॥ पीतो धात्रीरसो युक्त्या किंशुकक्षारसाधितः॥५६॥ क्षारस्त्र्यूष

णसंयुक्ता मदिरा वास्त्रगुल्मनुत्॥ पलाशक्षारतोयेन सिद्धं सर्प्पिः पिबेद्द्रुतं॥५७॥ उष्टे वांतादये भि

न्ने विधिनासृग्दरे हितः॥ जलद्रोणगुणे साध्यं त्रायमाणा चतुःपलं॥५८॥ पंचभागस्थितं पूतं कल्कैः सं

योज्य कार्षिकैः॥ रोहिणि कटुका मुस्ता त्रायमाणा दुरालभा॥५९॥ द्राक्षा नामलकी वीरा जीवंती चंदनो

ड॥ त्पलं॥ रसस्यामलकानां च क्षीरस्य च घृतस्य च॥६०॥ पलानि पृथगष्टाष्टौ सम्यग्दत्वा विपाचये ॥८७॥

त्॥ पित्तगुल्मं रक्तगुल्मं वै सर्प्पिः पैत्तिकं ज्वरं॥६१॥ हृद्रोगं कामलं कुष्ठं हन्यादेव घृतोत्तमं॥ रसेना

मलकेक्षूणां घृतपादं विपाचयेत्॥६२॥ पथ्यापादं पिबेत्सर्प्पिः ससिद्धं पित्तगुल्मनुत्॥ द्रा

क्षामधूकखर्जूरं विदारी सन्नाता॥६३॥ परूषकाणि त्रिसफला साधयेत्प्रसंमितान्॥ जलाढके पा

वरी

कं

द्राक्षेरसमामलकस्यच॥६४॥घृतमिक्षुरसंक्षीरमभयाकल्कपादिकं॥साधयेत्तंघृतंसिद्धंशार्क
राक्षौद्रपादिकं॥६५॥प्रयोगात्पित्तगुल्मघ्नंसर्वगुल्मविकारनुत्॥हपुषाजाजिपृथ्वीकापिप्पली
मूलचित्रकैः॥६६॥क्षीरमूलककोत्थानांरसैश्चविपचेघृतं॥वातगुल्मारुचिश्वासगूल्मानाहज्वरा क्षी ४
र्शसां॥६७॥ग्रहणीपांडुरोगाणांघृतमेतन्निवारयेत्॥पूतिवच्यातिहृद्रोगैर्हाष्टीलाग्निसादनुत्॥
॥६८॥त्र्यूषणंत्रिफलाधान्याविडंगाचव्यचित्रकैः॥कल्कीकृतंघृतंसिद्धंसक्षीरंवातगुल्मनुत्॥६९॥
एतएवचकल्काःस्युःकषायाःपंचमूलिकाः॥द्विपंचमूलक्वाथनत् घृतंगुल्मनुत्परं॥७०॥पिप्प
लीपिचुरद्धाद्राउिमार्द्धपलंपलं॥धान्यास्वचघृतार्थव्याकर्षक्षीरस्चतुर्गुणं॥७१॥सिद्धमेतेघृतंस
द्योवातगुल्मंचिकित्सितं॥योनिशूलंशिरःशूलमर्शांसिविषमज्वरं॥७२॥पिप्पलीपिप्पलीमूल
चव्यचित्रकनागरैः॥पलिकैःसयवक्षारैःघृतप्रस्थंविपाचयेत्॥७३॥क्षीरप्रस्थेनचासर्पिर्हंति
गुल्मंकफात्मकं॥ग्रहणीपांडुरोगघ्नंप्लीहकासज्वरापहं॥७४॥धात्रीफलानांस्वरसेशाउमेतिप
चेद्घृतं॥शर्करासैंधवोपेतंतद्धितंवातगुल्मीनां॥७५॥सव्योषक्षारलवणंदशादशमूलश्रितेघ

तं॥ कफगुल्मं जयेत्साम्लं सहिंगुबिडदाडिमं॥७६॥ रौधिरस्य तु गुल्मस्य गर्भकालव्यतिक्रमे॥ स्नि
ग्धस्विन्नशरीराय देयं स्नेहविरेचनं॥७७॥ स्नेहैरुपाचरेत्सर्वं वातगुल्ममतः परं॥ चूर्णरूपं जनक्षे
द निरूहे स्नेहबस्तिभिः॥७८॥ ॥ इति वृंदे गुल्मचिकित्सिते अष्टाविंशतितमोऽध्यायः॥ ॥अथ हृद्रोगचि
कित्सितं व्याख्यास्यामः॥ ॥ पुष्कराग्वधफलं चूर्णं मतं महौषधं सघनया च कल्कः॥ क्षाराम्लसर्पि
र्लवणैर्विमिश्रः स सर्वातहृद्रोगविकर्त्तिकघ्नः॥७९॥ क्वाथः कृतः पौष्करमातुलुंगपलाशभूतीकसटी   क५
सुराह्वैः॥ सनागराजाजिवचायवानीसक्षार उष्णो लवणश्च पेयः॥८०॥ सुंठी सुवर्चला हिंगु दाडिमं
साम्लवेतसं॥ चूर्णमुष्णांबुना पेयं वातहृद्रोगशांतये॥८१॥ कृष्णासटीवचारास्नासुंठीपथ्यासय्यो
॥८५॥ करं॥ चूर्णितास्तास्तु मूत्रेण पातव्याः कफहृद्गदे॥८२॥ त्रिदोषजे लंघनं पूर्वं यथावस्था क्रियामता॥ कृ   ॥८२
मिजे च पिबेन्मूत्रं विडंगामयसंयुतं॥८३॥ सेकाले पाहिमाः पैत्ते मधुरैश्च विरेचनं॥ पिष्ट्वा वा कटुका
पेया सयष्टीका सितांबुना॥८४॥ अर्जुनस्य च वा सिद्धं क्षीरं योज्यं हृदामये॥ सितया पंचमूल्या वा
बलया मधुकेन वा॥८५॥ स्थिरादिकल्कितं सर्पिः क्षीरेण क्षुरसेन वा॥ द्राक्षा[illegible]रसेन वा पक्वं पित्त

हृद्रोगनाशनं ॥ ७६ ॥ जीवकर्षभकौ द्राक्षाश्रेयसी शर्करा बला ॥ द्वे मेदे द्वे च काकोल्यौ खर्जूरं नीलमुत्पलं ॥
॥ ७७ ॥ घृतप्रस्थं पचेदेभिस्तुल्यांशैर्माहिषं भिषक् ॥ चतुर्गुणेन पयसा पातव्यं युक्तितश्च तत् ॥ ७८ ॥ वा
तपित्तसमुत्थायं नमेतद्धृद्रोगनाशनं ॥ श्वदंष्ट्रोशीरमंजिष्ठाबलाकाश्मर्यकत्तृणं ॥ ७९ ॥ दर्भमूलं पृ
थक्पर्णी पलाशर्षभकौ स्थिरा ॥ पिप्पलिकान्साधयेत्तेषां रसे क्षीरं चतुर्गुणे ॥ ८० ॥ कल्कैः स्वगुप्तर्षभ
कमेदेजीवंतिजीवकैः ॥ शतावर्यर्द्धिमृद्वीकाशर्कराश्रावणिविषैः ॥ ८१ ॥ प्रस्थः सिद्धो घृताद्वातपित्तहृद्रोग
गुल्मनुत् ॥ मूत्रकृच्छ्रप्रमेहार्शकासश्वासक्षयापहः ॥ ८२ ॥ धनुःस्त्रीमद्यभाराध्वखिन्नानां बलमांस
तः ॥ कसेरुकाभिर्बलश्रृंगवेरप्रपौंडरीकं मधुकं बिसास्या ॥ ८३ ॥ ग्रंथिश्च सर्पिः पयसा पचेत्तैः क्षौद्रान्वि
तं पित्तहृदामयघ्नं ॥ पथ्यादशानयाकल्कं सौवर्चलपलद्वयं ॥ ८५ ॥ घृतप्रस्थं जले सिद्धं हृद्रोगश्वासगुल्म
नुत् ॥ पुनर्नवादारुसपंचमूलं रास्नायवान्कोलकुलत्थबिल्वं ॥ पक्त्वा जले तेन पचेत्तु तैलमभ्यंगपानैर्नि
लहृद्गदघ्नं ॥ ८६ ॥ ॥ इति वृंदे हृद्रोगचि० एकोनत्रिंशोऽध्यायः ॥ ॥ अथ मूत्रकृच्छ्रचिकित्सितं व्याख्या
स्यामः ॥ ॥ शतावरीकाशकुशश्वदंष्ट्राविदारिशालीक्षुकसेरुकाणां ॥ क्वाथं सुशीतं मधुशर्कराभ्यां यु

॥१८५॥

कांपिबेत्सैतिकमूत्रकृछ्री॥९७॥वारुबीजमधुकंसदार्वं पैत्ते पिबेत्तंदुलधावनेन॥दार्व्यां तथैवामलकी
रसेन समाक्षिकांपित्तिनवेथकृछ्रे॥९८॥हरीतकीगोक्षुरराजवृक्षपाषाणभिद्धन्वयवासकानां॥क्वाथं
पिबेन्माक्षिकसंप्रयुक्तं कृछ्रे सदाहे सरुजे विबंधे॥९९॥मूत्रानिकाशाकासेक्षुत्रराणांचेक्षुपालिका॥
मूत्रावातास्मरीकृछ्रे पंचमूली तृणं तिका॥२००॥यवोबूरु चूतण पंचमूलैः पाषाणभेदैः शासताच
रीभिः॥कृछ्रेषु गुल्मे घ्रमया विमिश्रैः कृतः कषायो गुडसंप्रयुक्तः॥१॥मंथंपिबेद्द्वा ससितं ससर्पिंमिश्र
तं पिबेत्पर्यौ वार्दं सिताप्रयुक्तम्॥धात्रीरसंचैव सिताम्पिबेद्वा कृछ्रे सरक्ते मधुना विमिश्रं॥३॥एर्वारुबिज
यष्ट्याव्यदर्विचातंदुलांबुना॥मुत्रेणसुरयावापिकदलिस्वरसेन वा॥४॥कफकृछ्रविनाशायश्लक्ष्ण
पिष्टांत्रिटिं पिबेत्॥५॥तक्रेण युक्तं सितिमारकस्य बीजं पिबेत्कृछ्रविघातहेतो॥पिबेत्तथातंदुलधाव
नेन प्रवालचूर्णं कफमूत्रकृछ्रे॥६॥ससघदारग्वधक्रोरुकालावेधेः कुरंजकुरजोगडूची॥५॥संध्यां
जलेन विपिबेद्यवांमूसिद्धं कषायं मधुसंयुतं वा॥निर्दग्धिकायाः स्वरसं प्रतं मधुविमिश्रं॥६॥मूत्रदो
षहरं पीसानरंसंपद्यते सुरवी॥एर्वारुबीजकल्कश्च श्लक्ष्णं पिष्टा क्षसंमितं॥७॥धाण्याम्लल वणेपं

॥१८

ते

योः मूत्रकृच्छ्रविनाशनः॥ दाडिमाम्लयुतां हृद्यां सुंठीजीरकसंयुतां॥ ९॥ पीत्वा सुरां सलवणां मूत्रकृच्छ्रे
समुच्यते॥ अभ्यंजनं स्नेहनिरूहबस्तिः स्वेदोपनाहोत्तरबस्तिसेकान्॥ १०॥ स्थिरादिभिर्वातहरैश्च
सिद्धान् दद्याद्रसांश्चानिलमूत्रकृच्छ्रे॥ कषायोतिबलामूलसाधितो मूत्रकृच्छ्रजित्॥ ११॥ पीतं वात्र
पुसीबीजं सलिलं त्र्यूषणान्वितं॥ द्राक्षासितोपलीकल्कं कृच्छ्रघ्नं मधुनाद्युतं॥ ११॥ पिबेद्वा कामतः क्षी
रमुष्णं गुडसमायुतं॥ सिजाज्यं च मुभिल्लानुठीनावाबेद्रजः॥ १२॥ हरिद्रामधुकं मूर्वा मुस्तं कं दे
वदारु च॥ पिबेद्दक्षसमान्कल्कान्यसा मूत्रपीडिता॥ १३॥ शर्करासयवक्षारा सर्वकृच्छ्रप्रभेदनी॥
त्रिफलां श्लक्ष्णपिष्टां वा कल्कं वा कोलसंमितं॥ १४॥ वारिणा लवणीकृत्य पिबेन्मूत्ररुजापहं॥ बृहती
धावनि पाठा यष्टीमधुकलिंगकाः॥ १५॥ पाचनीयो बृहत्यादिः कृच्छ्रदोषत्रयापहः॥ लेहः शुक्रविबंधो
त्थे शिलाजितुसमाक्षिकः॥ वृष्यो बहित्र धातोश्च विधेयाः प्रमदोत्तमाः॥ बलहिंगुयुतं क्षीरं सर्पिर्मि
श्रं पिबेन्नरः॥ १७॥ मूत्रदोषविशुद्ध्यर्थं शुक्रदोषहरं च तत्॥ शतावरीकाशकुशश्वदंष्ट्राविदारिकेक्षा
मलकेषु सिद्धं॥ १८॥ सर्पिः पयो वा सितया विमिश्रं कृच्छ्रेषु पित्तप्रभवेषु योज्यं॥ ॥इति मूत्रकृच्छ्रचि

॥१९०॥

कित्सितेत्रिंशत्तमोध्यायः॥ ॥अथमूत्राघातचिकित्सितंव्याख्यास्यामः॥ ॥सदाहद्राश्मभिन्मूलंत्र
तावर्य्यःसचित्रकं।रोहिणीकोकिलाख्योच्छ्रक्रौंचस्थूलात्रिकंटकं॥१७॥श्लक्ष्णपिष्टासुरापिनामूत्राघा
तप्रबोधनं॥निर्दग्धिकायास्वरसंपिबेद्वानोपवश्रतं॥२०॥जलकुंकुमकल्कंवासक्षोदमुखितंनि
शि॥सतैलंपाटलीभस्मक्षारवद्वापरिश्रुते॥२१॥शिवंशीतपयोमांसीचंदनंतंदुलांबुना॥पिबेत्स
शर्करंश्रेष्ठंसोष्णवातेसशोणिते॥२२॥दद्यादुत्तरबस्तिंचमूत्राघातेसवेदनो॥त्रिकंटकैरंडशताव
रीषुसिद्धंपयोवातजेपंचमूले॥२३॥गुडभृंगाढंसघृतंपयोवारोगेषुकृच्छ्रादिषुसिद्धमेतत्॥त्रि
लोद्भिदेरंडकुशाःस्थिरादिपुनर्नवाभिःस्यचेषुसिद्धं॥२४॥तैलंघृतंक्षीरमथानेनंकोलेषुकृच्छ्रा
दिषुसंप्रयोज्यं॥त्रिकंटकैरंडकुशाधभीरूकर्कारुकैर्वारुरसेनसिद्धं॥२५॥सर्पिर्गुडार्द्धंशियुतंप्रपे
यंकृच्छ्राश्मरीमूत्रविघातदोषे॥चित्रकंसारिवांचैवबलाकालानुसारिवा॥२६॥क्षुद्रंविशांपिप्प
ल्यन्तथ्याच्चत्रिफलाभवेत्॥तथैवमधुकंदद्याद्धात्र्यामलकानिच॥२७॥घृताढकंपचेदेतैःकल्कैरक्ष
समन्वितैः॥क्षीरद्रोणेजलद्रोणेनसिद्धमवतारये॥शीतेपरिस्रुतंचैवशर्कराप्रस्थसंयुतं॥२८॥

पा५
॥१९०
६१३

तुगाक्षीर्यश्च तत्सर्वं मतिमान्प्रतिमिश्रयेत् ॥ ततोमित्तं पिबेत्कालेपथ्यादोषं यथाबलं ॥ २९ ॥ वातरेता
पित्तरेताश्लेष्मरेताश्चयोनवेत् ॥ स्फुरेताग्रंथिरेपिबेदघ्नरोगिणः ॥ ३० ॥ जीवनीयं दशक्षंचसर्प्पिरे
तन्महाबलं ॥ प्रजाहितं च धन्यं च सर्वरोगापहं शिवं ॥ ३१ ॥ सर्प्पिरेतत्प्रयुंजानास्त्रीगर्भं लभते चिरात् ॥
असृग्दोषाञ्जयेच्चापि योनिदोषांश्च संहितान् ॥ ३२ ॥ मूत्रदोषेषु सर्वेषु कुर्यादेतच्चिकित्सितं ॥ ३३ ॥
॥ इति मूत्राघातचि० ॥ एकत्रिंशोध्यायः ॥ ॥ अथाश्मरीचिकित्सितं व्याख्यास्यामः ॥ ॥ वीरवृक्षा
ग्निमंथश्च कासघ्नक्षादनीकुशाः ॥ मोरटेंदीवरीसूर्यभक्ताटिंटूकगोक्षुराः ॥ ३४ ॥ वस्तुकोशस्तरीरोदर्न
त्रिरयावत्स भेदकः ॥ अश्मरीशर्करावृद्धमारुतार्त्तिहरोगणः ॥ ३५ ॥ सुब्य अग्निमंथापामार्गः शिग्रुर्व
रुणगोक्षुरैः ॥ अश्मयारग्वधफलैः काथंकुर्याद्विचक्षणः ॥ ३६ ॥ रामटक्षारलवणैश्चूर्णं दत्वा पिबेन्नरः ॥
अश्मरीमूत्रकृच्छ्रघ्नं दीपनं पाचयेन परं ॥ ३७ ॥ अन्याल्लोष्टाश्रितं वाचं कृयूरुगदभेदजं ॥ नागरवरुण
कगोक्षुरपाषाणभेदकपोतवंकृतः काथः ॥ गुडवावशुक्रविमिश्रः पीतोहन्त्यश्मरीमुग्रं ॥ ३८ ॥ एल्का
पकुल्यामधुकाश्मभेदकौंतीश्वदंष्ट्रावृषकोरबुकैः ॥ शृतं पिबेदश्मजं प्रधानं सशर्करे साश्मरिमूत्र

वृक्षे॥ ३॥ पिबेद्वरुणमूलस्य क्वाथं तच्चल्कसंयुतं॥ कार्थश्चत्रिगुमुलोस्य क्के सोश्मरिपातनः॥ ४॥
मूलं श्वदंष्ट्रागोक्षुरकोरुबूकात् क्षीरेण पिष्टं बृहतीद्वयं च॥ आलोड्य दध्ना मधुरेण पेयं दिनानि सप्ताश्मरि-
भेदनार्थं॥ ५॥ त्रिकंटकस्य बीजानि चूर्णं माक्षिकसंयुतं॥ अविक्षीरेण सप्ताहं पेयमश्मरिभेदनं॥ ६॥
भार्गीपुष्करमूलं वा प्पक्षमात्रं पिबेन्नरः॥ मूलं कपोतवंकायः पिबेदम्लसुरादिभिः॥ ७॥ हिंस्राखरा-
ह्वासितिवारकणामेर्वारुकाप्पत्रपुसाश्च बीजं॥ उपकुंचिका हिंगुसचेत्त साम्लं स्याद्ब्रहत्सोह पुष्पा-

प

वचायचः॥ ८॥ चूर्णं पिबेदश्मरिदं पक्वं सर्पिश्च गोमूत्रचतुर्गुणं चे॥ शृंगवेरयवक्षारपथ्याका-
लीयकान्वितं॥ ९॥ दधिमंजंभिनस्त्वयामश्मरीमास्तुपानतः॥ रक्तोङ्कचेतूत्पलमूलीकाशोक्षुवालीक-

॥९१॥

गोक्षुरशोदकानिः॥ १०॥ पिबेत्सिताक्षौद्रयुता निरवादेद्विदारिमिक्षुत्रपुषाणि चैवं॥ यवक्षारगुडो-

॥९१॥

मिश्रं रसं पुष्पफलोद्भवे॥ ११॥ पिबेन्मूत्रविबंधघ्नं शर्कराश्मरिभेदनं॥ —— शर्करारुबुक-
द्विकंटकारी क्षरकार्द्रमूलं॥ दध्ना पिबेत्क्षीरसुपिष्टमेतत्स्याद्भेदनार्थं शिवदाश्मरीणां॥ १२॥ पि-
चुकाकोल्लकचक शाकेंदीवरजैः फलैः॥ चूर्णितैः सगुडं तोयं शर्करानाशनं पिबेत्॥ १३॥ तैलापामा

गीकदलीपद्मनायचबिल्वजः॥ क्षारपेयोविमूत्रेण शार्करात्मरिनाशनः॥५२॥ पुनर्नवायोरजनीश्व
दंष्ट्राफल्गुप्रवालाश्चसदर्भपुष्पाः॥ क्षारंबुमध्येक्षुरसेश्चपिष्टपेयंनवेदत्मरिशार्करासु॥५३॥ सर्व
थैवोपयुज्यस्तुगणोविगतरादिकः॥ घृतैः कल्कैः कषायेश्चक्षीरैश्चोत्तरबस्तिभिः॥५४॥ शरादिपंच
मूल्यावाकषायेणपचेघृतं॥ प्रस्वंगोक्षुरकल्केनसिद्धंदद्यात्सशार्करं॥५५॥ अश्मरीमूत्रकृच्छ्रघ्नंरेतो
मार्गरुजापहं॥ घृतंश्वदंष्ट्रास्वरसेनसिद्धंक्षारेणचैवांगुणेनपेयं॥५६॥ स्थिरादिककालतकषायकं

१।५।८ नामैकमूलंविधिरेचनेन॥ कुलत्थसिंधूत्थविडंगसारंसशर्करंशीतलयावशूकं॥५७॥ बीजानिकू
ष्मांडकगोक्षुराभ्यांघृतंपचेत्तद्वरुणस्यतोये॥ दुःसाध्यसर्वाश्मरिशूलकृच्छ्रंमूत्रस्यकृच्छ्रंरसजंचमू
त्रं॥५८॥ एतानिसर्वाणिनिहंतिशीघ्रंप्ररूढवृक्षानिववज्रपातः॥ कुशाग्निमंथशैरेयनलदर्भक्षुगो
क्षुराः॥५९॥ कपोतवंकवस्काव्वशिरेंदीवरीशराः॥ धातक्यरलुवंदाबाकर्णपूरात्मनेदकाः॥६०॥ एषां
कल्ककषायाभ्यांसिद्धंतैलंप्रयोजयेत्॥ पानाभ्यंजनयोगेनबस्तिनोत्तरबस्तिना॥६१॥ शार्कराश्म
रिरोगेषुमूत्ररोगेषुदारुणे॥ प्रदरेयोनिशूलेचशुक्रदोषेतथैवच॥६२॥ वंध्यागर्भमिदंप्रोक्तंतैलमेतत्सु
ते

९५

शादिकं ॥ त्वक्पत्रफलमूलस्य वरुणस्य त्रिकंटकात् ॥ ६३ ॥ कषायेण पचेत्तैलं बस्तिमास्थापनेन च ॥
शर्करारश्मरीशूलघ्नं मूत्रकृच्छ्रविनाशनं ॥ ६४ ॥ सैंधवार्द्धंच यत्तैलं भिषग्भिः परिकल्पितं ॥ तत्तैलं द्वि
गुणक्षीरं पचेद्वीरतरादिना ॥ ६५ ॥ ध्यानपूर्वकल्केन साधितं तु भिषग्वरैः ॥ एतत्तैलवरं श्रेष्ठम
श्मर्णां निवारणं ॥ ६६ ॥ मूत्राघाते मूत्रकृच्छ्रे पच्यिते मथिते तथा ॥ नग्नेश्वमामभिन्ने च सर्वथैव प्र
शास्यते ॥ ६७ ॥ मदनागारधूमाभ्यां कटुकागुंजसैंधवैः सघ्जाफल ----------

॥१९२

अथप्रमेहग्रंथांतरात्॥ ॥अश्वस्य च नेत्रवृक्कात्रे बहुमूत्रत्वमेवच॥शोषः संतापकार्श्ये च मूत्रमेहस्य ल
क्षणं॥१॥मूत्रं शुक्रप्रभं यस्मिन् मेहतच्छुक्रलक्षणं॥ मधुमेहे भवेन्मूत्रं क्षौद्राभं मक्षिकाशनं॥२॥रक्तवर्ण
यदा मूत्रं रक्तमेहस्यलक्षणं॥ तक्रमेहे तदाविद्यात्मूत्रं तक्रप्रभं यदा॥३॥पारदस्य पलेद्वे तु चत्वारि
गंधकस्यच॥लोहाभ्रस्वर्णमाक्षीक नागवंगाः पलोन्मिताः॥४॥सर्वं तद्वालुकायंत्रे पचेन्मृद्वग्निनाक्ष
णं॥ शाल्मिकुमारीमंडूकी भृंगराजरसैः सह॥५॥पुनरालोड्य यत्नेन पचेद्यामपवह्निना॥ एषः सिद्धि
रसोज्ञेयः सर्वान्मेहान्निकृंतति॥६॥चक्षुरोगान् मूत्रकृच्छ्रं पांडुमामानिलक्षयं॥विरोर्त्तिकामलारोगं
सवितोत्सतरे द्विने॥७॥पुनर्नवायाः पिप्पल्याश्चूर्णस्य मधुनेचटि॥ रक्ते कांनक्षयेत्प्रातः प्रमेहस्य
वितुत्तये॥८॥लज्जावतिहरिद्रेद्वे प्रथिव्यामलकीतथा॥ रत्वाचूर्णमनी पांतु नक्षयेन्मेहशांतये॥९॥
वितुन्नतंजीकेरयुग्मयुक्तं तुकूंनणां मेहहरं नदृक्तं॥ बलप्रदं पित्तविकारहारी सुरोत्तनं वक्र विकारवारी
॥१०॥पलमाणेनतिलान् प्रनातमूत्रप्रमेही प्रतिघस्त्रमत्ति॥सस्त्रीन्नात्तंकामयत्तेबलोऽतितैलेनसार्द्रं
रजनीरजन्यां॥११॥फलत्रिकं पिप्पलिमूलचित्रकं त्रिकंटकं पत्रकनागकेसरं॥ मुस्तास्त्वगेलाचविडंगचव्यं

प्र २

।क्षाम्लवेतसं कंचोत्चास्वगुसावरजीरकंच॥१२॥सुतीनिडीकं मुन्नाली विडंगंसदामंक्षीचक्ररोचनंच॥तु
रंगगं धातुसमाक्षिकंच सर्वाणिचैतानिसमानिकुर्यात्॥१३॥शुद्धं ततःपंचगुणंचलोहंसचूर्णचैवक्र
त्रसमस्तमेतत्॥विनावयेद्भृंगरसेन पश्चात्सन्नाव्रुरागोस्तनिकारसेन॥१४॥धात्रीजगद्भेषजयोरसे
नजातस्ततोविंशतिमेहहंता॥रसोनयोज्यो हिसदानराणांक्षोणिसार्द्धतुवटिविधेया॥१५॥सत्वंगु
डूच्याहि घनेनशीतेवर्षासुलोहेनसमंप्रदद्यात्॥षंडेनयुक्तंचथैवेषक्कालमेहस्यनाशायभिषग्भि
रुक्तं॥१६॥अस्नेहानूराजमाषान्यो नित्यमश्नातिमेहवान्॥मूत्रमेहोदिनैस्तस्यस्वल्पैर्यातिध्रुवंक्षयं
॥१७॥पुष्करंपिबतियोरुणोदयेनक्षयेत्तदनुपूतनानिशि॥तस्यमेहउपयातिदूरतोविष्णुपूजनवि
धेरघंयथा॥१८॥लिह्यात्समधुनानस्मवंगस्यशुक्रमेहवान्॥मधुमेहेपिभस्मेदंमर्कटीचूर्णसंयुतं॥१९॥
श्लेष्मांतकस्यक्वाथेनरक्तमेहोनिवर्त्तते॥अथवाबीजकाष्टस्यक्वाथंबालंयुतापिबेत्॥२०॥ ॥इति
प्रमेहचिकित्सासमासः॥ ॥अथोरुस्तंभचिकित्सितंव्याख्यास्यामः॥ ॥रास्नायष्ट्यामृतैरंडपटो
लरेवतंबला॥घषश्वोरुस्थितोवह्निहन्याश्चित्रकृतेलवान्॥२१॥मष्टश्चैरंडतैलेनकल्कःपथ्या

॥१८३॥ ॥१९
चेये४

समुद्भवा॥ कृष्णासैंधवसंयुक्तो वृद्धिरोगहरः परः॥२७॥ हरीतकीमूत्रसिद्धां सतैललवणान्वितां॥ प्रातः प्रा
तश्च सेवेन्न कफवातमयापहं॥२८॥ सक्षीरं वापिबेत्तैलं मासमेरंडसंभवं॥ गुग्गुलं वैरंडतैलं वा गोमूत्रे
णपिबेन्नरः॥२९॥ वातवृद्धिनिहंत्याशु चिरकालानुबंधिनि॥ त्रिफलाक्वाथगोमूत्रं पिबेत्प्रातरतंद्रितः
॥३०॥ कफवातोद्भवं हंति श्वयथुं वृषणोत्थितं॥ त्र्यूषणं पिप्पलीमूलं देवदारु फलत्रिकं॥३१॥ क
षायं पाययेद्वृषां सक्षारलवणत्रयं॥ त्रिभिर्मासैः प्रशाम्यति वृद्धिर्वातकफात्मकः॥३२॥ अंगुष्ठमध्ये
६५४घ संत्वां दहेद्व्यंगविपर्यये॥ लेपनं कटुरूक्षोष्णं स्वेदनं रूक्षमेव च॥३३॥ परिषेकावगाहाश्च सर्वमु
ष्णमिहेष्यते॥ वचासर्षपकल्केन प्रलेपः शोफनाशनः॥३४॥ सरलागरुकाष्ठानि देवदारु महौषधं॥
मूत्रारनालसंपिष्टं शोफघ्नं कफवातजित्॥३५॥ चंदनं मधुकं पद्मं उशीरं नीलमुत्पलं॥ क्षीरपिष्टैः
प्रदेहः स्याद्दाहशोषरुजापहः॥३६॥ पंचवल्कलकल्केन घृतेनापि प्रलेपनं॥ सर्वं पित्तहरं कार्यं
रक्तजे रक्तमोक्षणं॥३७॥ शंखोपरि च कर्णांते त्यक्त्वा सेवनिमादरात्॥ व्यत्यासाद्वा शिरां विध्येदंत्रवृद्धि
निवृत्तये॥३८॥ लाक्षा कुरंजबीजं च सुंठी दारु सगैरिकं॥ कुंदुरं च समं कृत्वा चूर्णयेन्मतिमान्भिषक्॥३९॥

काञ्जिकेन तु संपिष्य सुखोष्णेन प्रलेपयेत्॥ अन्त्रवृद्धिहरो ह्येष तथाध्मयथुनाशनः॥ ४४॥ तैलमेरण्डजं
पिबेद्वा बलासिद्धं पयोन्वितं॥ आध्मानशूलोपचितामन्त्रवृद्धिं जयेन्नरः॥ ४५॥ पुनर्नवामृतादारुसक्षार
लवणत्रयं॥ कुष्ठं शठी वचा मुस्तं रास्ना वृक्षफलं पुष्करं॥ ४६॥ यवानी हपुषा हिंगु शताह्वा वाजमोदकाः॥
विडंगातिविषा पथ्या पञ्चकोलकसंयुतैः॥ ४७॥ एतैः रक्षः समैः चूर्णं स्नेहतैलप्रस्थं विपाचयेत्॥ गोमूत्रं द्वि
गुणं देयं काञ्जिकं च तथैव च॥ ४८॥ पुनर्नवाद्यमेतत्तु बस्तिपानेन तथोत्तमं॥ शार्करान्त्रमरिच्छूलघ्नं मूल
त्रकृच्छ्रविनाशनं॥ कट्यूरुपृष्ठमेढ्रेषु कुक्षौ च वृषणाश्रिते॥ कफवातोद्भवं शूलमन्त्रवृद्धिं विनाशयेत्
॥ ४९॥ ॥इति वृद्धिचि॰ एकत्रिंशतितमोध्यायः॥ ॥अथ गलगण्डमालाग्रन्थ्यर्बुदचिकित्सितं व्याख्यास्या

॥९५॥

मः॥ ॥निचुलं शिग्रुमूलानि दशमूलमथापि वा॥ आलेपनं वातगण्डे बुषोष्णं संप्रशस्यते॥ १॥ देव
दारुविशालेच कफगण्डे प्रलेपनं॥ सर्षपारिष्टशिग्रुबीजानि शणबीजातसीयवाः॥ २॥ मूलकस्य च बीजानि
तक्रेणाम्लेन पेषयेत्॥ गण्डानि ग्रन्थयश्चैव गण्डमालास्तथैव च॥ ३॥ आलेपातेन शाम्यन्ति विलयं
यान्ति नोचिरात्॥ जलकुम्भीकजं भस्म पक्वं गोमूत्रगालितं॥ ४॥ पिबेत्कोद्रवतक्राशी गलगण्डनिवृत्त

सु ४ ॥९ सी ३

ये॥ तैलं पिबेच्चामजनिंबहिंस्राहरीतकीवत्सकपिप्पलीभिः॥५१॥ सिद्धं बलाभ्यां च सदेवदारु हितायनि
त्यं गलगंडरोगि॥ विडंगानिलसिंधूत्थरास्नायावक्षारदारुभिः॥५२॥ तैलं चतुर्गुणं सिद्धं कटुतुंबीजले
नवा॥ गंडमालापहं श्रेष्ठं गलगंडहरं परं॥५३॥ पलमर्द्धपलं वापि पिष्टं तंदुलवारिणा॥ कांचनार
त्वचं पीत्वा मुच्यते गंडमालया॥५४॥ गंडमालापहं तैलं सिद्धं चारखोटकत्वचा॥ निंबाश्वमारनिर्गुंडी
साधितं वापि नावने॥५५॥ छुछुंदरीविपक्वं तु कटुकेण तैलवरं ध्रुवं॥ अभ्यंगान्नाशयेन्नूनं गंडमालां सुदा
रुणं॥५६॥ जिह्वाधःपार्श्वयोर्मूलात्स्नायुराद्या दशकीर्तिताः॥ तासां स्थूले शिरे द्वे च छिंद्यात्तिचक्रानैः श
नैः॥५७॥ वडिशेनैव संग्रह्य कुशपत्रेण बुद्धिमान्॥ श्रुते रक्ते व्रणे तस्मिन्दद्यात्सगुडमार्द्रकं॥५८॥
भोजनं वातनिष्यंदि यूषक्षोलस्थामिष्यते॥ सर्षपारिष्टपत्राणि दग्ध्वा भल्लातकैः सह॥५९॥ छागमू
त्रेण संपिष्टमपचीघ्नं प्रलेपनं॥ अश्वत्थकाष्ठनिचुलं गवां दंतं च दाहयेत्॥६०॥ वाराहमज्जसंयुक्तं
नस्यं हत्यपचीं व्रणात्॥ चंदनं सानयालक्षावचाकटुरोहिणी॥६१॥ एतत्तैलं स्रुतं पीतं समूला
मपचीं जयेत्॥ ग्रंथिमुद्धृत्य वा पक्वं वन्हिकर्म प्रयोजयेत्॥६२॥ पश्चात्क्षारेण संशोध्य

व्रणवत्समुपाचरेत्॥ क्षाराग्निभ्यां दहेच्चापि भूयो देश्च विधिवर्ज्जयेत्॥६३॥ स्विन्नं द्रवस्तिमापाद्य पार्श्व
श्चाह्वादनं गुले॥ मीनांडसदृशं मेदो हत्वा वन्हिं प्रयोजयेत्॥६४॥ जयेद्द्विद्रधिमत्पूर्वमर्बुदं दहनादि
भिः॥ उपोदकारसाम्यं च्छातस्तत्रं परिचेष्टितात्॥६५॥ व्रणत्रयस्यचिरानणां पिटकार्बुदजातयः॥ उपोद
कांकांजिकमूत्रं पिष्टातयोपनाहो लवणेन सार्द्ध॥६६॥ दृष्टेर्बुदानां प्रशमाय केश्चिद्दिनेषु रात्रिंपिम
र्मजानां॥ हरिद्रालोद्रपत्तंगगृह धूमो मनःशिला॥६७॥ मधुप्रगाढो लेपोयं मेदोर्बुदहरः परः॥ ए
षैः॥ तामेवकुर्यां कुर्यादिन्द्रोषां नार्कराबुंदे॥६८॥ ॥इति गलगंडमालाग्रंथ्यर्बुदचि०द्विचत्वारिंशोध्या
यः॥ ॥अथश्लीपदचिकित्सितं व्याख्यास्यामः॥ ॥लंघनालेपनस्वेदरेचनैश्च प्रसेचनैः॥ प्रायः

॥९५॥ श्लेष्महरै रूक्षैश्लीपदं समुपाचरेत्॥६९॥ सिद्धार्थशोभांजनदेवदारुविश्वौषधैर्मूत्रयुतैः प्रलिंपे ॥९५॥

त्॥ पुनर्नवानागरसर्षपानां कल्केन वा कांजिकमिश्रितेन॥७०॥ धत्तूरैरंडनिर्गुंडीवर्षाभूशिग्रुस
र्षपैः॥ प्रलेपः श्लीपदं हंति चिरोत्थमपि दारुणं॥७१॥ हंति वा लेपने निसंचित्रकादेवदारु च॥ सि
द्धार्थशिग्रुकल्कौ सुखोष्णो मूत्रपेषितः॥७२॥ मंजिष्ठामधुकं रास्नामहिंस्रां सपुनर्नवा॥ पिष्ट्वारना

सो०

कु३

लैर्लेपोयंपित्तश्लीपदघ्नांतये॥७३॥पिबेद्वाप्यनयाकल्कंमूत्रेणान्यतमेनवा॥पिबेदेवंगडूचींवा
नागरंभद्रदारुवा॥७४॥पिबेत्सर्षपतैलेनश्लीपदानांनिवृत्तये॥पूतीकरंजच्छदजंरसंवापियथा
बलं॥७५॥अनेनैवविधानेनपुत्रजीवककंजरसं॥प्रयुंजीतभिषक्प्राज्ञःकालसात्म्यविभागवित्॥७६॥
स४ पलाशमूलस्वरसंपिबेद्वातैलेनतुल्यंसितसर्षपाणां॥मूत्रेणपथ्यामरदारुविश्वंसगुग्गुलंश्लीप
दिभिर्निसेव्यं॥७७॥वृद्धदारुकचूर्णंवामूत्रसौवीरकादिभिः॥त्रीलितंश्लीपदंहंतिदृष्टंसंवत्सरो
त्थितं॥७८॥पिप्पलीत्रिफलादार्वीनागरंसपुनर्नवं॥नागैर्द्विपलिकोस्तेषांतत्समंवृद्धदारुकं॥७९॥
कांजिकेनतुतच्चूर्णंपिबेत्कर्षप्रमाणतः॥जीर्णेवापरिहारस्याद्भोजनंसर्वकामिकं॥८०॥श्लीपदंवातरो
गांश्चप्लीहगुल्मभरोचकं॥अग्निंचकुरुतेघोरंनस्मकंचप्रयच्छति॥८१॥कृष्णाचित्रकदंतीनांकर्षमर्द्ध
पलंपलं॥विंशतिश्चहरीतक्यागुडस्यचपलद्वयं॥८२॥मधुनासहसंयुक्तंश्लीपदंहंतिदारुणं॥
विडंगासारिवार्द्रकंषुनागरेचित्रकेतथा॥८३॥भद्रदार्व्येषुत्स्वकारष्योःसैंधवेषुच॥तैलपक्वंपिबे वैद्यु २
द्वापियवान्नंचहितंसदा॥८४॥सुरसादेवकाष्टंचत्रिफलात्रिकटुर्गजा॥लवणानिचसर्वाणिविडंगा

न्यथचित्रकं॥८४॥ चविकापिप्पलीमूलं गुग्गुलं हपुषां वचां॥ यवाग्रजः सपाठश्च सटयोलेव ह्नद्दारु

कं॥८६॥ कल्कैस्तु कार्षिकैरेभिर्घृतप्रस्थं विपाचयेत्॥ दशमूलकषायेण धान्ययूषद्रवेण च॥८७॥

दधिमंडु समायुक्तं प्रस्थं प्रस्थं पृथक्पृथक्॥ पक्वं तु तद्घृतं कल्कात् पिबेत्कर्षत्रयं हवि॥८८॥ श्लीपदं

कफवातोत्थं मांसरक्ताश्रितं व यत्॥ मेदःश्रिताभिवातोत्थं हन्यादेवं न संशयः॥८९॥ अपचीं गलगं

डानि अंत्रवृद्धिं तथार्बुदं॥ नाशयेद्ग्रहणीदोषं श्वयथुं गुदजान्यपि॥९०॥ परमाग्निकरं हृद्यं कोष्ट

कृमिविनाशनं॥ घृतं सौरेश्वरं नाम श्लीपदं हंति सेवितं॥९१॥ ॥इति वृंदे श्लीपदचिकित्सितं त्रयस्त्रिं

शोध्यायः॥ ॥अथ विद्रधिचिकित्सितं व्याख्यास्यामः॥ ॥जलौकापातनं शस्तं सर्वेस्मिन्नेव वि

॥९६॥ द्रधौ॥ मृदुर्विरेको लघ्वन्नं स्वेदः पित्तोत्तरं विना॥९२॥ वातघ्नमूलकल्कैस्तु वासातैलघृतायुतैः॥ सुखो ॥९६

ष्णैर्बहुलो लेपः प्रयोज्यो वातविद्रधौ॥९३॥ स्वेदोपनाहाः कर्त्तव्याः शिग्रुमूलसमन्विताः॥ पुनर्नवादा

रुविश्वदशमूलाभसाभया॥९४॥ गुग्गुलैरंडतैलं वापि बेन्मारुतविद्रधौ॥ दशमूलीछिन्नरुहा

पथ्यादारुपुनर्नवा॥९५॥ ज्वरविद्रधिशोफेषु शिग्रुविश्वयुता हिताः॥ त्रिफलाशिग्रुवरुणदशमू

त्वंभसापिबेत् ॥ १६ ॥ गुग्गुलुं मूत्रयुक्तं वा विद्रधौ कफसंभवे तु ॥ इष्टिकासिकतालोहगोशकृत्तुष

पांसुभिः ॥ १७ ॥ मूत्रैरुष्णैश्च सततं स्वेदयेच्छ्लेष्मविद्रधिं ॥ पैत्तिके सारिवालाजामधुकैः शर्करायुतैः ॥

॥ १८ ॥ प्रदिह्यात्क्षीरपिष्टैर्वा पयसोशीरचंदनैः ॥ पिबेद्वा त्रिफलाक्वाथं त्रिवृत्कल्कसंयुतं ॥ १९ ॥ पंच

वल्कलकल्केन घृतमिश्रेण लेपनं ॥ शोभांजननस्यनिर्यूहो हिंगुसैंधवसंयुतः ॥ २० ॥ अचिराद्वि

द्रधिं हंति प्रातः प्रातर्निषेवितः ॥ शिग्रुमूलं जले धौतं दरपिष्टं प्रलेपयेत् ॥ १ ॥ तद्रसं मधुना पीत्वा

हंत्यंतर्विद्रधिं नरः ॥ पिबेदम्यंतरे पथ्या याचसोभांजनाद्रसं ॥ २ ॥ नाराजमथ सर्पिर्म्यां तैलं

वाथोरुबूकजं ॥ अपक्वे स्यात्तदुद्दिष्टं पक्वे तु एवं व्रणवत्क्रिया ॥ ३ ॥ द्विपंचमूली त्रिफला कुलत्थं त्रि

वद्यवैर्मूलकशिग्रुयुग्मैः ॥ तैलं तिलैरुज्जमतद्भिः सिद्धं हितं विद्रधिगुल्ममूले ॥ ४ ॥ मेथी अजवा

लियुग॰४ राइग॰२ सर्षपग॰२ शोआपा ॥ कुष्टग॰२ कुरंजबीजग॰२ सैंधवग॰२ देवदारुग॰२ हलदग॰२ चिडग॰२

मूगलुग॰२ गुलग॰२ शिग्रुवरुणश्रीखंड कूरसग॰७ एरंडीमाप॰१ जवघाटपा॰२ कुंआरग॰२ बाबरी

ग॰२ चौकणं बुकरी रोडुबरी बुलेपः विद्राधिनाशः ॥ ॥ इति वृंदे विद्रधिचिकित्से चतुस्त्रिंशः ॥

ध्यायः॥ ॥अथव्रणचिकित्सितं व्याख्यास्यामः॥ ॥आदौ विम्लावनं कुर्याद्द्वितीयमवसेचनं॥तृ
तीयमुपनाहंच चतुर्थीं पाटनक्रिया॥५॥पंचमं शोधनं कुर्यात्षष्ठं रोपणमिष्यते॥ एते क्रमा व्रण
स्योक्ताः सप्तमं वैकृतापहं॥६॥मातुलुंगाग्निमंथौ च सुरदारु महौषधं॥अहिंस्रा चैव रास्ना च प्र
लेपो वातशोफहा॥७॥शिरीषोन्मत्तवाकुचीहिंस्राकालासुदर्शनः॥तंदुलीयकमूलं च प्रलेपः श्लो
ष्मनाशनः॥८॥दूर्वा ह्रीबेरं बलामूलं मधुकं चंदनं तथा॥शीतलाः स्वगुणाः सर्वे प्रलेपः पित्तशोफहा
॥९॥न्यग्रोधोदुंबराश्वत्थप्लक्षवेतसवल्कलैः॥ससर्पिष्कः प्रलेपः स्याच्छोथनिर्वापणः परः॥१०॥
आगंतुजे रक्तजे च लेपोयं भिषजां मतः॥विधिर्विषघ्नो विषजे पित्तघ्नो निहितो विधिः॥११॥पुनर्नवा
दारुशिग्रुदशमूलमहौषधं॥कफवातकृते शोफे लेपः कोष्णो विधीयते॥१२॥सतिलाः सातसी
बीजदध्यम्लाः सक्तुपिंडिकाः॥कपित्थकुष्ठलवणाः शस्तास्युरुपनाहने॥१३॥सनशिग्रुमूलकफ
लान्यतसीतिलसर्षपाः॥सक्तवः किण्वमुष्णानि द्रव्याण्यपि पाचनं॥१४॥तैलेन सर्पिषा वापि दिह्
यांवासक्तुपिंडकां॥सुखोष्णं शोफपाकार्थमुपनाहं प्रशस्यते॥१५॥द्रव्याणां पिच्छलानां च त्वङ्मू

लानि प्रपीडनं॥ यवगोधूममाषाणां चूर्णानि च समासतः॥ त्रिराबिल्वाग्निकोद्रींती विंकोहयमारकः

॥ कपोतकंकगृध्राणां पुरीषाणि च दारुणं॥१७॥ क्षारद्रव्याणि वा यानि क्षारो वा दारणं परं॥ त्रिफला

खदिरो दार्वी न्यग्रोधादिबलाः कुशाः॥१८॥ निंबकुलत्थपत्राणि कषायाः शोधनं हिताः॥ तिलकल्कः सैंध ८३

णो हरिद्रे त्रिवृद्घृतं॥१९॥ मधुयुक्तं निंबपत्राणि लेपः स्याद्व्रणशोधनः॥ तिलसैंधवयष्ट्याह्व निंबपत्र

निशायुतैः॥२०॥ द्रव्यैर्मधुयुतैः पिष्टैः प्रलेपो व्रणशोधनः॥ निंबपत्रतिलैः कल्कोः मधुना कृतशो

धनं॥२१॥ सेचनः रोपणः सर्पिषा युक्तो यवकल्केप्ययं विधिः॥ वसुकार्जुनविक्रांताः मुस्तलोद्र

निशायुगैः॥२२॥ तिलबर्हिशिखारिष्टैर्लेपो दुष्टव्रणापहः॥ करंजारिष्टनिर्गुंडिरसो हन्याद्व्रणकृमी

न्॥२३॥ कलापविकलयपत्र कोशाम्रास्थि च पूरणं॥ सुरसादिरसैः सेकोपनं लसुनेन वा॥२४॥ निंब

शम्याकजासर्वैः सप्तपर्णाश्वमारकैः॥ कृमिघ्नामृतसंयुक्ताः सेकालेपनधावनैः॥२५॥ निंबपत्रं वचा हिं

गु सर्पिर्लवणसर्षपैः॥ धूपनं कृमिरक्षोघ्नं व्रणकंडूरुजापहं॥ न्यग्रोधोदुंबराश्वत्थकदंबप्लक्षवे

तसाः॥ करवीरार्ककुटजाः कषाया रोपणे हिताः॥२७॥ धातुकीचंदनबलासमंगामधुकोत्पला दा

वीमिश्र निशैर्लेपः ससर्पिर्व्रणरोपणः ॥२८॥ प्रपौंडरीकं जीवंतिगोजिह्वाधातुकीबला ॥ रोपणं सतिलं
दध्या प्रलेपं सघृतं व्रणे ॥२९॥ अपामार्गोश्वगंधा च तालपत्री तथैव च ॥ उत्सादने प्रशंस्यंते कासी
स्यादिषु योगणः ॥३०॥ सुरवचीपत्र पल्लरक्वर्णमोटाकुंटेरकः ॥ पथ्यगेन प्रलेपेन गंभीरव्रणरोप
णाः ॥३१॥ मातुलिंगदलैस्तद्वन्मूलैर्वा कुक्वा बिल्वयोः ॥ अर्जुनोदुंबराश्वत्थलोध्रजंबूत्वचः समाः बु
॥३२॥ यष्टीव्धुल्ललाक्षाच चूर्णिताः क्षतरोपणाः ॥ पंचवल्कलचूर्णे वा शुक्तिचूर्णसमायुते ॥३३॥
धातुकीलोध्रचूर्णेन निश्चारोहंति ते व्रणाः ॥ सदाहवेदना ये तु ये व्रणा मारुतोत्तराः ॥३४॥ तेषां ति
लानुगांश्चैव भृष्टां पयसि निर्वृतां ॥ तेनैव पयसा पिष्टा दद्यात्सालेपनं भिषक् ॥३५॥ हृपंचमूलाक्क
॥९८॥ थितेनां नसा पयसा पिवा ॥ सर्पिषा वासतैलेन कोष्णेन परिषेचयेत् ॥३६॥ यच्चूर्णं समधुकं स ॥९८
हतैलं ससर्पिषा ॥ दद्यात्सालेपनं कोष्णं दाहशूलोपशांतये ॥३७॥ बुधागंतु व्रणं सद्योघ्नं क्षौद्रस
मन्वितं ॥ शीतक्रियाप्रयोक्तव्या पित्तरक्तोघ्नाशनी ॥३८॥ सद्यः क्षतं व्रणं वैद्यः सशूलं परिषेचये
त् ॥ यष्टीमधुकयुक्तेन नातिशीतेन सर्पिषा ॥३९॥ आमाशयस्थे रुधिरे वमनं परमुच्यते पकारा

पस्छेयदेयं चविरेचनमसंन्नाय॥४०॥ क्वाथो वंसत्वगेरंडश्वदंष्ट्राश्मभिदो कृतः॥ हिंगुसैंधवसंयु
क्तः कोष्टस्थंस्त्रावयेदसृक्॥४१॥ यवकोलकुलत्थानांसस्नेहेनैरसेनवा॥ भुंजीतान्नं यवागूंचापिबे
त्सैंधवसंयुतां॥४२॥ मसाहासरतः कार्याशारीरेव्रणवच्छ्रिया॥ मनःशिलालमंजिष्टासलाक्षारजनी
द्वयं॥४३॥ प्रलेपः सघृतः क्षौद्रोसद्यक्षतौ वरः परः॥ पंचमूलद्वयं वातेन्यग्रोधादिकं पित्तिके॥४४॥
आरग्वधादिकायोज्यः कफजेसर्वकर्मसु॥ नीलोत्पलबलादार्वीमिदामधुकचंदनैः॥४५॥ समंगाधा
तकीसर्पिषुक्तेलेपः प्ररोहणं॥ व्रणसंधानकृल्लेपाघृतक्षीरद्रुमांकुरैः॥४६॥ त्रिफलावटसंयुक्ताश्चैवधा
त्रीकासावरकोथवा॥ अयोरजःसकासीसंत्रिफलाकुसुमान्वितं॥४७॥ प्रलेपः कुरुतेकार्ष्ण्यंसद्यएव
नवत्वचि॥४८॥ कालीयकलताम्रास्थिहेमकालारसोत्तमः॥ लेपः सगोमयरसः सवर्णकरणः परः॥
गोरोहरिद्रामंजिष्टामासीमधुकमेवच॥४९॥ प्रपौंडरीकंह्रीवेरंनदं मुस्तं सचंदनं॥ जातिनिंबपटो
लंचकारंजमेवच॥५०॥ मधुच्छिष्टंमधुकंचमहामेदातथैवच॥ पंचवल्कलतोयेन घृतप्रस्थंविपा
चयेत्॥५१॥ एषयोगोमहावीर्यः सर्वव्रणविशोधनः॥ आगंतुसहजाश्चैवसुचिरोत्थाश्चयेव्रणाः॥५२॥

बीज २

॥१९॥

विषमामपि नाडिंच शोधयेत्शीघ्रमेवच॥ ॥ारारिष्टपटोलपत्रफलिनीयष्ट्याह्वनीलोत्पले॥५३॥
मंजिष्टाह्वदुकेंद्रवारुणिजटामूर्वानिशाचंदने॥ ॥जातीक्षारकपत्रकेसरदलैःक्काथैश्चगोर्यादिकैःसिं
सिद्धंसर्पिरिदंहितंनखुनवेसद्यःक्षतेषुध्रुवं॥५४॥येरूढाश्चिरकालजातगतयःश्राघन्नमांस
व्रणाः॥ ॥सश्रावाःसरुजःसदाहपिडिकाश्शुद्धंतिरोहंतिच॥ ॥जातीनिंबपटोलपत्रकटुकादार्वीनिशासा
रिवामंजिष्टाभयःसिक्थतुत्थमधुकैर्नक्ताह्वबीजैःसमेः॥ ॥सर्प्पिःसिद्धमनेनसुक्ष्मवदनामर्माश्रित
श्राविणोगंभीराःसरुजोव्रणाःसगतिकाश्शुद्धंतिरोहंतिच॥ ॥५५॥नक्तमालस्यपत्राणितरूणानि
फलानिच॥ ॥सुमनायाश्चपत्राणिपटोलारिष्टयोस्तथा॥५६॥द्वेहरिद्रेमधूच्छिष्टंमधुकंतिक्तरोहिणी॥
पियंगुकुशमूलंचनिचुलस्यत्वगेवच॥५७॥एषांचकार्षिकैर्भागेघनप्रच्छंविपाचयेत्॥दुष्टव्रण
प्रशमनंतथानाडीविशोधनं॥५८॥सद्यछिन्नव्रणानांतुकरंजाद्यमिदंशुभं॥प्रपोंडरीकंमंजिष्टाम
धुकोशीरपद्मकैः॥५९॥सहरिद्रैःकृतंसर्प्पिःसक्षीरंव्रणरोपणं॥प्रपोंडरीकंमधुकंकाकोल्योद्वेसचं
दने॥६०॥द्वमेतैःसिद्धमेःस्तैलंनसरंव्रणरोपणं॥ ~~दूर्वार्याःस्वरसेसिद्धंतैलंकंपिल्लकेनवा॥६१॥~~

सि २ स २

॥१९॥

दार्वीत्वक्कुमधुकंलोध्रंकेसरंवावचूर्णितं ॥६१॥ पा: मधु...लोध्रंकेसरं

~~दार्वीत्वचूमधुकंलोध्रंकेसरंवावचूर्णितं~~ ॥ दूर्वास्वरसंसिद्धंतैलंकंपिल्लकेनवा ॥६२॥ दार्वीत्वक्कल्केन
प्रधानंव्रणरोपणं ॥ येनैवविधिनातैलंघृतंतेनैवसाधयेत् ॥६३॥ कुठेरकासलत्रानंकाथेनत्व
णंभसि ॥ तेनपादावशेषेणतैलप्रस्थंविपाचयेत् ॥६४॥ कल्कैःकुठेरापामार्गमाक्षिकाभाष्टिंसुच ॥
एतत्तैलंकुठेराख्यंव्रणशोधनरोपणं ॥६५॥ नाडीषुपेमान्यंगानिजास्वागंतुकासुच ॥ येकेद्रपा
कस्कृतिगंधवंतोव्रणाश्चिरोत्थाःसतंतसशोफाः ॥ प्रयांतितेगुग्गुलमिश्रितेननानांत्रिफलारसेन ॥ लेपेन
॥६६॥ त्रिफलाचूर्णसंयुक्तोगुग्गुलुर्वटीकीकृतः ॥ निर्यंत्रणोविबंधघ्नोव्रणशोधनरोपणः ॥६७॥
शालिमुद्गायवान्नंजंगलंयोगलाश्यसदाव्रणी ॥ दधिक्षीरान्नगुर्वन्नंमैथुनंचविवर्जयेत् ॥६८॥ ॥
॥इतिव्रणचिकित्सितं ~~सं~~ षट्त्रिंशोध्यायः ॥ ॥अथनग्नचिकित्सितंव्याख्यास्यामः ॥ ॥आदौनग्नं
विदित्वातुस्वेदयेच्छीतलांबुना ॥ पंकेनालेपनंकुर्याद्बंधनंचकुशान्वितं ॥ अवनामिनमुन्नमयेदु
न्नतंचावपीडयेत् ॥ आछादनिक्षिप्तमधोगतंचोपरिवर्त्तयेत् ॥१॥ आलेपनार्थंमंजिष्ठामधुकं
रक्तचंदनं ॥ शतधौतघृतोन्मिश्रंशालिपिष्टंचलेपनं ॥२॥ न्यग्रोधादिकषायंतुसुशीतंपरिषे

चनं॥ पंचमूलकषायं तु क्षीरं कुर्यात्सवेदने॥ ७२॥ सुखोष्णमवचार्यं च चक्रतैलं विजानता॥ गृष्टि
क्षीरं ससर्प्पिष्कं मधुरौषधसाधितं॥ ७५॥ शीतलं लाक्षया युक्तं प्रातर्भग्नः पिबेन्नरः॥ ७७॥ सघृते
नास्थिसंहारं लाक्षागोधूममर्जुनं॥ संधिमुक्ते च भग्ने च पिबेत्क्षीरेण वा पुनः॥ ७८॥ रसोनमधुला
जाज्यं सिताकल्कं समश्नुत॥ छिन्नभिन्नच्युतास्थीनां संध्यानमचिराद्भवेत्॥ ७९॥ आभाफलत्रिकं
व्योषं सर्वैरेतैः समांशकैः॥ तुल्यगुग्गुलुसंयोज्यं भग्नसंधिप्रसाधकं॥ ८०॥ लाक्षास्थिसंहृत्ककु
भाश्वगंधाचूर्णितानागबलासगुग्गुलुः॥ संभग्नमुक्तास्थिरुजं निहन्यात्॥ अंगानि कुर्यात्कुलि
शोपमानि॥ ८१॥ मांसं मांसरसः क्षीरं सर्प्पिर्यूषः सतीनजः॥ बृंहणं चानुपानं स्याद्देयं भग्नाय जान
ता॥ ८२॥ लवणं कटुकं क्षारमम्लं मैथुनमातपं॥ व्यायामं च न सेवेत भग्नो रूक्षान्नमेव च॥ ८३॥ श्रव
णस्य तु भग्नस्य व्रणं सर्प्पिर्मधूत्तरैः॥ प्रतिसार्य कषायैश्च शेषं भग्नवदाचरेत्॥ ८४॥ ॥इति वृं
दे भग्नचिकित्सिते षट्त्रिंशोध्यायः॥ ॥अथ नाडीव्रणचिकित्सितं व्याख्यास्यामः॥ ॥नाडी
नां गतिमन्विष्य शस्त्रेणापाद्य कर्मवित्॥ सर्वव्रणक्रमं कुर्याच्छुद्धमांसव्रणोदितं॥ ८५॥ घृतं स

दुग्धंव्रणंतर्प्पणेनहन्यात्कृतिंकोष्टगतापियास्यात् ॥ गुग्गुलुस्त्रिफलाव्योषैःसमांशैर्योजितंघृतं ॥ नाडीदुष्ट
व्रणंशूलंभगंदरविनाशनं ॥ ॥ इतिनाडीव्रणचिकित्सा ॥ ॥ अथभगंदरचिकित्सितंव्याख्यास्यामः ॥
वटपत्रेष्टिकाशुंठीगुडूच्यःसपुनर्नवाः ॥ सुपिष्टाःपिटिकांबस्तेलेपःशस्तोभगंदरे ॥ ८८ ॥ पिटिकानाम
पक्वानामतर्पणपूर्वकं ॥ कर्मकुर्याद्विरेकांतंभिन्नानांवक्ष्यतेक्रियाः ॥ ८९ ॥ शोधनंपाटनंक्षारवह्नि
दाहादिकंक्रमं ॥ विधायव्रणवत्कार्यंयथादोषंचिकित्सकैः ॥ ९० ॥ कुष्टत्रिवृत्तिलादंतीमागधीसैंध
वंमधु ॥ रजनित्रिफलातुत्थंहितंस्याद्व्रणशोधनं ॥ ९१ ॥ रसांजनंहरिद्रेद्वेमंजिष्टानिंबपल्लवं ॥ त्रिव
त्तेजोवतीदंतीकल्कोनाडीव्रणापहः ॥ ९२ ॥ चित्रकार्कवसाठामल्लयुहयमारकैः ॥ सुधावचालांगल
(ति ~) कीहरितालंसवर्जिकं ॥ ९३ ॥ ज्योतिष्मतींचसंहृत्यतैलंधीरोविपाचयेत् ॥ एतद्विष्यंदनंनामतैलंदद्याद्भ
गंदरे ॥ ९४ ॥ शोधनंरोपणंचैवसवर्णकरणंतथा ॥ त्रिवृद्दंतीहरिद्रार्कमूलंलोहाश्वमारकैः ॥ ९५ ॥
विडंगसारत्रिफलासार्कस्नुहीपयोमधु ॥ मधुच्छिष्टसमायुक्तैस्तैलमेभिर्विपाचितं ॥ ९६ ॥ भगं
दरविनाशार्थंव्रणरोगापहंशिवं ॥ निशार्कक्षीरसिंधूग्निसुरास्यहनचसैः ॥ ९७ ॥ सिद्धमभ्यंज

नैतैलं भगंदरहरं परं ॥ पाठास्नुकू लांगली स्वर्जीतिवदर्कवचानिलैः ॥ १८ ॥ ज्योतिष्माश्व हनेस्तद्वैलंशस्तं भगंदरे ॥ त्रिफलापुरकृष्णानां त्रिपंचैकांशयोजिता ॥ १९ ॥ गुटिका शोफगुल्मार्शोभगंदरवतां हिताः ॥ त्रिकटुत्रिफलामुस्ताविडंगामलचित्रकं ॥ २० ॥ सचव्यं पिप्पलीमूलं हपुषासुरदारुकं ॥ तुंबरं पौष्करं चव्यं विशाला रजनीद्वयं ॥ १ ॥ विडं सौवर्च्चलं क्षारौ सैंधवं गजपिप्पली ॥ यावंत्येतानि द्रव्याणि तावद्द्विगुणगुग्गुलः ॥ २ ॥ कोलप्रमाणां गुटिकां भक्षयेन्मधुना सह ॥ श्वासं कासं तथा शोफमर्शांसि सभगंदरं ॥ ३ ॥ हृच्छूलपार्श्वशूलं च कुक्षिबस्तिगुदे रुजं ॥ अश्मरी मूत्रकृच्छ्रं च अन्त्रवृद्धिं तथा क्रिमीन् ॥ ४ ॥ चिरज्वरोपसृष्टानां क्षयेपहतचेतसां ॥ अनाहं च तथोन्मादं सकुष्ठान्युदराणि च ॥ ५ ॥ नाडिदुष्टव्रणान्सर्वान्प्रमेहं श्लीपदं तथा ॥ सविंशतिकोह्येषः सर्वरोगनिसूदनः ॥ ६ ॥ ॥ इति भगंदरचि० अष्टचत्वारिंशोध्यायः ॥ ॥ अथोपदंशचिकित्सितं व्याख्यास्यामः ॥ ॥ पटोलनिंबत्रिफला

॥ १०१ ॥

किरातैः क्वाथं पिबेद्वा खदिराशनाभ्यां ॥ सगुग्गुलुं वातवतायुतं वा सर्वोपदंशोपहरः प्रयोगः ॥ १ ॥ त्रिफलायाः कषायेण भृंगराजरसेन वा ॥ व्रणप्रक्षालनं कुर्यादुपदंशप्रशांतये ॥ २ ॥ निंबार्जुनाश्व

छक्कदंबशाल्मलीजंबूवटोदुंबरवेतसेषु॥ प्रक्षालनालेपघृतानिकुर्याश्चूर्णंश्चपिष्टानिमसनचोपदंशे॥ ९॥ त्व
ग्दारुहरिद्रायाःश्वोरवनाभिरसांजनं॥ लाक्षागोमयनिर्यासंतैलंक्षौद्रंघृतंपयः॥ १०॥ एभिःसुपिष्टेद्र
व्यांश्चैरुपदंशंप्रलेपयेत्॥ व्रणाश्चैवैनेनशाम्यंतिश्वयथुर्दाहएव॥ ११॥ वटप्ररोहार्जुनजंबुपथ्यालो
द्रहरिद्राश्चहितःप्रलेपः॥ सर्वोपदंशेप्यवरोहनार्थंचूर्णैश्चतज्जंविमलांजनेन॥ १२॥ निशोसलानिकुमुदं
पद्मसौगंधिकानिच॥ उपदंशेषुचूर्णानिप्रदेहायप्रशस्यते॥ १३॥ बब्बूलदलचूर्णेनदाडिमत्वग्रजाथवा॥
गुडूनंत्रगुदेशस्तंलेपःपूगफलेनवा॥ १४॥ दहेत्कटाहेत्रिफलांतांरवींमधुसंयुतां॥ तत्खोपदंशेलेपोयं
सद्योरोपयतिव्रणं॥ १५॥ सिंचेन्नित्यंयवानीचपानीयकोपमेवच॥ मेंद्रमध्येशिरांविध्येत्सार्टंद्वाज
लौकसः॥ १६॥ हरेदुभयतश्चापिदोषानत्यर्थमूर्छितान्॥ सद्योभिहतदोषस्यतत्काथाबुशाम्यतः॥ १७॥
आगारधूमोरजनीसुराह्वएवंचतैस्त्रिभिः॥ भागोत्तरैःपचेत्तैलंउपदंशोपशांतये॥ १८॥ ॥इत्युपदं
शचिकित्सा॥ ॥अथ[illegible]दोषचिकित्सितंव्याख्यास्यामः॥ ॥अर्शसांछिन्नदग्धानांक्रियाकार्यो
पदंशवत्॥ १९॥ सर्षपालिखिताःसूक्ष्मैःकषायैरवचूर्णयेत्॥ तैरेवान्यंजनंतैलंसाधयेद्व्रणरोपणं॥ २०॥

ला ५

श्री

क्रियेयमव्यवस्थापि रक्तस्राव्यं तथोभयोः॥ अष्टीलिकां हते रक्ते श्लेष्मग्रंथीवदाचरेत्॥ कुंभीकायां हरेद्रक्तं पक्वायां शोधिते व्रणे॥ तिंदुकत्रिफलालोध्रैर्लेपः स्तैलं च रोपणं॥२२॥ लक्षणं स्पर्शरक्तायामप्ययमेव क्रियाक्रमः॥ उत्तमाख्यां तु पिटिकां संछिद्य बहिशोद्धृतां॥२३॥ कल्कचूर्णैः कषायाणां क्षौद्रयुक्तैरुपाचरेत्॥ क्रमः पित्तविसर्प्पोक्तः पुष्करीदुर्दयोर्हितः॥२४॥ वल्मीकस्यस्तनादान्यां चैयन्मर्दितं पुनः॥ सबलातैलेन कोष्णेन मधुरैश्चोपनाहरेत्॥२५॥ ॥ इति शूकदोषचिकित्सितं पंचात्रिंशत्तमोध्यायः॥ ॥

॥ ॥ अथ कुष्ठचिकित्सितं व्याख्यास्यामः॥ ॥ प्रभूतैर्वमनैर्वा जलौकाभिः शृगालाबुनिराव्यधैः॥ स्निग्धस्य मोक्षयेत्कुष्ठे दुष्टं रक्तं पुनः पुनः॥२६॥ वमनं च तदा देयं कर्तव्यं सविरेचनं॥ गुडूचीत्रिफलादार्वीक्वाथमूत्रोष्णवारिभिः॥२७॥ त्वग्दोषव्रणशोफघ्नः पीतो मासेन गुग्गुलुः॥ खदिरत्रिफलानिंबपायेलोमत्तवत्सकैः॥२८॥ अष्टको यं जयेत्कुष्ठान्कंडूविस्फोटकानि च॥ कृछ्रवीसर्प्पपिटिभरोमांतिकमसूरिका॥२९॥ पटोलखदिरारिष्टात्रिफलाकृष्णचित्रकं॥ तिक्ताशनः पिबेत्क्वाथं कुष्ठी कुष्ठमपोहति॥३०॥ खदिरारुष्करदार्वीत्रिफलाशननिंबमार्कवकषायाः॥ क्षौद्ररसांजनसहिताः कुष्ठं प्रसेकशोफहन्युः॥३१॥

रा

त्रिफला निंब पटोलं मंजिष्ठा रजनी वचा ॥ एष कषायो न्यस्तो निहंति कफपित्तजं कुष्टं ॥७२॥ धर्मसेची
कदूक्षेन वारिणा बाकुचीं पिबेत् ॥ क्षीरभोजी त्रिसप्ताहात् कुष्टरोगाद्विमुच्यते ॥७३॥ पथ्यागुडतिलैः
पीतैर्मासं सारुष्करैर्जयेत् ॥ गुडारुष्करजंतुघ्नसोमराजी रसो यथा ॥७४॥ तिलाज्यत्रिफलाक्षौद्रव्योषभ
ल्लातशर्करा ॥ वक्षः सुसमकामेध्यः कुष्टघ्नो कामचारिण ॥७५॥ पंचापैया समाक्षौद्राः सगुडा वा पिचू
र्णिता ॥ तैलयुक्ता लिहन् कुष्टी अरोगी च नरो भवेत् ॥७६॥ हरीतकी सगुडं व्योषयुक्ता लिहन् मुच्येत् कु
ष्टतस्तैलमिश्रं ॥ फलत्रिकं सविडंगं सचूर्णं सर्पिस्तथा तैलयुक्तं लिहेद्वा ॥७७॥ निंबपत्रशतपिष्टा
निंबामलकमेकच ॥ विडंगवाकुचीकल्कं पिबेद्वा कुष्टनाशनं ॥७८॥ हरिद्राकल्कसंयुक्तं गोमूत्रस्य प
लद्वयं ॥ पिबेन्नरः कामचारी कच्छूपामाविनाशनं ॥७९॥ गंधपाषाणचूर्णं तु कटुतैलेन योजितं ॥ ले
पनाद्दशवा पामा कच्छूपामाविनाशनं ॥ ॥ दूर्वा निशायुतो लेपः कच्छूपामाविनाशनः ॥ कृमिकुष्टह
रश्चैव शीतपित्तापहः स्मृतः ॥ ॥ मंजिष्ठा त्रिफला लाक्षा निशा शिला लगंधकैः ॥ चूर्णितैस्तैलमा
दित्यपाकं पामाहरं परं ॥८२॥ काम्रोदुंबरिको ..कं विडंगव्योषया वकं ॥ कल्कं पीत्वा जयेत् कुष्टं कटु

हा

भ

जलस्रुतिलांबुना ॥४३॥ त्रिफलामुस्तपिंडीतकदार्वीशम्याकवत्सकाः ॥ सिद्धार्थः कुष्ठनुच्चायं स्नानपानप्र
लेपनं ॥४४॥ पथ्याकरंजसिद्धार्थनिशावल्गुजसैंधवैः ॥ विडंगसहितैः पिष्टैः लेपो मूत्रेण कुष्टजित्
॥४५॥ मनःशिलाले मरिचानि तैलमार्कपयः कुष्टहरः प्रदेहः ॥ करंजबीजैडगजं खरपासकुष्टं गोमू
त्रकुष्टस्तु हरः प्रदेहः ॥४६॥ पर्णानि पिष्ट्वा चतुरंगलस्य तक्रेण पर्णान्यथ काकमाच्याः ॥ तैलोक्तगात्र
स्य नरस्य कुष्टान्युद्वर्तयेदश्वहनच्छदैश्च ॥४७॥ चक्राह्ववीजं स्नुकक्षीरभावितं पिबेद्गोमूत्रसंयुतं ॥ तैर
वितसंसकल्कंच लेपनं किटिभापहं ॥४८॥ बीजानि वा मूलकसर्षपाणां लाक्षारजन्यौ प्रपुनाटबीजं ॥
श्रीवेष्टकव्योषविडंगकुष्टं पिष्ट्वा च मूत्रेण विलेपनं स्यात् ॥४९॥ दद्रूणि सिध्माः किटिभानि पामा कपा
लकुष्टं विषमं च हन्यात् ॥ विडंगैडगजाकुष्टंनिशासिंधूत्थसर्षपैः ॥ धान्याम्लपिष्टैर्लेपोयं दद्रुकुष्टनि
सूदनः ॥५०॥ दुर्वाभयासैंधवचक्रमर्दकुष्ठेरकाकांजिकतक्रपिष्टैः ॥५१॥ त्रिभिः प्रलेपैरपि वद्धमूला
न् दद्रूश्च कंडूश्च विनाशयंति ॥ प्रपुनाटस्य बीजानि धात्रीसर्जरसः स्नुहा ॥५२॥ सौवीरपिष्टं दद्रूणा
मेतदुद्वर्तनं परं ॥ गोमूत्रेणाथ तक्रेण जीर्णसौवीरकेण वा ॥५३॥ पिष्टं मूलकबीजं च लेपनात्सिध्मना

१०३॥

शनं॥धात्रीरसः सर्जरसः सपथ्यः सेवीरपिष्टश्च तथा तु तस्य॥५४॥भवंति सिध्मानि यथा न भूयस्तथैव
मूलेन च मूलकरोति॥लेपः सिध्मा हरो दृष्टो गंधकः सयवाग्रजः॥५५॥कल्याणक्षारपुष्प्या चातैलं क्षारेण संयु
तं॥विडंगं वाकुची कुष्ठा पथ्या वाराहि लांगली॥५६॥तिला रूक्षानि सगुडैर्मोदकाः कुष्ठनाशनाः॥विडंगसा
रामलकाभयानां पलं पलं सत्रीवृताऽत्र यंच॥५७॥गुडस्य च द्वादशभागयुक्तामासेन त्रिंशद्गुटिका विधे
याः॥निवारणे यक्ष्मवरेण सृष्टः समाणि नद्धः क्रिलसाध्यनिक्ष्यचे॥५८॥भयं हि कासक्षयकुष्ठनाश
नो भगंदर प्लीह जलोदरार्शसां॥धात्र्यक्षपथ्यासविडंगवन्हीनल्लातकाशिलाजलोहभृंगैः॥५९॥ना
गाभिवृद्धैस्तिलतैलमिश्रं सर्वाणि कुष्ठानि निहंति लेहः॥अमृताख्या भयाव्योषवन्ह्यरुष्कर बाकु
ची॥६०॥सगुडा रचिताः क्रमाद्वृद्धाः कुष्ठघ्नाः तैलसाधिताः॥विडंगत्रिफलाचूर्ण चूर्णं लीढं समाक्षिकं
॥६१॥हंति कुष्ठं कृमीन्मेहान्नाडीदुष्टभगंदरान्॥दसमानाच्युतः कुंभे समूल खदिराद्रसः॥६२॥
साज्य धात्रीरसः क्षौद्रो हन्यात्कुष्ठं रसायनं॥प्रलेपोद्वर्तनस्नानपानभोजनकर्मसु॥६३॥शीली
तं खादिरं वारि सर्वत्वग्दोषनाशनं॥खदिरामलकषायं वाकुचिबीजान्वितं पिबेन्नित्यं॥६४॥

कुंदेंदुशंखधवलं श्वित्रं विनिहंति तिलसीतं॥ मथितेन पिबेच्चूर्णं। काकोदुंबर्यवल्गुजं॥६५॥ तैलोत्को घ
र्मसेवी स्यात्तक्राशी श्वित्रमुद्धरेत्॥ वायस्यैर गजाकुष्ठकुष्ठैर्भिर्गुटिकाः कृता॥६६॥ बस्तमूत्रेण सं
पिष्टा प्रलेपात् श्वित्रनाशना॥ कुनटी शिखिपिष्टेन भस्म वा तालकोद्भवः॥६७॥ गजदर्पणमात्स्याः
क्षारो वा श्वित्रनाशनः॥ बाकुचीस्थिमालतिभस्म बाकुची मूत्रपिष्टैः प्रलेपनं॥६८॥ अयोरजः सोमराजी ला
क्षा मागधिकाजिरे॥ सकासीसो हरितालेपो बर्हिगोपित्तसंयुतः॥६९॥ अरुष्करं चित्रकं सोमराजी
स्नुहीपयो वायसपादिका च॥ एभिः समस्तैः सह पाचनीयं तैलं खरांशोः किरणैर्यथावत्॥७०॥ योभ्यं
जनं तेन करोति पथ्यं तक्रेण वाश्नाति च सोमराजीं॥ काकाभिदोषैः दुंबरिकासमेतां कुष्ठं सितं नश्यति
तस्य मासात्॥७१॥ पिचुमंदफलं पुष्पं त्वक्पत्रं मूलमेव च॥ पंचैतानि सुश्लक्ष्णानि समचूर्णानि
कारयेत्॥७२॥ अष्टभागावशेषेण खादिराशनवारिणा॥ भावयित्वा तु संयोज्य द्रव्याण्येतानि
दापयेत्॥७३॥ चित्रकं च विडंगानि व्याधिघातकमागधी॥ नलदान्तं हरीतक्यः सुंठी चामलकैः
सह॥७४॥ स्वदंष्ट्राजेह चूर्णं च सर्वाण्येतानि चूर्णयेत्॥ निंबार्द्धं सर्वमेतेषां मेलयित्वा निधापयेत्॥७५॥

१०४॥ १०

पुनर्न्नीव्यचपिष्टांस्ता वै वटीः कारयेद्भिषक्॥ विडालपदमात्रं तु सर्प्पिषोपर्य(सा)पिवा॥७६॥ प्रातःप्रातर्नि
षेवेत खदिराशनवारिणा॥ परिहारो न चात्रापि पंचनिंबे वतिष्ठते॥७७॥ मासमात्रप्रयोगेण कुष्टं हं
तिसुदारुणं॥ त्वग्दोषनीलिकाव्यंग तथैव तिलकालकान्॥७८॥ अष्टादशविधं कुष्टं सहस्रेथ महास्तया
न्॥ सर्वव्याधिविनिर्मुक्तो जीवेद्वर्षशतं नरः॥७९॥ श्रेष्टं रसायनमिदं वलीपलीतनाशनं॥ बीभीतक
त्वग्मलयूजटानां क्वाथेन पीतं गुड संयुतेन॥८०॥ अयल्गुजं ~~बीजं~~ बीजमपाकरोति श्वित्राणि कुष्टानि
च पुंडरीकं॥ चित्रकं त्रिफलाव्योषयवानीकारवीत्वचा॥८१॥ सिंधुत्थाति विषं कुष्टं चव्येलैलावसत्कर्नं॥
विडंगान्यजमोदं च मुस्तान्यमरदारु च॥८२॥ यावंत्येतानि चूर्णानि तन्मात्रं गुग्गुलोश्शुद्धं॥ संचूर्णस
र्पिषा सार्द्धं गुटिकां कारयेद्भिषक्॥८३॥ प्रातर्भोजनकाले च भक्षयेत यथाबलं॥ हंत्यष्टादश कुष्टानि क्र
मीन्दुष्टव्रणानि च॥८४॥ ग्रहण्यर्शोविकारांश्च मुखामयमलग्रहान्॥ गृध्रसी पांडुरोगं च गुल्मं चैव
नियच्छति॥८५॥ व्याधीन्कोष्टगतांश्चान्यान्जयेद्विष्णुरिवासुरान्॥ मरिचं पिप्पली कुष्टमर्कक्षीरसव
रसः॥८६॥ देवदारु हरिद्रे द्वे मांसीलोही तु चंदनं॥ विशालाकरवीरं च हरितालं मनःशिला॥८७॥ए

ह

तैश्च सर्षपकल्के र्भागैः सविषैः श्लक्ष्णपेषितैः ॥ कटुतैलस्य च प्रस्थं गोमूत्रं च चतुर्गुणं ॥ ८ ॥ मृन्मये लोहभांडे वा शनैर्मृद्वग्निना पचेत् ॥ तत्तैलं मधुवर्णाभं निष्पन्नं भवतास्य तत् ॥ ९ ॥ एतेनैवोपशाम्यंति रोगाश्चायेषु देहिनां ॥ कंडूः क्विचर्चिका पामा दद्रूर्विस्फोटकास्तथा ॥ १० ॥ अभ्यंजनेन शाम्यंति ॥ कृच्छ्रे वल्गुलक्षश्च जायते ॥ प्रसुप्तानि च श्वित्राणि तैलेनानेन तत्क्षणात् ॥ ११ ॥ अपि त्रिवार्षिकं श्वित्रं शममव्रजति तत्क्षणात् ॥ अष्टादशानां कुष्ठानां तैलमेतद्विधीयते ॥ १२ ॥ वितुषा वल्गुजबीजा चूर्णं गोवारिभावितात् ॥ द्विगुणम् ॥ मूलक्काथेन पिबेत् कुलित्थर कृतमालमदनफलानां ॥ १३ ॥ सप्तपर्णकरंजार्कमालती करवीरजं ॥ मूलं स्नुहाशिरीषाभ्यां चित्रकं च स्फोटयेदपि ॥ १४ ॥ करंजबीजं त्रिफलाश्च पूषणं रजनीद्वयं सिद्धार्थकविडंगानि प्रपुन्नाटं च संहरेत् ॥ १५ ॥ मूत्रपिष्टैः पचेत्तैलमेभिः कुष्ठविनाशनं ॥ अभ्यंगाद्वज्रकं नाम नाशि कुष्ठव्रणापहं ॥ १६ ॥ नक्तमालं हरिद्रे द्वे अर्कं तगरमेव च ॥ करवीरं वचां कुष्ठमस्फोतां रक्तचंदनं ॥ १७ ॥ मालती सप्तपर्णं च समंजिष्ठां सिंधुवारकं ॥ एषामर्धपलान् भागान् विषस्यापि पलं भवेत् ॥ १८ ॥ चतुर्गुणे गवां मूत्रे तैलप्रस्थं विपाचयेत् ॥ श्वित्रं विस्फोटकिटिभं दद्रूलूतां विचर्चिकां ॥ १९ ॥

॥१०५॥ ।

कच्छूकंडूविकाराश्च अरूंषिसविषाणिच॥दुष्टव्रणानिसर्वाणितैलमेतद्व्यपोहति॥२०॥विषतै
लमीदंनाम्नासर्वव्रणविशोधनं॥करवीरस्यमूलानिगवांमूत्रेणसाधयेत्॥१॥तत्रतैलंपचेद्विमा
न्विडंगकुष्ठचित्रकैः॥तत्तैलंकुष्ठकंडूघ्नंतद्धन्तिंबकरंजयोः॥२॥तैलंक्षिप्तरसेहन्यात्कुष्ठानिविवि
धानिच॥पंचरोगः करवीरस्यतैलंसिद्धंचकुष्ठनुत्॥४॥अर्कमूलरसेतैलंसर्षपंपरिपाचयेत्॥ति
काचांबूलबीजैश्चसर्वदुष्टव्रणापहं॥३॥जीरकस्यपलंपिष्टासिंदूरार्द्धपलंतथा॥पटुतैलंप
चेद्राभ्यांसद्यःपामाहरंपरं॥८॥भूर्जसिंदूरसिद्धंवातैलंचापिनिशास्त्रं॥दूर्वायाःस्वरसेकंडू
कच्छूपामाविचर्चिनुत्॥५॥कुष्ठश्चमारत्नंगोर्कमूत्रस्नुकूक्षीरसैंधवैः॥तैलंसिद्धंविषाख्यापंकुष्ठ
दद्रूविचर्चिनुत्॥६॥चतुर्गुणतृणरसंकटुतैलंचपाचयेत्॥एडगजापक्कनिशामंजिष्ठारग्वधैःस
मैः॥७॥एतन्महद्ग्निनासाध्यंवर्णदंकांतिदायकं॥तेनाष्टादशकुष्ठानिशाम्यंतिगात्रमक्षणात्॥८॥
सकृरंजैघृतंसिद्धंकुष्ठनुद्व्रणकृंसमत्तं॥निंबपटोलंदार्विदुरालभांतिक्तरोहिणी॥त्रिफलां॥१०॥कुर्या
दर्धपलांशांपर्प्पटकांत्रायमाणांच॥मुस्तंवत्सकबीजंवल्कीवरसार्द्धकार्षिकान्भागान्॥११॥नव

द्ध

सर्प्पिश्चैवेष यल्लमेतत्सीद्धं घृतं पेयं ॥ कुष्टज्वरगुल्मार्शोग्रहणीपांड्वामयश्वयथून् ॥१२॥ पामाविसर्प्पि
पिटकाकंडूमदगंडजनुत् ॥ निंबपटोलव्याघ्रीचगुडूचीवासकं तथा ॥१३॥ कुर्याद्दश ॥ पलान्भागानेकैकस्य सुकु
ट्टितान् ॥ जलद्रोणेविपक्तव्यंयावत्पादावशेषितं ॥१४॥ घृतप्रस्थंपचेत्तेन त्रिफलागर्भसंयुतं ॥ पंचतिक्त
ति मिति ख्यातं सर्प्पिः कुष्टविनाशनं ॥१५॥ अशीतिवातजान् रोगान् चत्वारिंशच्चपैत्तिकान् ॥ विंशतिश्लेष्मजां
श्चैव पानादेवापकर्षति ॥१६॥ कुष्टव्रणकृमीनर्शः पंचकासांश्च नाशयेत् ॥ निंबामृतपटोलानां कंटकार्या वृ
षस्य च ॥१७॥ पृथग्दशपलान्भागान् ॥ जलद्रोणेविपाचयेत् ॥ तेन पादावशिष्टेन घृतप्रस्थं विपाचयेत् ॥१८॥
त्र्यूषणंत्रिफलामुस्तं रजनीद्वयचित्रकं ॥ दारूपाठगजाह्वाचपिप्पलीमूलवत्सकं ॥१९॥ भल्लातकं यव
॥१०६॥ क्षारो मंजिष्ठातिविषेस्थिरा ॥ वचाज्योतिष्मतीकुष्टं सारिवाद्वयरोहिणी ॥२०॥ विडंगं स्वर्जिकाक्षारं शतपु
ष्पा च कार्षिकाः ॥ गर्भं समावाप्य पचेत्गुग्गुलोः पंचभिः पलैः ॥२१॥ सम्यक्सिद्धं च विपचेदेतद्गुग्गुलतिक्त ॥
कं ॥ विधिनाहंत्यचिरात्त्वग्दोषान्सुचिरोस्थितान् ॥२२॥ विवर्णास्वापसंकोचवेगवंतिस्थिरानिच ॥ पित्तश्ले
ष्मसमुत्थान मारुतास्त्रभवानिच ॥२३॥ गंडमालार्बुदनाडीदुष्टभगंदरान् ॥ विषमज्वरहृद्रोगगरहर्षा

म्लश

विषकृमीन्॥२८॥प्रमेहास्रग्दरोन्मेदत्रोंफगुल्मोदराणिच॥कामलापांडुरोगंच क्षिप्रमेतद्व्यपोहति
॥२५॥सप्तच्छदं प्रतिविषां शम्याकं तिक्तरोहिणी पाठा॥मुस्तमुशीरंचत्रिफलापटोलपिचुमंदपर्प्प
टकं॥२६॥धन्वयवासं चंदनमुपकुल्यं पद्मकं रजन्यौच॥षड्ग्रंथां सविशालां शतावरीसारिवेचोभे॥२७॥
वत्सकबीजं वासां मूर्वाममृतां किराततिक्तकंच॥कल्कान्कुर्यान्मतिमान्यष्ट्याह्वत्रायमाणांच॥२८॥कल्
कस्यचतुर्भागो जलमष्टगुणं रसोमृतफलानां॥द्विगुणो घृतात्प्रदेयस्तत्सर्प्पिः पाययेत्सिद्धं॥२९॥
कुष्ठानि रक्तपित्तप्रबलान्यर्शांसि रक्तवाहीनि॥विसर्प्परक्तपित्तं वातासृक्पांडुरोगंच॥३०॥विस्फो
टकान्सपामामुन्मादंकामलज्वरान्कंडूं॥हृद्रोगगुल्मपिडकामगंदरंगंडमालांवा॥३१॥हन्यादेत्सीतं
कालेयथाबलंसर्प्पिः॥योगशतैरप्यजितं महाविकारं महातिक्तं॥३२॥ ॥इतिकुष्टचिकित्सितेएकपं
चाशत्तमोध्यायः॥ ॥अथशीतपित्तकोष्टचिकित्सितंव्याख्यास्यामः॥ ॥सगुडं दीप्यकं यस्तुखा
देत्पथ्यान्नभुङ्नरः॥तस्यनश्यतिसप्ताहादुदर्दः सर्वदेहजः॥३३॥यवानीपाययेद्वापि सव्योषां क्षीरसं
युतां॥पिप्पलीवर्द्धमानं वा लशुनं वा प्रयोजयेत्॥३४॥त्रिफलांक्षौद्रसहितां पिबेद्वान वकार्षिकां॥

॥१०८॥

सितां कटुकसंयुक्तां गुडमामलकैः सह ॥३५॥ अभ्यंगः कटुतैलेन स्वेदश्चोष्णेन वारिणा ॥ तथैव वमनं
कार्यं पटोलारिष्टवासकैः ॥३६॥ नतपलपुष्कररसैर्निर्विरेकश्च प्रशस्यते ॥ सिद्धार्थरजनीकल्कैः प्र
पुन्नागतिलैः सह ॥३७॥ कटुतैलेन संमिश्रैस्तदुद्वर्तनं हितं ॥ कुष्ठाहरिद्रे सुरसं पटोलं निंबाश्वगंधे सु
रदारु शिग्रु ॥३८॥ ससर्षपं तुंबरधान्यवन्यं संडोचचूर्णानि समानि कुर्यात् ॥ तैस्तत्र पिष्टैः प्रशमं शरीरं
तैलाक्तमुद्वर्त्तयितुं यतेत ॥३९॥ तथास्य कंडूपिटकाः सकोठाः कुष्ठानि शोफाश्च शमं व्रजंति ॥ निंबस्य
पत्राणि सदा घृतेन धात्रीविमिश्राण्यथवोपयुंजात् ॥४०॥ विस्फोटकोठक्षतशीतपित्तकंडूश्च पि
त्तरक्तानि हन्यात् ॥ ॥ ॥ इति शीतपित्तोदर्दकोठचि॰ द्विपंचाशत्तमोऽध्यायः ॥ ॥ अथ पित्तचिकि

॥८॥

त्सितं व्याख्यास्यामः ॥ ॥ अम्लपित्ते तु वमनं पटोलारिष्टवारिभिः ॥ कारयेन्मदनक्षौद्रसिंधुयुक्तं
ततो भिषक् ॥ विरेचनं त्रिवृच्चूर्णं मधुधात्रीफलाद्रवैः ॥ निस्तुषयववृषधात्रीक्वथितं सलिलं त्रिसु
गंधिमधुसंहितं ॥ द्रुतमुपहरति वमिं संजनितामम्लपित्तेन ॥२॥ पाठानिंबपटोलं त्रिफलावासनयासं
योजितो जयति ॥ अधिककफमम्लपित्तं प्रयोजितो गुग्गुलुः समदः ॥ ॥ छिन्नाखदिरयष्ट्याह्वदार्व्य

नोवामधुद्रवं॥सद्राक्षामभयांखादेत्सक्षौद्रांसगुडांवचाः॥४५॥ ॥इति अम्लपित्तचिकित्सितेत्रयः
पंचाशत्तमोध्यायः॥ ॥अथविसर्प्पविस्फोटकचिकित्सितंव्याख्यास्यामः॥ ॥विरेकवमनालेपनसे
चनास्रग्विमोक्षणैः॥उपाचरेद्यथादोषंविसर्प्पानविदाहिभिः॥४६॥अमृतवृषपटोलंनिंबकल्कैरुपे
तंत्रिफलखदिरसारंव्याधिखातंचतुल्यं॥क्वथितमिदमनूषंगुग्गुलोपादयुक्तंहरतिविषमसर्प्पान्
कुष्टसंघातमाशु॥४७॥भूनिंबवासाकटुकापटोलंफलत्रिकंचंदनंनिंबसिद्धं॥विसर्प्पदाहज्वरशोफ
कंडूविस्फोटतृष्णावमिनुत्कषायः॥४८॥पटोलंपिचुमंदंचदार्वीकटुकरोहिणी॥यष्ट्याह्वंत्रायमाणं
चदद्याद्वीसर्प्पशांतये॥४९॥मुस्तारिष्टपटोलानांक्वाथःसर्वविसर्पनुत्॥धात्रीपटोलमुद्गानामथवा
घृतसंयुतः॥५०॥दुरालभांपर्प्पटकंगुडूचीविश्वभेषजं॥निशापर्युषितंदद्यात्॥तृष्णावीसर्प्पशांतये
॥५१॥पटोलपिचुमंदाभ्यांपिप्पल्यामदनेनवा॥विसर्प्पवमनंशस्तंतथाचेंद्रयवैःसह॥५२॥त्रिफला
रससंयुक्तंसर्प्पिःत्रिवृतयासह॥प्रयोक्तव्यंविरेकार्थंवीसर्प्पज्वरशांतये॥५३॥रसमामलकानांवा
घृतमिश्रंप्रदापयेत्॥द्राक्षारग्वधकाश्मर्यत्रिफलापुंडरीलुभिः॥५४॥त्रिवृद्धरीतकीभिश्चविसर्प्पशा॥

घनं हितं ॥ प्रपौंडरीकमंजिष्ठापद्मकोशीरचंदनैः ॥५५॥ सयष्टीदीवेरैः पैत्ते क्षीरपिष्टैः प्रलेपनं ॥ हरेण
वो मसूराश्च समुद्गाश्चैव शालयः ॥५६॥ पृथक् पृथक् प्रदेहाः स्युः सर्वे वा सर्पिषा सह ॥ कसेरुशृंगा
टकपद्मगुंद्राः सशैवलाः सोत्पलकर्दमाश्च ॥५७॥ वस्त्रांतराः पित्तकृते विसर्प्पे स्फोटे विधेयाः सघ
नाः सुशीताः ॥ प्रदेहाः परिषेकाश्च शस्यंते पंचवल्कलैः ॥५८॥ पद्मकोशीरमधुकचंदनैर्वा प्रशस्यते ॥
पटोलामृतनिंबसवासारिष्टपर्प्पटैः ॥५९॥ खदिराब्दयुतैः क्वाथो विस्फोटज्वरशांतये ॥ निंबत्वक्ख
दिरः सारो गुडूचीद्रपचास्तथा ॥६०॥ क्वाथो माक्षिकसंयुक्तो विस्फोटार्त्तिज्वरापहः ॥ पटोलत्रिफलारिष्ट

।१०८।

गुडूचीमुस्तचंदनैः ॥६१॥ समूर्वारोहिणीपाठारजनीसदुरालभा ॥ कषायं पाययेद्धंतश्लेष्मपित्तज्वरा
पहं ॥६२॥ कंडूत्वग्दोषविस्फोटविषवीसर्प्पनाशनं ॥ विडंगपथ्यामंजिष्ठादार्व्यामलकयष्टिका ॥६३॥ स

१०८

जातिपल्लवक्षौद्रं विस्फोटकवलग्रहः ॥ शिरीषोदुंबरोजंबूसेकालेपनयोर्हिताः ॥६४॥ श्लेष्मांतकत्वचो
नापि प्रलेपाश्चोतने हिताः ॥ दूर्वावटोदुंबरजंबुशालासप्तच्छदाश्वत्थकषायकल्कैः ॥६५॥ सिद्धं वि
सर्प्पज्वरदाहपाकाविस्फोटशोफानपि निहंति सर्पिः ॥ पटोलसप्तच्छदनिंबवासाफलत्रिकच्छिन्न

रुहा विपक्वं ॥ ६६ ॥ न स्यं च तिक्तं घृतमाशु हंति त्रिदोषविस्फोटविसर्प्पकंडूः ॥ पद्मकं मधुकं लोध्रं नागपुष्पस्य केसरं ॥ ६७ ॥ द्वे हरिद्रे विडंगानि सूक्ष्मैला तगरं तथा ॥ कुष्टं लाक्षा पत्रकं च सीसकं तुत्थमेव च ॥ ६८ ॥ बहुवारशिरीषं च दधित्थफलमेव च ॥ तोयेनालोड्य तत्सर्वं घृतप्रस्थं विपाचयेत् ॥ ६९ ॥ याश्च रोगानिहं हन्याद्धितान्निबोधा महामुने ॥ सर्प्पकीटाखुदष्टेषु लूतामूत्रकृतेषु च ॥ ७० ॥ विविधेचैव विस्फोटे तथा दुष्टविसर्पिषु ॥ नाडीषु गंडमालासु प्रभिन्नासु विशेषतः ॥ ७१ ॥ अश्विभ्यां विहितं धान्यं पद्मकं तु महाघृतं ॥ संशोधनं च सर्वेषु कार्यं शोणितमोक्षणं ॥ ७२ ॥ पक्वेषु व्रणनिःशेषं व्रणवत्संप्रयोजयेत ॥ ॥ इति विसर्प्पविस्फोटकचिकित्सितं चतुःपंचाशमोध्यायः ॥ ॥ अथ मसूरिकाचिकित्सितं व्याख्यास्यामः ॥ ॥ सर्वासां वमनं पूर्वं पटोलारिष्टवासकैः ॥ ७३ ॥ कषायैश्च वसावत्सयष्ट्याह्वफलकल्कितैः ॥ सक्षौद्रं पाययेद् ब्राह्मीरसं चाहेलमोन्विकं(?) ॥ ब्राह्मी विरेचनं देयं नाम नंता बलं नरे ॥ उभाभ्यां हृतदोषस्य विशुध्यति मसूरिका ॥ ७५ ॥ शिरीषोदुंबराश्वत्थसेलुन्यग्रोधपल्लवैः ॥ प्रलेपः सघृतः शीघ्रं व्रणवीसर्प्पदाहहा ॥ ७६ ॥ निम्बाद्वयोशीरशिरीषमुस्तकैः सलोध्रचंद्नप्रियनागकेसरैः ॥ सस्वेदविस्फोटविसर्प्पकुष्टदौर्गंध्यरोगार्त्तिहरः प्रदेहः ॥ ७७ ॥ पटोल

मल्लारूणतंदुलीयकंपिबेद्धरिद्रामलककल्कसंयुतं॥ मसुरिविस्फोटविसर्प्पशांतयेत्तथासरोगार्त्तवमि
ज्वरोहरः॥७८॥ पटोलंसारिवामुस्तापाठाकटुकरोहिणी॥ खदिरंपिचुमंदश्च बलाधात्रीविकंकतं॥७९॥
एतत्कषायपानंतुहंतिवातमसूरिका॥ दुरालभापर्प्पटकंपटोलंकटुरोहिणी॥८०॥ श्लेष्मिकं
पित्तजानांचपानेनिकाथ्यदापयेत्॥ क्रोधाःस्नेपनाहाश्च बहिरंतश्चसर्वतः॥८१॥ पाददाहःप्रकु
रुतेपिटिकायादजापहेंदपंतत्राहकं शासनिबहुन्॥ मदनांवुना॥८२॥ अक्ष्णोःशोवं प्रसंशांति
गवेधुमधुकांबुना॥ मधुकंत्रिफलादूर्वादार्वीत्वग्नीलमुत्पलं॥८३॥ उशीरलोध्रमंजिष्टाप्रलेपोम्बो जी
॥१००॥ तनेहितः॥ नश्यंतेनेनदग्जाता मसूर्योनभवंतिच॥८४॥ पटोलकुंडलीमुस्तंवृषधान्यंसवास
कं॥ न्यूनिंबनिंबकटुकापर्प्पश्चैटेशांतजल्कं॥८५॥ मसूरीःशामयेदामापक्वाश्चैव विनूाधयेत्॥ वातः
पठनरःकश्चिद्विस्फोटज्वरशांतये॥८६॥ गुडूचीमधुकंद्राक्षामोरटंदाडिमैःसह॥ पाककालेपदात
व्यंभेषजंगुडसंयुतं॥८७॥ तेनपाकंव्रजात्याशुनचवायुःप्रकुप्यति॥ लिहेद्वरदचूर्णवापाचनार्थंगु
डेनतु॥८८॥ अनेनाशुविपच्यंतेवातपित्तकफोद्भवाः॥ गुडूचीमधुकंरास्नापंचमूलंकनिष्टकं॥८९॥

चंदनं कांस्मर्यफलं बलामूलं विकंकतं ॥ पाकूकाले सस्तूर्यां तु वातजायां प्रयोजयेत् ॥ ९० ॥ सौवीरेण तु सं
पिष्टं मातुलुंगस्य केसरं ॥ प्रलेपात्यातयत्याशु दाहं चापि नियच्छति ॥ ९१ ॥ पंचवल्कलचूर्णेन कुदनीमद
चूर्णयेत् भस्मनाके चिदिछंति तिलचूर्णं तथापरः ॥ ९२ ॥ पंचतिक्तं प्रयुंजीत पानाभ्यंजनभोजनैः ॥
कुर्याद्व्रणविधानं च तैलादीन्वर्जयेत्सिरं ॥ ९३ ॥ ॥ इति मसूरिकाचिकित्सितं षट्‌त्रिंशत्तमोध्यायः ॥
॥ ॥ अथ क्षुद्ररोगचिकित्सितं व्याख्यास्यामः ॥ ॥ रक्तावसेचनैः पूर्वं चिकित्सेदजगल्लिकां ॥ शु
क्तिसौराष्ट्रीकाक्षारकल्कैश्चालेपयेन्मुहुः ॥ ९४ ॥ श्लेष्मविद्रधिकल्केन क्रमेणानुशायं भिषक् ॥ विवृता
मिंद्रवृद्धां च गर्दभां जालगर्दभीं ॥ ९५ ॥ इरिवेल्लिकूगंधाख्यां क्रमेसित्तास्विसर्प्पिवत् ॥ मधुरौषधसि
द्धेन सर्प्पिषा शामयेद्व्रणं ॥ ९६ ॥ रक्तावसेकैर्बहुभिः श्चंदनैरपतर्प्पणैः ॥ जयेद्विदारिकां लेपैः शिगु जा
देवद्रुमोद्भवैः ॥ ९७ ॥ पनसिकां कच्छपिकां अनेन विधिना भिषक् ॥ साधयेत्कविनानन्त्रौ शाफोन्दोषस
मुद्भवान् ॥ ९८ ॥ शस्त्रेणोहृत्य वल्मीकं क्षाराग्निभ्यां प्रसाधयेत् ॥ मनःशिलामहद्धानस्र हेमैलागुरुचंदनैः
॥ ९९ ॥ जातीपल्लवकल्कश्च निंबतैलं विपाचयेत् ॥ वल्मीकं नाशयेत्तद्धि बहुच्छिद्रं बहुस्रुतं ॥ २५०० ॥ पा

ददार्या पुनः निशांव्य धयेत्तद्विशोधनी ॥ स्नेहस्वेदोपपन्नौ च पादौ संलेपयेन्मुहुः ॥१॥ मधूच्छिष्टवसासर्जघृत
क्षीरविमिश्रितैः ॥ सर्जाह्वसिंधूद्भवयोश्चूर्णं मधुघृताप्लुतं ॥२॥ निर्मथ्य मधुनेत्युक्तं हितं पादप्रमार्जनं ॥ म
धुमधूच्छिष्टकासीसं घयगुड घृतमहिषाख्यशालनिर्यासैः ॥३॥ गैरिकं हितं तैलं लेपः पादस्फुटनापहः ॥ सिद्धं उत्सा
दकासर्षपनिंबमोचकंकूरीषधैर्वारूकनस्मतोये ॥ तैलं विपक्वं लवणान्वयुक्तं तत्सादरीं विनिहंति तिले
पात् ॥ अल्कसे श्लेष्मिरसिक्तो चरणौ परिलेपयेत् ॥५॥ पटोलच्छिष्टकासीसत्रिफलानि मुहुर्मुहुः ॥ करंजबी
जकासीसं रजनी मधुकं मधु ॥६॥ रोचना हरितालं च लेपो यमलसे हितः ॥ लाक्षारसाचयालेपः कार्यं वारत्रुसे
क्षणं ॥७॥ दहेल्ल ददमुद्धूस तैलेन मदनेन वा ॥ लिप्यमुष्णांबुना श्वित्रमुत्सृत्याभ्यज्यतद्व्रणं ॥८॥ दत्वा सर्जरस

॥११०॥

स्य चूर्णं बध्वा व्रणवदाचरेत् ॥ स्वरसेन हरिद्रायाः पत्रैर्वा छायसंभ्यर्यां ॥९॥ पिष्टातोयेन कल्केन लिंपेच्छ्वि
त्रं पुनःपुनः ॥ निंबोदकेन वमनं पद्मिनीकंटके हितं ॥१०॥ अहिपूतनके धात्र्याः पूर्वं स्तन्यं विशोधयेत् ॥ त्रिफला
खदिरक्वाथैर्व्रणानां धावनं सदा ॥११॥ कंडूघ्नं त्रिफलाकल्कैः सर्पिः सिद्धं शिशोर्हितं ॥ गुदभ्रंशे गुदस्नेहस्य
ज्याशु प्रवेशयेत् ॥१२॥ प्रविष्टे स्वेदयेद्धापिपदकं गोफणयान्तरं ॥ निरंत्रमूषकं पक्वं पंचमूलमयो जितं ॥१२॥

तैलं वातहरं सिद्धं गुदभ्रंशहरं परं॥ सन्निरुद्धगुदे तैलैः सेको वातहरैर्हितः॥१४॥ निह्रु प्रकुसेनाडिं प्रवेशये
न्नयतो मुखी॥ घृततैलवसामज्जास्निग्धोस्तैः परिषेचयेत्॥१५॥ अहा अहा स्रवेगानां वर्त्तिस्थूलतरां ततः॥
एवं विदध्याद्द्वारं स्निग्धोल्लेनचनोजयेत्॥१६॥ विमुच्यस्तेचनीनास्त्रेस्थिस्त्वाकुर्यात्क्रियाक्रमं॥ स्नेहोपना
हे परिक्लन्नकायां कृत्वा समभ्यज्य घृतेन पश्चात्॥१७॥ प्रविश्यचिन्मर्मसमैः प्रविष्टमासैः सुपिष्टैरुपनाहये
त्॥१७॥ स्नेहस्वेदैस्तथा वैमं चिकित्सा च पाटिकं॥ न्नंगराजस्य मूलं च धात्रीरससमन्वितं॥१८॥ चूर्णंकुस
हसालेपाद्धराह द्विजनाशनं॥ चर्मकीलं जतुमणिं मलाख्यं तिलतां तथा॥१९॥ उत्कृत्य शस्त्रेणादहेत्क्षाराग्नि
भ्यामशेषतः॥ युवानपिडिकान्यच्छनीलिकान्यंगकर्कशान्॥२०॥ शिराव्यधैः प्रलेपैश्च दयेदभ्यंजनैस्तथा॥
सलोध्र कुचयालेपस्तारुण्यपिडकापह॥२१॥ तद्वद्गोरोचनायुक्तं मरिचं मुखलेपनात्॥ व्यंगेषु चार्जुनत्व
ग्वा मंजिष्ठा वा समाक्षिका॥२२॥ लेपः सनवनीतो वाश्वेताश्वखुरजामखी॥ रक्तचंदनमंजिष्ठा कुष्ठलोध्रप्रियं
गवः॥२३॥ वटांकुरा मसूराश्च व्यंगघ्ना मुखकांतिदा॥ व्यंगानालेपनं शस्तं रुधिरेण शशस्य च॥२४॥ वरु
णस्य कषायेण मुखमुच्छाद्य लेपयेत्॥ तथैव दधिमिश्रेण पिडकाकील शांतये॥२५॥ केवलान् पयसा

पिष्ट्वा तीक्ष्णान् शाल्मलिकंटकान्॥ आलिप्तस्त्र्यहमेतेन भवेत्पद्मोपमं मुखं॥२६॥ मसूरैः सर्प्पिषा भृ
ष्टैर्लिप्तमास्यं पयोन्वितं सप्तरात्रेण भवति पुंडरीकदलोपमं॥२७॥ मातुलुंगजटा सर्प्पिः शिला गोसकृ
तो रसः॥ मुखकांतिकरो लेपः पिडकातिलकालजित्॥२८॥ प्रियंगुचंदनं लोध्रं कुष्टं पांडुवटछदं॥ काली
यकान्वितं लेपात्कुर्याच्चंद्रनिभं मुखं॥२९॥ हरिद्राद्वययष्ट्याह्वकालीयककुचंदनैः॥ प्रपौंडरीकमधूकैस्तै
लं वाभ्यंजने हितं॥३०॥ पिप्लवं नीलिकां व्यंगतिलकान्मुखदूषिकान्॥ नित्यसेवी जयेत्क्षिप्रं मुखं कुर्यान्म
नोरमं॥३१॥ मधुकस्य कषायेण तैलस्य कुडवं पचेत्॥ कल्कैः प्रियंगुमंजिष्ठाचंदनोत्पलकेसरैः॥३२॥
कनकं नाम तत्तैलं मुखवर्णकरं परं॥ अतीव श्रगतालिकाशोधनं परमं हितं॥३३॥ कुंकुमं चंदनं लाक्षामं
जिष्ठा मधुयष्टिका॥ कर्षप्रमाणैरेतैस्तु तैलस्य कुडवं पचेत्॥३४॥ तद्द्विगुणमजाक्षीरं शनैर्मृद्वग्नि
ना पचेत्॥ सम्यक्पक्वं परं ह्येतन्मुखवर्णप्रसादनं॥३५॥ नीलीकापिडीकाव्यंगान्न्यंगादेर्विनाशये
त्॥ अरूंषिकं जलौकाभिर्बहुशो ग्राहयेद्भिषक्॥३६॥ प्रक्षाल्ययेन्मुखं तत्र सैंधवक्काथवारिभिः॥ मु
हुर्मुहुस्ततो लिंपेत्पटोलारिष्टवासकैः॥३७॥ लिंबोदकेन लवणैस्ततो हन्यादरूंषिकां॥ गुडूचिलाक्षिरः

॥१११॥

एवं क्रियमेतां प्रयोजयेत्॥४७॥ हरिद्राद्वयचूर्णनिंबत्रिफलारिष्टचंदनैः॥ एतैस्तैलं मसूरीणां सिद्धमभ्यं
जने हितं॥४८॥ दारुणके शिरां विध्येत्स्निग्धस्विन्ने ललाटजां॥ अवपीडशिरोबस्तीनभ्यंगांश्चावचा
रयेत्॥४९॥ कोद्रवाणां तृणक्षारपानीयं परिधावनं॥ कुर्याद्दारुणके मूर्ध्नि प्रलेपो मधुसंयुतः॥५१॥ प्रि
यालबीजमधुकं कुष्ठमाषैः ससैंधवैः॥ इंद्रलुप्ते शिरां विध्वा निलां कासीसतुत्थकैः॥५२॥ लेपयेत्तारिताः
कल्कैस्तैलं वाभ्यंजने पचेत्॥ कुटंनटशिरवीजातीकरंजकरवीरकैः॥५३॥ अवगाढपदं वाथ प्रच्छयित्वा पुनः
पुनः॥ गुंजाफलैश्वीरं लिपेत्कैरशैमूमिसमंततः॥५४॥ रंध्रलुसापहो लेपो मधुकं जिकं॥ पतंसनेन लोके
शा लेपाद्रो हंति चद्रुतं॥५५॥ गुंजापत्रविषं तैलं लाक्षा मधुकं कांजिकं॥ पतंसनेन लोम्नां लेपाद्रो हंति
चद्रुतं॥५६॥ गोक्षुरस्तिलपुष्पाणि तुल्यं च मधुसर्पिषं॥ शिरः प्रलेपयेत्तेन केशाः समुपचीयते॥५७॥
हस्तिदंतमषीं कृत्वा मुख्यं चैव रसायनं॥ लोमान्यनेन जायंते लेपात्पाणितलेष्वपि॥५८॥ केशीभृंगति
लगुंजायष्ट्याह्वायोमलं रसं॥ हस्तिदंतमजामेषशृंगं वाजिपुराणिच॥५९॥ अंतर्दग्धानि तुल्यानि पि
ष्टानि त्रिफलांबुना॥ स्निग्धं नीलं घनं कुर्युः क्लिष्टकेशान् प्रलेपनात्॥६०॥ सूर्यपक्वं चटारोह कासीच

र्णाम्भैरसैः॥ तैलमध्यात्कचोद्भिदं कुर्यान्मूर्ध्नि चन्नीयतां॥५१॥ तैलं सयष्टीमधुकैः क्षीरं धात्रीफलैः श्रृतं॥ नस्तोद
त्तं जनयति केशान् श्मश्रूणि चायथा॥५२॥ भृंगराजस्त्रिफलोत्पलसारि लोहपुरीषसमन्वितकारि। तैल
मिदं पचदारुणहारि कुंचितकेशघनस्थिरकारि॥५३॥ अयोरजो भृंगरसस्त्रिफला कृष्णमृत्तिका॥ स्थित
मिक्षुरसे मासं समूलं पलितं जयेत्॥५४॥ त्रिफलानीलिनीपत्रं लोहं भृंगरजः समं॥ अविमूत्रेण संयु
क्तं कृष्णीकरणमुत्तमं॥५५॥ अथवा क्षीरसंपिष्टो दुग्धिकाकरवीरकौ॥ उत्पाद्य पलितं देयो वासयेत्स
लिलापहो॥५६॥ निंबस्य तैलं प्रकृतिस्थमेव नस्येन षिक्तं विधिना यथावत्॥ मासेन तत्क्षीरभुजो ह्यवश्यं
जराग्रभूतं पलितं निहंति॥५७॥ लोहमलामलककल्कैः सजपाकुसुमैर्नरः॥ सपिप्पलिश्चंदनोत्पलैः त्रि
रोरुजां सपलितं नावनाभ्यंजनैर्जयेत्॥५८॥ भृंगराजरसः प्रस्थं तद्वच्च पयसः समं॥ मधुकात्तैलकुडवं वि
पक्वं पलितापहं॥५९॥ जीगीनिलीचूर्णं सौहरिपत्त्वग्रसान् हरेत्॥ शिखिपित्तो विषाम्रास्थिमद्यं स
र्जेनोपरेः॥६०॥ सनीलीभृंगकासीसैरक्षतैलं विपाचयेत्॥ लोहभांडस्थितं मासमकालपलितं जयेत्॥
॥६१॥ एतदभ्यंगमात्रेण नावनेच्चिरकालजं॥६२॥ ॥ इति सुदंगचिकित्सीते सप्तपंचाशत्तमोध्यायः॥ ॥

॥ ॥अथमुखरोगचिकित्सितंव्याख्यास्यामः॥ ॥जातीपत्रामृताद्राक्षायासदार्वीफलत्रिकैः॥क्वाथःक्षौद्रयु
तोनोगंडूषोमुखपाकनुत्॥६३॥पटोलनिंबजंबाम्रमालतीपल्लवोद्भवः॥पंचपल्लवकःश्रेष्ठःकषायोमुखध
वने॥६४॥पंचवल्ककषायेणत्रिफलाक्वाथएववा॥मुखपाकेषुसक्षौद्रःप्रयोज्योमुखधावने॥६५॥स्वरर
कथितोदार्व्याघनीभूतोरसक्रिया॥सक्षौद्रामुखरोगास्रक्दोषनाशीव्रणापहः॥६६॥ससच्छदोशीरप
टोलमुस्तहरीतकीतिक्तकरोहिणीभिः॥यष्ट्याकराजद्रुमचंदनैश्चक्वाथंपिबेत्पाकहरंमुखस्य॥६७॥प
टोलसुंठीत्रिफलाविशालात्रायंतिकाद्विनिशामृतानां॥पीतःकषायोमधुनानिहंतिमुखेस्थितश्चा
स्यगदाननेषन्॥६८॥तिलानीलोत्पलंसर्पिःशर्कराक्षीरमेवच॥सक्षौद्रोदग्धलगास्यगंडूषोदा
हनाशनः॥६९॥कंठरोगेष्वसृग्मोक्षोतीक्ष्णेनस्यादिकर्मच॥क्वाथपानंचदार्व्याचनिंबतार्क्ष्यकलिंगजः॥७०॥
हरीतक्याःकषायोवापेयोमाक्षिकसंयुतः॥कटुकातिविषादारुपाठामुस्तकलिंगकाः॥७१॥गोमूत्रक्वथिताः
पेयाःकंठरोगविनाशनः॥गृहधूमोयवक्षारःपाठाव्योषरसांजन॥७२॥तेजोह्वात्रिफलालोध्रंचित्रक
श्चेतिचूर्णितं॥सक्षौद्रंधारयेदेतद्गलदोषरोगविनाशनं॥७३॥कालकंनामचूर्णंतुगलास्यमुखरोगनुत्॥

त्रि ४

मनःशिला यवक्षारो हरितालं ससैंधवं ॥७४॥ दार्वीत्वगिति चूर्णं तु माक्षिकेन समायुतं ॥ मूर्छितं घृत
मंडेन मुखरोगेषु च श्रेष्टं पीतकं नाम कीर्तितं ॥७५॥ उपजिह्वां तु संलिख्य क्षारेण प्रतिसारयेत् ॥ शिरो
विरेकगंडूषधुमैश्चैनामुपाचरेत् ॥७६॥ व्योषक्षारोभयावान्हिश्चूर्णमेतत्प्रघर्षणं ॥ उपजिह्वाप्रशांत्य
र्थमेभिस्तैलं निपाचयेत् ॥७७॥ उपजिह्वकवच्चापि साधयेदधिजिह्वकं ॥ बकुलस्य फलं लोध्रं वज्रवल्ली
कुरंटकं ॥७८॥ चतुरंगुलवब्बूलवाजिकर्णैरसायनं ॥ एषां कल्कं कषायास्तान् तैलं पक्वं मुखं घ्नं ॥७९॥
स्थैर्यं करोति चलतां दंतानां धावनेन च ॥ कुष्ठोद्भितार्कवं दार्वी सुमनारिष्टपल्लवाः ॥८०॥ चेतकी कटुकामु
स्तं ह्रीबेरं ससहाचरं ॥ एष लेपः कषायो वा चूर्णो वा मधुसंयुतः ॥८१॥ दंतचालप्रशमनस्तयोपकुशपाक
हा ॥ पिप्पल्यः सर्षपाः श्वेताः नैचुलं नागरं फलं ॥८२॥ सुखोदकेन संसृज्य कवलं तस्य योजयेत् ॥ तेजोव्हा
मगधामूलं समंगां कटुकां घनं ॥८३॥ पाठा ज्योतिष्मती लोध्रं दार्वी कुष्टं च चूर्णयेत् ॥ दंतानां घर्षणं कंडूर
रक्तस्रावरुजापहं ॥८४॥ शीतादे हृतरक्ते तु तोयेनागरसर्षपान् ॥ निःक्वाथ्य त्रिफलां वापि कुर्याद्गंडूष
धारणं ॥८५॥ प्रियंगवश्च मुस्ताश्च त्रिफला च प्रलेपनं ॥ शोषिरे हृतरक्ते तु लोध्रमुस्तारसांजनैः ॥८६॥

॥१२३॥

९९

सक्षौद्रैः सस्यतैलपोगंडूषेक्षीरिणोहिताः ॥ दंतपुष्पुटकेकार्यंतरुणेरक्तमोक्षणं ॥ ८७ ॥ सपंचलवणक्षारंसक्षौ
द्रंप्रतिसारणं ॥ विश्रांवितेदंतवेष्टेतत्रःसुप्रतिसारयेत् ॥ ८८ ॥ लोध्रपत्तंगमधुकंलाक्षाचूर्णैर्मधूत्तरैः ॥ गंडूषे
क्षीरिणोयोज्यासक्षौद्रघृतशर्कराः ॥ ८९ ॥ सुखोष्णाःस्नेहकवलासर्प्पिषस्त्रिवृत्तस्यवा ॥ निर्यूहाअनिलघ्ना
नांदंतहर्षप्रमर्दनाः ॥ ९० ॥ कषायेर्जातिमदनकटुकस्वादुकंटकैः ॥ लोध्रमंजिष्ठ~~मंजिष्ठ~~खदिरयष्ट्याह्वैश्चापि
पत्सतं ॥ ९१ ॥ तैलंचशोधनंतद्धन्याद्दंतगतामयान् ॥ तुलांखदिरसारस्यद्विगुणामरिमेदसः ॥ ९२ ॥ प्रक्षा
ल्यजर्जरीकृत्यचतुर्द्रोणेंभसःपचेत् ॥ द्रोणशेषंकषायंतुहृत्वाभूयःपचेत्ततः ॥ ९३ ॥ रसेतस्मिन्परीभूतेचूर्णी
कृत्याथनागिकं ॥ चंदनंपद्मकोशीरंमंजिष्ठाधातकीफलं ॥ ९४ ॥ प्रपौंडरीकयष्ट्याह्वत्वगेलापत्रकेसरं ॥ लाक्षा
रसांजनंमांसीत्रीफलालोध्रवालुकं ॥ ९५ ॥ रजन्यौफलिनीमेलांसमंगांकट्फलांत्वचं ॥ यवासगरुपत्तंगंकस्तू
रिगैरिकांजनं ॥ ९६ ॥ लवंगंजातिकंकोलंजातीकोशान्यलोन्मितान् ॥ कर्पूरस्फुटचेवापिचूर्णीकृत्यप्रदापयेत् ॥ ९७
ततस्तुगुटिकाःकार्याःशुष्काश्चास्येनधारयेत् ॥ तैलंवानेनकल्केनकषायेनचसाधयेत् ॥ ९८ ॥ दंतानांचलन
भ्रंशशौषिर्यकृमिरोगनुत् ॥ मुखपाकस्यदौर्गंध्यवम्यरोचकनाशनं ॥ ९९ ॥ श्रावण्यापुलमेमिण्पावेश्वर्य

गल्लशोषनुत्॥ सर्व्वचैनससस्यम्मं॥॥२६०॥ तुलाघृतानीलसहाचरस्यद्रोणांभसासंस्पगेयथावत्॥ पूर्वे
चतुर्भागसतुतैलं पचेच्छनेरर्द्धपलप्रयुक्तैः॥१॥ कल्कैरनंताखदिरारिमेदोजंबाम्रयष्टीमधुकोत्पलानां॥ तत्तै
लमाश्वेतघृतंमुखेनस्थैर्यंद्विजानांविजहातिसद्यः॥२॥ ॥ ॥इतिमुखरोगचि० अष्टपंचाशमोध्यायः॥
॥ ॥अथकर्णरोगचिकित्संव्याख्यास्यामः॥ ॥कपित्थमातुलिंगाम्रशृंगवेररसैःशुभैः॥ सुखोष्णैः पूरयेत्कर्णं
कर्णशूलोपशांतये॥२॥ शृंगवेरंचमधुकंसैंधवंतैलमेवच॥ कृत्त्वणंकर्णयोर्द्देयमेतद्धावेदनापहं॥३॥ ल
शुनार्द्रकशिग्रूणांमुरंग्याभूलकस्यच॥ कदल्याःस्वरसःश्रेष्ठः कदूष्णः कर्णपूरणे॥४॥ द्राक्षायष्टीश्टतं
क्षीरंशस्यतेकर्णपूरणं॥ कर्णःकोष्णेनशुक्तेनपूरयेत्कर्णशूलिनः॥५॥ समुद्रफेनचूर्णेनयुक्त्यावाप्यवचू
र्णयेत्॥ अर्ककुरानम्लपिष्टास्तैलोत्क्ताक्लवणान्वितान्॥७॥ सन्निदध्यास्नुहीकांडेकोरितेनतसदावते॥ पुट
पाकक्रमभिन्नानपीडयेदारसागमान्॥८॥ सुखोष्णंतद्रसं कर्णेदापयेच्छूलनुत्तये॥ अष्टाशीमपिमूत्रेण
न्यतमेननवा॥९॥ कोष्णेनपूरयेत्कर्णंकर्णशूलोपशांतये॥ तीव्रशूलातुरेकर्णेसंनादेक्लेदवादिनि॥१०॥ बस्तमू
त्रंक्षिपेत्कोष्णंसैंधवेनसमन्वितं॥ अश्वत्थपत्रखलंवाविधायबहुपत्रकं॥११॥ तैलोक्तमंगारपूर्णंतुनि

दध्याच्छ्रवणे॥ परि॥ यत्तैलं श्रवणे तस्मात्पक्वल्लीदंतापितात्॥१३॥ तस्मात्संश्रवणः श्रोनः सद्यो गृह्णाति वेद-
नं॥ महतः पंचमूलस्य क्वाथं अन्यष्टांगुलानितु॥१४॥ क्षौमेणावेष्ट्य संसिच्यते तैले नादीपयेत्ततः॥ यत्तै-
लं चावर्ततेन्यः सुखोष्णं तत्प्रयोजितं॥ सैयं तद्दीपिका तैलं सद्यो गृह्णाति वेदनां॥ एवं कुर्याद्भद्रकाष्टे
कुष्ठे काष्टे च सारले॥१५॥ मतिमान् दीपिकातैलं कर्णशूलनिवारणं॥ हिंगुतुंबरुसुंठीभिः सज्यं तैलं तु सा-
र्षपं॥१६॥ कर्णशूलप्रधाने तु पूरणं हितमुच्यते॥ देवदारुवचाकुष्टं सतादृक्षाकिम्बसैंधवैः॥१७॥ सिद्धं तैलं
बस्तमूत्रे कर्णशूलनिवारणं॥ शुष्कमूलकशुंठीनां क्षारो हिंगुसनागरः॥१८॥ शतपुष्पावचाकुष्टं दारु शि-
ग्रुरसांजनं॥ सौवर्चलं यवक्षारं स्वर्जिकोद्भिनसैंधवं॥१९॥ भूर्जग्रंथि विडं मुस्तं मधुसुक्तं चतुर्गुणं॥ मा-
तुलंगरसश्चैव कदल्यारस एव च॥२०॥ तैलमेभिर्विपक्तव्यं कर्णशूलहरं परं॥ बाधिर्यं कर्णनादश्च
पूयास्रावश्च दारुणः॥२१॥ पूरणादस्य तैलस्य स्य कृमयः कर्णयोः श्रिताः॥ क्षिप्रं विनाशं गच्छंति कृष्णा-
त्रेयस्य शासनात्॥२२॥ क्षारतैलमिदं श्रेष्ठं मुखदंतामयापहं॥ चूर्णं पंचकषायाणां कपित्थरसेरेव
च॥२३॥ कर्णस्रावे प्रशंसंति पूरणं मधुना सह॥ सर्जत्वक्चूर्णसंयुक्तः कार्पासीफलजो रसः॥२४॥ म

५२

धुसंमिश्रितम्साधुकर्णस्रावेप्रशस्यते॥जंब्वाम्रपत्रंतरुणंसमांशंकपित्थकार्पासफलंचसांद्रं॥रसारसं
तन्मर्नाविमिश्रंस्रावापहंसंप्रवदंतितज्ज्ञाः॥२५॥प्रियंगुमधुकांबष्टाधातकीयुतेसल्लकीर्णाभिः॥मंजि
ष्टालोध्रलाक्षाभिःकपित्थस्यरसेनवा॥२६॥पचेत्तैलंतदास्रावमनिगृह्णातिपूरणात्॥वरुणार्क
कपित्थाम्रजंबूपल्लवसाधितं॥२७॥पूतिकर्णापहंतैलंपत्रजातीरसोथवा॥कुष्ठहिंगुवचादारुशता
ह्वाविश्वसैंधवैः॥२८॥पूतिकर्णापहंतैलंवस्तमूत्रेणसाधितं॥कृमिकर्णकनाशार्थंकृमिघ्नंयोजये
द्विधिः॥२९॥वार्त्ताककधूपश्चहितःसर्षपस्तैलएवच॥पूरणंहरितालेनगवांमूत्रयुतेनच॥३०॥राजवृक्षा
दितोयेनसुरसादिजलेनवा॥कर्णप्रक्षेपनंकुर्याच्चूर्णैरेतैश्चपूरणं॥३१॥हलिरविनिंतकृव्योषानेत्री
रुस्यप्रक्षालयेद्बुधः॥वसनंतेनश्रवणोपरिपूरयेत्सुतरां॥३२॥कर्णजलौकानियतंकृमिकीटपिपी

११५

लिकास्तथान्येपि॥निपतंतिनिरवशेषाःक्षारजाश्चापिमंडस्था॥३३॥विधिश्चकफहासर्वःकर्णकंडू
मतिष्यते॥नादबाधिर्ययोःकुर्याद्यतश्चलोक्तमौषधं॥३४॥गवांमूत्रेणबिल्वानिपिष्ट्वातैलंविपाच
येत्॥दक्षीरतद्यवितरेद्बाधिर्यकर्णपूरणं॥३५॥एरंडशिग्रुवरुणमूलकात्स्वरसेजेरसे॥चातुर्गुणेपचे

तैलं क्षीरे चाष्टगुणे ऽन्विते ॥ ३६ ॥ यष्ट्याह्वक्षीरकाकोलीकल्कयुक्तं निहंति तत् ॥ नादयाधिर्यश्लानिनाय
नान्यंग पूरणैः ॥ ३७ ॥ कल्कक्वाथेन यष्ट्याह्वकाकोलीमाषधान्यकैः ॥ शृंगकंस्य वसा पक्वा कर्णनादान्ति
नाशनी ॥ ३८ ॥ सृताम रीवाजिगंधापयस्यैरंडजीरकैः ॥ तैलं विपक्वं सक्षीरं पालीपुष्टीकरं परं ॥ ३९ ॥
कल्केन बीजनीयेन तैलं पयसि पाचितं ॥ अनूपमांसक्वाथेन पालीपाषाण कर्द्दनं ॥ ४० ॥ ॥ इति क
र्णरोगचिकित्सिते एकोनषष्टिमोऽध्यायः ॥ ॥ अथ नासारोगचिकित्सितं व्याख्यास्यामः ॥ ॥ ॥
विडंगसैंधवं हिंगु गुग्गुलुः समनःशिलां ॥ प्रतिश्यायेक्वाथयुक्तं चूर्णमाघ्राय नश्यति ॥ १ ॥ अथवा स
घृतान् सक्तून् कृत्वा मल्लकसंपुटे ॥ नवप्रतिश्यायवतां धूमं वैद्यः प्रयोजयेत् ॥ २ ॥ कवोष्णं दशमूलांबु जीर्णो वा वारुणीं पिबेत् ॥ जिघ्रचोरकतर्करीवचाजाज्युपकुंचिका ॥ ३ ॥ बालमूलकयोर्यूषः
कुलत्थोऽथ स्त्र पूजितः ॥ स्वेदो घृतं च हिमं तोयं यामापनाय प्रशस्यते ॥ ४ ॥ ततः पक्वं फलं ज्ञात्वा हरेच्छीर्ष
विरेचनैः ॥ पिप्पल्यः शिग्रुबीजानि विडंगं मरिचानि च ॥ ५ ॥ अवपीडः प्रयुक्तोऽयं प्रतिश्यायनिवा
रणः ॥ सठीतामलकीव्योषचूर्णं सर्पिर्गुडं पिबेत् ॥ ६ ॥ हरेद्घोरं प्रतिश्यायं पार्श्वहृत्कुक्षिशूलनुत्

वातिके च प्रतिश्याये पिबेत्सर्प्पिर्यथाक्रमं॥४७॥पंचभिर्लवणैः सिद्धं प्रथमेन गणेन च॥रक्तपित्तो
त्थयोः पेयं सर्प्पिर्मधुरकैः श्रृतं॥४८॥परिषेकान्प्रदेहांश्च कुर्यादपि च शीतलान्॥हितं पित्तप्रतिश्या
ये पावनार्थं स्त्रजं पयः॥४९॥शृंगवेरेण पयसा शृंगवेरं मथापि वा॥कफजे सर्प्पिषा स्निग्धं तिलमाष
विपक्वया॥५०॥यवाग्वा वामयित्वा तु श्लेष्मघ्नं क्रममाचरेत्॥दार्वीइंगुदानिकुंभैश्च किणिह्यासरलेन
च॥५१॥कर्त्तयोत्र रुतायोग्या धूमपाने यथाविधिः॥मुस्तां तेजोवतीपाठां कट्फलमधुकं वचां॥५२॥
सर्षपान् पिप्पलीमूलं पिप्पलीसैंधवाग्निकौः॥तुल्यं करंजबीजं च कृत्वा पत्रयोजयेत्॥५३॥हितं
पा५
शिरोविकारेषु तैलमेतन्निर्विचितं॥गोरवारोच्चकष्ठादोलं घनं कफपीनसे॥५४॥स्वेदाः सेकाश्च पाना
११६॥
र्थं लिप्ते शिरसि सर्षपैः॥पाठाद्विरजनीमूर्वापिप्पलीजाजिपल्लवैः॥५५॥दंत्या च तैलं संसिद्धं स्यान्नस्यं सि॥
सम्यक् पीनसे॥कलिंगहिंगुमरिचलाक्षासुरसकट्फलैः॥५६॥कुष्ठोग्रा शिग्रुजंतुघ्नैरवपीडः प्रशस्यते॥
तैरेव मूत्रसंयुक्तैः कटुतैलं विपाचयेत्॥५७॥अपीनसे पूतिनस्ये पत्रामनं कीर्तितं परं॥सुंठीकुष्टक
णा निम्ब द्राक्षा कल्कक षायवत्॥५८॥साधितं तैलमाज्यं वा नस्यं पक्षवधुरुक्प्रणुत्॥व्याघ्रीदंती वचा

त्रिगुसुरसंव्योषसैंधवैः ।।५९।। पाचितं नावनं तैलं पूतिनासागदं हरेत् ।। प्रयास्रस्रुक्पितघ्नाः कषा
यानावनांचिन ।।६०।। पाके दाहाद्यरुक्षेषु शीताल्लेपाः ससेचनाः ।। नासापाके पित्तहरं विधानं कार्यं सर्वं
बह्यमभ्यंतरं च ।।६१।। हरेद्रक्तं क्षीरवृक्षत्वक्कृष्वयोज्यासेकेसघृताश्च प्रदेहाः ।। नासास्रावे क्षीरस
र्पिः प्रधानं तैलं सिद्धं चाणुकल्केन नस्यं ।।६२।। सर्पिः पानं भोजनं जांगलेश्वास्रे हः स्वेदः स्नेतिकश्वात्र
धूमः ।। गृहधूमवर्णारुक्षारनलाक् सैंधवैः ।।६३।। सिद्धं सिषरिबीजैश्च तैलं नासार्शसां हितं ।। त्रिगुवां
ताक्चाव्योषविडदाडिमसैंधवैः ।।६४।। नस्यदानाज्जयेसिद्धं तैलं नानागदार्बुदाणं ।। क्षारोर्बुदाधि
मांसेच त्रियात्रोषाद्य वक्ष्यच ।।६५।। ।।इति नासारोगचि॰ षष्टितमोध्यायः ।। ।। ।।अथ नेत्ररो
गचिकित्सितं व्याख्यास्यामः ।। ।।लंघनालेपनस्वेदशिराव्यधविरेचनैः ।। उपाचरेदभिष्यंदानजाना
श्चोतनादिभिः ।।६६।। श्रीवासातिविषाद्योद्रचूर्णितैस्यसैंधवैः ।। अव्यक्तेक्षिगदे कार्यं प्लोतस्वेदं तु
उन्नबहिः ।।६७।। दध्नाससैंधवंलोध्रं मधूच्छिष्टं युतं घृते ।। पिष्टमंजनलेपाभ्यां सद्यो नेत्ररुजापहं ।।६८।।
सुषांबुपिष्टसंभूतैः शर्करालोद्रसैंधवैः ।। पूरणं वातिके तद्वत् सितानागरसावरैः ।।६९।। तथासा

वरकं लोध्रघृतं भृष्टं बिडालकः ॥ आर्या हरितकी तद्वत् घृतयुक्ता रुजापहा ॥ ७० ॥ कुरंटपुष्पयष्ट्याह्वसि
ताबिल्वैः समस्तुभिः ॥ सुंठीसैंधववयष्ट्याह्वलोध्रभृष्टे घृते नवा ॥ ७१ ॥ आश्च्योतने मारुतजे क्वाथ्ये बिल्वादि
भिर्हितः ॥ क्वाथः सोरंडबृहतीतर्करीमधुशिग्रुभिः ॥ ७२ ॥ एरंडपल्लवे मूले त्वचि आजं पयः शृतं ॥ टंकर्याश्च मु
ल्लेषु सुखोष्णं सुखोष्णं सेचने हितं ॥ ७३ ॥ शूलघ्नं क्वाकूणो दीप्यं यष्टिसैंधववसा धौतं ॥ ह्रीवेरचक्रूत्रांगेष्टदुं
बरोत्वक्त्रसधितं ॥ ७४ ॥ सा भयापयसाज्येन शूल अश्च्योतने हितं ॥ सर्पिषाश्च्योतनं श्रेष्टं सार्पिषाचो
पनेहितं ॥ ७५ ॥ परिषेकः सुखोष्णेथ मूर्द्धिंन तैलनिवारणं ॥ पूर्वभक्तं हितं सर्पिः क्षीरं वा पूर्वभोजने ॥ ७६ ॥
जात्याः पुष्पं घृते भृष्टं चक्षुष्यमुपनाहनं ॥ बृहत्येरंडमूलत्वक् शिग्रोर्मूलं ससैंधवं ॥ ७७ ॥ अजाक्षीरेणपि
ष्टं स्याद्वर्ति र्वातोक्षरोगनुत् ॥ हरिद्रे मधुकं पथ्या देवदारुं च पेषयेत् ॥ ७८ ॥ आजेन पयसा श्रेष्टमभिष्यंदे
तदंजनं ॥ ७९ ॥ पुष्पांजनं तु स्वक्लोध्रलघ्नाजाजी निशा तूरिकं चक्रपस्स ॥ सकांजिकाश्च्योतनवस्त्रकर्द
दाहं वरांगं च रुजं च हन्यात् ॥ ८० ॥ गैरिकं सैंधवं कृष्णा तगरं च यथोत्तरं ॥ पिष्टं द्विरंशतोद्भिर्वा गुटिकांं
जनमिष्यते ॥ ८१ ॥ सैंधवं दारु सुंठी च चूर्णं मातुलिंगरसे घृतं ॥ तान्योदकार्द्दे कर्त्तव्यं सुखपाकेतदंजनं ॥ ८२ ॥

नालन ॥१२७॥

ॐ ॥१२

शुष्काक्षिपाके हविषां पानमक्ष्णोश्च तर्प्पणं॥ घृतेन जीवनीयेन नस्यं तैलेन चाणुना॥८५॥ परिषेके हितं चात्र पयः कोष्णं ससैंधवं॥ रजनीदारुसिद्धं वा सैंधवेन समायुतं॥८६॥ सर्प्पिर्युतं स्तन्यपिष्टमंजनं मे होषधं॥ प्रपौंडरीकयष्ट्याह्वनिशामलकपद्मकैः॥८७॥ शीतैर्मधुसमायुक्तैः सेकः पित्ताक्षिशूलनुत्॥ निरिटत्रिफलायष्टीशर्कराभद्रमुस्तकैः॥८८॥ पिष्टैः शीतांबुना सेको रक्ताभिष्यंदनाशनः॥ धात्रीलोद्ध्रघृतं त्वष्टं शिलायुक्तं सुवर्त्तितं॥८९॥ प्रमज्य गुटिकां कृत्वा कुपित्ते लोचने बहिः॥ पैत्तिके चंदनानंतामंजिष्टाभिबिडालकः॥९०॥ धार्यपद्मकयष्ट्याह्वमांसीकालेयकैस्तथा॥ सुमनक्षारकांश्चैवात्रिफलामधुकंबला॥९०॥ पित्तरक्तापहावर्त्तिः पिष्टादिव्येन वारिणा॥ उदुंबरफलं लोहे घृष्टं स्तन्येन धूपितं॥९१॥ साज्यं शमी घ्नेद्दाहः शूलरोगाश्रुवर्षजित्॥ कसेरुमधुकानां च चूर्णमंबरसंवृतं॥९२॥ न्यस्तमप्स्वंतरिक्षासु हितमाश्च्योतनं भवेत्॥ श्रीपर्णीपाटली धात्रीतर्कारीबिल्वजार्जुनात्॥९३॥ पुष्पाण्यथ वृहत्याश्च वस्तिलोध्रोच्च तुल्यशः॥ मंजिष्टा वापि मधुना पिष्टापीक्षुरसेन वा॥९४॥ रोधिरस्यंदशांत्यर्थमेतदंजनमिष्यते॥ तिक्तस्य सर्प्पिषः पानं बहुशस्य विरेचनं॥९५॥ अम्लाध्यायितशांत्यर्थं कुर्याल्लेपांश्च शीतलान्॥ कोष्टस्य

चर
नकुपाद

११८

सर्प्पिषः पानैर्विरेकालेपसेचनैः ॥९५॥ स्वादुशीतैः प्रशमयेच्छुक्तिकामंजनैस्तनः ॥ प्रवालमुक्तावैडूर्यशं
खस्फटिकचंदनं ॥९६॥ सुवर्णरजतंक्षौद्रमंजनंशुक्तिकापहं ॥ धूमदर्शी पिबेत्सर्प्पिः सर्वपित्तापहंनजेत्
॥९७॥ सर्प्पिःक्षौद्रंचांजनंस्याच्छिरोर्ह्यातस्यभेषजं ॥ तद्वसैंधवकासीसंस्तन्यपिष्टंचपूजितं ॥९८॥ शिरा
हर्षेजनं कुर्यात्फणितंमधुसंयुतं ॥ मधुनाताक्ष्यशैलंवाकासीसंवासमाक्षिकं ॥९९॥ वितसाम्लंस्तन्ययुक्तं
फाणितंतुससैंधवं ॥ अर्जुनेशर्करामस्तुक्षौद्रैश्चाश्च्योतनंहितं ॥२००॥ शंखंक्षौद्रेण संयुक्तंकतकंसैंध
वेनवा ॥ सितपर्णवफेनंवाप्यथगंजनमर्जुने ॥१॥ पैत्तंविधिविशेषेणकुर्यादर्जुनशीत्तये ॥ कफजेलंघ
नंस्वेदोनस्यतिक्तादिभोजनं ॥२॥ तीक्ष्णैः प्रधमनंकुर्यात्तीक्ष्णैश्चैवोपनाहनं ॥ फणिज्जकास्फोतकपित्थ
बिल्वपत्तूरपिलुःसुरसार्जकभंगैः ॥३॥ स्वेदंविदध्यादथवाप्रलेपंबर्हिष्ठशुंठीसुरदारुकुष्टैः ॥ शुंठीनिंब
दलैःपिंडः सुखोष्णःस्वल्पसैंधवः ॥४॥ धार्यश्चक्षुषिसंक्षेपाच्छोथकंडूव्यथापहः ॥ ससैंधवंलोद्रमथा
ज्यभृष्टंसौवीरपुष्टंसितवस्त्रबद्धं ॥५॥ आश्च्योतनंतन्नयनस्यकुर्यात्कंडूंचरोगंचरुजंचहन्यात् ॥ लोद्रं
सर्प्पिर्षिसंपक्वंखदिराजाजिसर्षपैः ॥६॥ नागरारिष्टसिंधूत्थैर्युक्तंदृषदिचूर्णितं ॥ सितेवाससितद्बद्धं

११८

क्काथः सुशीतो नयने निषिक्तः सर्वप्रकारं विनिहंति शुक्रं ॥ २० ॥ शुद्धशुक्रे निशायष्टीसारिवासावरोमसा ॥
सेचनं लोध्रपोटल्या कोल्लं सोमग्नया थवा ॥ २१ ॥ क्षुन्नपुन्नागपर्णेन परिभावितवारिणा ॥ श्यामाक्काथां
बुना वाथ सेवनं शुक्रनाशनं ॥ २२ ॥ यष्ट्याह्वदार्व्यौ सफल पद्मला क्षा प्रपौंडरीकं नलदं लता च ॥ आश्चोत
नं स्त्रीपयसा विपक्वं सशर्करं नप्रद्वणदाहहंत ॥ २३ ॥ नस्त्रवघ्ररूणापक्कं क्षतशुक्रे घृतं पिबेत् ॥ शिरयाव
हरेद्रक्तं जलौकाभिश्चलोचनात् ॥ २४ ॥ चंदनं सैंधवं पथ्यापलाशनरुशोणितं ॥ क्रमवृद्धमिदं चूर्णं शु
क्रार्मादि विलेपनं ॥ २५ ॥ चंदनं गैरिकं लाक्षा मातीकलिका: समा: ॥ व्रणशुक्रहरी वर्त्तिः शोणितस्य प्रसा
दनी ॥ २६ ॥ समुद्रफेनसिंधूत्थशंखदक्षांडवल्कले: ॥ शिग्रुबीजयुतैः वर्त्तिः शुक्रादीन् नाशयेत् ॥
॥ २७ ॥ स्फटिकोत्पलयष्ट्याह्वशंखगोदंतसैंधवैः ॥ सशिलाचंदनैर्वर्त्तिः शुक्रघ्नी शिग्रुवारिणा ॥ २८ ॥
ताप्यं मधूकसारो वा बीजं वाक्षस्य सैंधवं ॥ मधुनांजनयोगाः स्युः चत्वारः शुक्रनाशनाः ॥ २९ ॥ समुद्रफेन
मनयाह्रीवेरं सकुटं नटं ॥ पिष्ट्वा धात्रीफलक्काथे वर्त्तिः स्याच्छुक्रनाशनी ॥ ३० ॥ दक्षांडत्वक् शिलाशंख
काचचंदनसैंधवैः ॥ तुल्यैरंजनयोगोयं पुष्पार्मादिनिनाशनः ॥ ३१ ॥ शिरीषबीजमरिचपिप्पलीसैंधवै

॥११७॥

का३

रपि॥ शुक्रस्य घर्षणं कार्यमथवा सैंधवेन च॥२३॥ दंतो दंति वराहोष्ट्रगवाश्वाजखुरोद्भवैः॥ सशंखमौक्तिकां
भोधिफेनैर्मरिचपादकैः॥२४॥ क्षतशुक्रमपि द्व्यापि दंतवर्ति निवर्त्तयेत्॥ चतुष्पदद्विजालास्यशंखजबृह
तीफलैः॥२५॥ पुवोष्ट्रमत्स्यस्थीनि विडंगव्यूषणायसैः॥ जलपिष्टैरिमैस्तुल्यैर्दंतवर्तिरिति स्मृता॥२॥
तिमिरार्बुदकाचार्मव्रणमुक्तादिनाशनी॥ त्रिफलाचंदनं व्योषमंजिष्ठातगरं निशा॥२६॥ प्रियंगुसारिवा
नंतायरूदर्जं च चूर्णितं॥ क्षौद्रसैंधवसर्पिर्भिः संयोज्य विधिवत्सचेत्॥२७॥ पुटपाकप्रशस्तोयं शुक्रा
णां लेपनः परः॥ निशारूधकरंजो नालिकेरं च नदहेत्॥२८॥ विश्वाभ्यक्षारकच्चूर्णं भावयेत्तरसा॥ सिक्तं॥
बहुशोंजनमेतस्यात्शुक्रवैवर्ण्यनाशनं॥२९॥ सैंधवं त्रिफला कृष्णा कटुका शंखनाभयः॥ सताम्र
जसा वर्तिः पित्तशुक्रकनाशनी॥३०॥ कृष्णाविडंगमधुयष्टिकसैंधुजन्मविश्वौषधैश्च पयसि सिद्धमिदं च
गव्याः॥ तैलं च्युतं तिमिरशुक्रशिरोक्षिवर्त्मपाकास्ययं जयति नस्यविधौ प्रयुक्तं॥३१॥ पटोलं कटुकं दार्वी
निंबवासाफलत्रिकं॥ दुरालभं पर्पटकं त्रायंती च पलोन्मितं॥३२॥ प्रस्थमामलकानां च साधयेन्नल्व
णेंभसि॥ तेन पादावशिष्टेन घृतप्रस्थं विपाचयेत्॥३३॥ कल्कैर्भूनिंबकटुकामुस्तयष्ट्याह्वचंदनैः॥ स

न्यसेत्सघाम्लकांजिके॥७॥तेनाक्ष्णोःपूरणंकार्यंकूरोगंस्त्रषजंजित्॥नागरत्रिफलालोध्रंसारिवासुरसःश्रृफे
॥८॥कोघ्नमाश्चोत्तनंमिश्रैर्भेषजैःसांनिपातके॥शिग्रुपत्ररसैःसेकोमधुयुक्शोथव्यथापहः॥९॥सैंधवंत्रिफ
लाव्योषंशंखनाभिःसमुद्रजः॥फेनआर्णवकःशस्तोवर्तिःश्लेष्माभिष्यंदनुत्॥१०॥शिग्रुपल्लवनिर्यासः
सुघृष्टस्ताम्रसंपुटे॥घृतेनधूपितोहंतिशोथघर्षाश्रुवेदना॥११॥प्रपौंडरीकयष्ट्याह्वदार्वीलोध्रैःसचं
दनैः॥एरंडांबुयुतैःसेकःसर्वनेत्ररुजापहः॥१२॥श्वेतलोध्रंघृतेभ्रष्टंचूर्णितंतांतवस्रुतं॥उष्णांबुनाविम
र्दितंसेकःशूलहरःपरः॥१३॥पथ्यागैरिकसिंधूत्थदार्वीतार्क्ष्यैःसमाक्षिकैः॥जलपिष्टैर्बहिर्लेपःसर्वनेत्रा
मयापहः॥१४॥लोध्रयष्टीशिलादार्वीतार्क्ष्यैर्लेपोरुजापहः॥दार्व्याःवामधुनाक्वाथःसर्वाभिष्यंदपूरणं॥१५॥
अयमेवविधिःसर्वामंथादिष्वपिशस्यते॥अशांतौसर्वथामंथभ्रुवोरुपरिदाहयेत्॥१६॥जलौकापात
नंश्रेष्ठंनेत्रपाकेविरेचनं॥शिराव्यधंकुर्वीतसेकालेपाश्चपूर्ववत्॥१७॥बिभीतकत्रिवाधात्रीपटोलारि
ष्टवासकैः॥क्वाथोयंमधुनापेयःशोफाक्षिपाकरोगनुत्॥१८॥स्थिरेशुक्रेघनेवायबहुशोथहरःसकृत्॥ स२
शिरःकायविरेकाश्चपुटपाकाश्चकारयेत्॥१९॥धात्रीफलंनिंबकपित्थपत्रंयष्ट्याह्वलोध्रंखदिरंतिलाश्च॥

पिप्पलीकृतसिद्धं चक्षुष्यं शुक्रयोर्हितं ॥४४॥ घ्राणकर्णाक्षिवक्त्रोत्थमुखरोगव्रणापहं ॥ कामलाज्वरवीस
र्पगंडमालाहरं परं ॥४५॥ अजकायां शिरां मुक्त्वा त्वक्चूर्णं विरेचयेत् ॥ घृतं वातहरैः सिद्धं मजकायां च यो
जयेत् ॥४६॥ शोके पाने तथा नासे योज्यं दृष्टिविदां वरः ॥ शाखाक्स्य शिरःकर्णशोषांगान् कथितो जले ॥
॥४७॥ शोधयेत्कुजवं सर्पिः पूरणं वा जलापहं ॥ श्वलं दृष्टिविनाशस्य तिमिरं समुदाहृतं ॥४८॥ ऋषिभिः
कथितं तस्मात्तस्य कुर्याच्चिकित्सितं ॥ कल्कं क्वाथोऽथवा चूर्णं त्रिफलाया निषेवितं ॥४९॥ मधुना हविषा
वापि समस्ततिमिरांतकृत् ॥ त्रिफलां लोहचूर्णं च माक्षिकं मधुयष्टिकां ॥५०॥ सायमाज्यान्वितं मासमद्या
त्तिमिरनाशनं ॥ प्रातस्तु तस्य वा पर्वमद्यात्सर्वान्न पथ्यकृत्पथ्यकृ ॥५१॥ मृद्वीकाशर्कराक्षौद्रैः सततं तिमिनुरः ॥
नाप्याययेद् हेमयष्ट्याह्वसिताजीर्णाज्यमाक्षिकैः ॥५२॥ संयोजिता यथाकालं तिमिरघ्नी वरा वरा ॥ स घृतं वाव
राक्वाथं शीलयेत्तिमिरामयी ॥५३॥ पायसं वा वरायुक्तं शीतं समधुशर्करं ॥ त्रिफलाज्यं मधुयवाः पादाभ्यंगः ॥
शतावरी ॥५४॥ मुद्गाश्चक्षुष्याः संक्षेपाः द्वमी कथितो भिषग्वरैः ॥ पुराणसर्पिः तिमिरेषु सर्वशो हितं नवे
दायसभाजनस्थितं ॥५५॥ हितं च विंद्यात्त्रिफलाघृतं सदायतं च यन्मेषविषाणनामभिः ॥ कृतं कृस्य पुलं तं

॥१२०॥

खंसैधवंत्र्यूषणंसिता॥५६॥फेनोरसांजनंक्षौद्रंविडंगानि मनःशिला॥कुक्कुटांडकपालानिवर्त्तिरेषासुरसा
वती॥५७॥तिमिरंपटलंकाचंमलंवास्तुव्यपोहति॥हरीतकीहरिद्रास्वपिप्पल्योलवणानिच॥५८॥कृष्णतिमि
रजिद्वर्त्तिनघ्नान्विस्रातिहन्यते॥निम्बाहृयानयामांसीकुष्ठकृष्णाविचूर्णिता॥५९॥सर्वनेत्रामयान्हन्यात्तद्दे
तत्सोगतमंजनं॥त्रिफलाकुक्कुटांडत्वक्कासीसमयोरजः॥६०॥नीलोत्पलंविडंगानिपूनंचसरितांप
तेः॥अजेनपयसापिष्ट्वाभावयेत्ताम्रभाजने॥६१॥ससरात्रस्थितंन्यःपिष्टसंक्षेणवर्त्तयेत्॥एषादृष्टिप्र
दावर्त्तिरंधस्यभिन्नचक्षुषः॥६२॥नीलोत्पलंविडंगानिपिष्टालीरक्तचंदनं॥अंजनंसैधवंचैवसद्यस्तिमि
रनाशनं॥६३॥शंखस्यचतुरोभागास्तदर्द्धेनमनःशिला॥मनःशिलार्द्धमरिचंमरिचार्द्धेनपिप्पली॥६४॥
वारणातिमिरंहन्यादर्बुदंहंतिमस्तुना॥चिप्पटंमधुनाहंतिस्त्रीक्षीरेणतदुत्तमं॥६५॥शाणार्द्धंमरिचा
र्द्धंचपिप्पल्यर्णवफेनयोः॥सार्द्धंचसैंधवाच्छाणोमुख्यसौवीरकांजनात्॥६६॥पिष्टंसुसूक्ष्मंचित्रायां
चूर्णांजनमिदंस्तुतं॥कंडूकाचकफर्त्तानांमलानांचविशोधनं॥६७॥अशीतिस्तिलपुष्पाणिषष्टिःपिप्प
लितंदुलाः॥जात्याःकुसुमपंचाशन्मरिचानिचषोडश॥६८॥भृंगराजरसेनैवगुटिकांकारयेद्बुधः॥ए

ह०

षाकुसुमिकाचर्तिर्गंतनचक्षुर्निवर्त्तयेत् ॥६९॥ चंदनंत्रिफलापूगपलाशतरुशोणितैः ॥ जलपिष्टैरियंवर्
तिरन्नोषतिमिरापहा ॥७०॥ व्योषासलानयाकुष्ठतार्क्ष्यवर्त्तिःक्लमहरेत् ॥ अर्बुदंपटलंकाचंतिमिरार्म
दिनिश्कृतं ॥७१॥ अंजनंगैरिकंपत्रंकर्पूरंनीलमुसलं ॥ सनागपुष्पमधुकमंजनंतिमिरापहं ॥७२॥ र
सेंद्रभुजगोतुल्योनाभ्यांद्विगुणमंजनं ॥ रषकर्पूरसंयुक्तमंजनंनयनामृतं ॥७३॥ त्र्यूषणत्रिफलाचकंसे
धवालमनःशिला ॥ क्लेदोपहंपदेहकंडूघ्नीवर्त्तिःशस्ताक्षकापहा ॥७४॥ कृष्णसर्पवसाशंखकतकोसलमं
जनं ॥ रसक्रियेयमचिरादंधानांदर्शनप्रदा ॥७५॥ धात्रीसैंधवरूक्षाभिःतुल्याल्पमरिचान्विताः ॥ क्षौ
द्रयुक्तानिहंत्याशुपटलंचरसक्रिया ॥७६॥ शिलासैंधवकासीसशंखव्योषरसांजनैः ॥ सक्षौद्रैःकाच
तिमिरपटलघ्नीरसक्रिया ॥७७॥ सौवीरमाषमध्वक्ताधात्रीकिंचान्नयोदरे ॥ बदरामलसंपक्वंपरं
॥१२९॥ तिमिरनाशनं ॥७८॥ कृष्णसर्पवदनेसहविष्कंदग्धमंजनमनिस्त्रधूमं ॥ चूर्णितंनलदपत्रविमिश्रं
भिन्नतारयपिरक्षतिचक्षुः ॥७९॥ अक्षबीजमल्लिवामलकत्वक्तुत्थयष्टिमधुकैर्जलपिष्टैः ॥ कारयीत
गुटिकाःपरिशुष्कानाशयंतितिमिराण्यचिरेण ॥८०॥ लिंगनाशेकफोत्थेतुयथावद्विधिपूर्वकं ॥ विध्वादैव

धु या

कृतेछिद्रेनेत्रंस्तन्येनसिंचयेत्॥८१॥क्लिन्नतासघृताद्दूर्वायवगैरिकसारिवा॥मुखालेपप्रयोक्तव्यार
जारोगोपशांतये॥८२॥पयस्यामरिचापत्रमंजिष्ठामेवरपि॥अजाक्षीरान्वितैर्लेपःसुखोष्णःपथ्यउ
च्यते॥८३॥लोध्रसैंधवमृद्वीकामधुकैश्छागलंपयः॥आश्च्योतनंप्रयोज्यंहिरुजारोगविनाशनं॥८४॥
करंजपद्मकिंजल्कचंदनोसलगैरिकैः॥गोशकृद्रससंपिष्टैर्नक्तांध्यहिमंतजनं॥८५॥रसांजननिशादा
र्वीजातीपत्ररसोमधु॥नक्तांध्यतांजयेदेतदंजनंसाधुयोजितं॥८६॥कृष्णाछागयकृन्मध्यपक्वंतद्रस
सध पेषिता॥अंजनाद्धंतिनक्तांध्यंतत्र्यंक्षोद्रसरूषणं॥८७॥रसांजनंहरिद्रेद्वेमालतीनिंबपल्लवाः॥गोश
कृद्रससंयुक्तावर्तिरात्र्यंधनाशनी॥८८॥नलिनोसलकिंजल्कंगोसकृद्रससंयुतं॥गुटिकांजनमेतत्स्या
द्दिनरात्र्यंधयोर्हिताः॥८९॥स्रोतोग्रंसैंधवंचंद्रलाहरेणुंचापिपेषयेत्॥अजामूत्रेणतार्क्ष्यःक्षणदांध्यं
जनेहिता॥९०॥दध्नातिघृष्टंमरिचंरात्र्यंध्यंजनमुत्तमं॥पच्येतुगोधायकृदंतःकल्कितंसुपूरितंमागधि
काभिरंबुना॥९१॥निषेवितंतद्घृतकंजनेननिहंतिनक्तांध्यमसंशयंखलु॥त्रिफलाक्वाथकल्काभ्यांसप
यस्कंघृतंशृतं॥९२॥तिमिराण्यचिराद्धंतिपीतमेतन्निशामुखे॥रास्नाफलत्रयक्वाथोदशमूलरसेघृतं॥९३॥

कल्केनजीवनीयानांघृतंतिमिरनाशनं॥त्रिफलायोरसप्रस्थंप्रस्थंभृंगरसस्यवा॥९४॥पीडयित्वावृषंबा
लंरसप्रस्थंप्रदापयेत्॥अजाक्षीरंतुतत्तुल्यंघृतप्रस्थंप्रदापयेत्॥९५॥इमानोषधसंभारान्फलिशान्क
ल्कपेषितान्॥पिप्पल्यः शर्कराद्राक्षात्रिफलानीलमुसलं॥९६॥मधुकंक्षीरकाकोलीमधुपर्णीनिदग्धि
का॥तस्यमृदुसिद्धंविज्ञायशुभेभांडेनिधापयेत्॥९७॥उर्द्धपानमधःपानंमध्येपानंशस्यते॥नक्तांध्येतिमि
रकाचेसर्वनेत्ररुजासुच॥९८॥अदृष्टिंमंददृष्टिंचपित्तश्लेष्मसमाकुलं॥स्रवतोवातपित्ताभ्यांवर्द्धयस्य
चदारुणाः॥९९॥आसन्नतिमिराणांचदूराद्यस्यनपश्यति॥गृध्रदृष्टिकरंघोरंबलवर्णाग्निवर्द्धनं॥२००॥
त्रिफलाव्योषसिंधुछर्दितंसिद्धंपिबेन्नरः॥चक्षुष्यंभेदनंहृद्यंदीपनंकफनाशनं॥१॥बलाशतावरी
यासाम्लामेरयकैःपचेत्॥त्रिफलासहितंसर्प्पिस्तिमिरघ्नमनुत्तमं॥२॥त्रिफलाऋषभद्राक्षामुस्ताक
टुकरोहिणी॥प्रपौंडरीकंसूक्ष्मैलाविडंगंनागकेसरं॥३॥नीलोत्पलंसारिवेद्वेचंदनंरजनीद्वयं॥कार्ष
कैःपयसातुल्यंस्त्रिगुणंत्रिफलारसं॥४॥घृतप्रस्थंविपक्वव्यंसर्वनेत्ररुजापहं॥तिमिरंत्रिदोषमास्रा
वंकामलांकाचमर्बुदं॥५॥वैसर्प्पपटलंकंडूतोदनंश्वयथुंतथा॥खालित्यंपिंजरत्वंचकेशानांपतनंतथा॥

१२२

॥१

॥६॥ अन्येच बहवोरोगानेत्रजायेच वर्त्मजा॥ तान्सर्वान्नाशयत्याशु नास्कुरस्तिमिरंयथा॥७॥ गवांवृत्क्राप्य
विपक्कमुत्तमंहितंचतैलंतिमिरेषुनस्ततः॥ घृतंहितंकेवलमेवपैत्तिके तथाणुतैलंपवनास्रगुत्थयोः॥
॥८॥ वर्त्मावलेखंचकुशास्त्तद्धस्रशोणितमोक्षणं॥ पुनःपुनर्विरेकंचपित्तरोगातुरेभवेत्॥९॥ हरितालंव
चादारुसुरसांरसपेषितं॥ अनयारसपिष्टंवातगरंपित्तनाशनं॥१०॥ नावितंबस्तमूत्रेणससैन्हंदेव
दारुच॥ रसांजनंसर्जरसोजातीपुष्पंमनःशिला॥११॥ समुद्रफेनोलवणंगैरिकंमरिचानिच॥ एतत्स
मांशंमधुनापिष्टंप्रक्लिन्नवर्त्मनि॥१२॥ अंजनंक्लेदनैकुघ्नंपक्ष्मणांचप्ररोहणं॥ तुत्थकस्यफलंश्वेत
मरिचानिचविंशतिः॥१३॥ त्रिंशताम्रंजिरूपल्लैःपिष्टानाम्रेनिधापयेत्॥ पिल्लानपिल्लान्कुरुतेबहु
वर्षोषितानपि॥१४॥ तत्सेवनेनोपदेहाश्रुकंडूशोफाश्चनाशयेत्॥ करंजबीजंसुरसंसुमनःकोरकाणिच
॥१५॥ संक्षुद्यसाधयेत्क्वाथेपूतेतस्यरसक्रिया॥ अंजनंपिल्लभेषज्यंपक्ष्मणांचप्ररोहणं॥१६॥ पुष्पका
सीसचूर्णोर्णेसुरसारसभावितं॥ ताम्रेदशाहंतत्सैल्लुपक्ष्मनाशनजिदंजनं॥१७॥ मंजिष्ठमधुकोत्पलोदधिकफ
स्वकुसेव्यगोरोचनामांसीचंदनशंखपत्रगिरिमृत्तातालीसपुष्पांजनैः॥ सर्वैरिवसमांशमंजनमिदंत्र

स्तांसदा च क्षुष कंडूक्लेदमलास्रशोणितरुजापिल्लार्मशुक्लापहं ॥१८॥ पिप्पली त्रिफलाद्राक्षालोहचूर्णस
सैंधवं ॥ भृंगराजरसे पिष्टं गुटिकांजनमिष्यते ॥१९॥ अर्माणि तिमिरं काचं कंडूं शुक्लं तदर्जुनं ॥ अंजनं नेत्र
रोगांश्च हन्यान्निरवशेषतः ॥२०॥ रोचनाक्षारसुरसा निपिप्पल्यः क्षौद्रमेव च ॥ प्रतिसारणमेकैकं भिन्नं
लगणइष्यते ॥२१॥ रसांजनमधुभ्यां च भिन्नमंजननामिकं ॥ प्रतिसार्य जिनेर्युज्यात् क्रियां लगणसंमितां
॥२२॥ त्रिफलाम्रत्वक्कासीसं ससैंधवं सरसांजनैः ॥ रसक्रिया विषग्रंथौ भिन्ने स्यात्प्रतिसारणं ॥२३॥ भिन्नो
पनाहं कफजं पिप्पलीमधुसैंधवैः ॥ विलिखेन्मंडलाग्रेण प्रच्छयेद्वा समंततः ॥२४॥ याप्यः पक्ष्मोपरोध
स्तु रोमोद्धरणलेखनैः ॥ कर्मण्युपचितं लेख्यं स्रवत्स्त्रष्टशोणितं ॥२५॥ प्रवृद्धांतर्मुखे रोम सहिष्णोर
द्धरेद्घनैः ॥ संदंशेनोद्धरेदग्न्या पक्ष्मरोमाणि बुद्धिमान् ॥२६॥ व्यापयेनाग्निवर्णेन रोमकूपान् विमि
द्धहेतून् ॥ प्रदेहाः शीतलानन्नूपं क्रिया पक्ष्मोपरोधकृत् ॥२७॥ संरंभरागशूलाश्रुनाशनं दृक्प्रसाधनं ॥ नेत्रे
त्वभिहते कुर्यात् शीतमाश्च्योतनादिकं ॥२८॥ दृष्टिप्रसादनविधिं क्रमाश्चकुर्यात्स्निग्धैर्हिमैश्च मधुरैश्च त
था प्रयोगैः ॥ स्वेदाग्निधूमभयशोकरुजाभितापैरभ्याहतामपि तथैव भिषक् चिकित्सेत् ॥२९॥ आगंतुदो

॥१२३

वृ २

षं प्रसमीक्ष्य कार्यं वक्ष्ये क्ष्मणा स्वेदनमादितस्तु॥ आश्च्योतनस्त्री पयसा च सद्यो घोषस्वपि नक्तनजापहस्या

त्॥२०॥ निशाष्टुं त्रिफलादार्वी सितामधुसमन्वितं॥ अभिघातोक्षिरुग्घ्नं नारीक्षीरं तु पूरणात्॥२१॥

ओजं श्रतं क्षीरपात्रं मधुकं चोत्पलानि च॥ जीवकर्षभकौ पेचापि ष्टाः सर्प्पिर्विपाचयेत्॥२२॥ सर्वनेत्रा

भिधानेषु सर्प्पिरेतत्प्रशस्यते॥ ॥ ॥ इति वृंदसंग्रहे चक्षुरोगचिकित्सितं एकषष्टितमोध्यायः॥ ॥

अथ शिरोरोगचिकित्सितं व्याख्यास्यामः॥ ॥ वातिके शिरसो रोगे स्नेहस्वेदानुपाचरेत्॥ पानानुप

नहाश्चापि कुर्याद्वातामयापहान्॥२३॥ प्रलेपनाहाः स्वेदाश्च मांसधान्यकृता हिताः॥ वातघ्नदशमूला

दिसिद्धक्षीरेण सेवनं॥२४॥ आशिरोव्यापितं चर्म रुत्वाष्टांगुलमुच्छ्रितं॥ तेनावेष्ट्य शिरोधस्तान्माषक

ल्केनानुलेपयेत्॥२५॥ निश्चलस्योपविष्टस्य तैलैः कोष्णैः प्रपूरयेत्॥ धारयेदारुजः शांतेर्यामं यामार्द्धमे

व वा॥२६॥ शिरोबस्तिर्जयत्येष शिरोरोगं मरुद्भवं॥ हनुमन्याक्षिकर्णार्तिमर्दितं मस्तकंपनं॥२७॥ पैत्ते

